| परिशिष्टम् [ २ ] श्रीहेमचन्द्रसूरीश्वरविरचितदीपोत्सवकल्पस्याकाराद्यनुक्रमः ॥ | १९४-१९८ |
| परिशिष्टम् [ ३ ] श्रीविनयचन्द्रसूरीश्वरविरचितदीपालिकाकल्पस्याकाराद्यनुक्रमः ॥ | १९९-२०३ |
| परिशिष्टम् [ ४ ] श्रीजिनसुन्दरसूरीश्वरविरचितदीपालिकाकल्पस्याकाराद्यनुक्रमः ॥ | २०४-२११ |
| परिशिष्टम् [ ५ ] अज्ञातकर्तृकदीपालिकाकल्पस्याकाराद्यनुक्रमः ॥ | २१२-२१४ |
| परिशिष्टम् [ ६ ] दीपालिकाकल्पसंग्रहान्तर्गतसंस्कृतकल्पानां विशेषनाम्नामकाराद्यनुक्रमः ॥ | २१५-२२३ |
| परिशिष्टम् [ ७ ] दीपालिकाकल्पसंग्रहान्तर्गतप्राकृतकल्पयो-र्विशेषनाम्नामकाराद्यनुक्रमः ॥ | २२४-२२९ |
| परिशिष्टम् [ ८ ] श्रीजिनसुन्दरसूरीश्वरविरचितदीपालिकाकल्पस्य भाषान्तरः ॥ | २३०-२५६ |
| परिशिष्टम् [ ९ ] श्रीजिनसुन्दरसूरीश्वरविरचितदीपालिकाकल्पस्य विशेषपदार्थाः ॥ | २५७-२७६ |


● ● ●

# दीपालिकाकल्पसंग्रहः ॥

D:\chandan/new/kalp-1/pm5\3rd proof

### कलिकालसर्वज्ञाऽऽचार्यवर्यश्रीहेमचन्द्रसूरीश्वरविरचितः

# दीपोत्सवकल्पः ॥

**दीपोत्सवमहिमा –**

सन्तु श्री**वर्धमान**स्य, सुखायाङ्घ्रिनखाः सताम् ।
दर्पणाः संयमश्रीणां, पद्मरागमया इव ॥१॥
यस्येदं वर्त्तते तीर्थं, तथा सङ्घश्चतुर्विधः ।
यदागमानुसारेण, पुण्येषु कुरुते रतिम् ॥२॥[१]
नृषु चक्री सुरेष्विन्द्रस्तारकेषु हिमद्युतिः ।
महीरुहेषु कल्पद्रुः, शैलेषु कनकाचलः ॥३॥
मन्दाकिनी स्रवन्तीषु , तेजस्विषु दिवाकरः ।
ओङ्कारः सर्ववर्णेषु , देवतासु हरिप्रिया[२] ॥४॥
उच्चैश्रवास्तुरङ्गेषु , द्विरदेषु सुरद्विपः ।
वल्लीषु भोगिनां वल्ली[३], सरसीषु च मानसम् ॥५॥
तथा पर्वसु दीपाली[४], प्रधाना विदिता भुवि ।
भूष्यन्ते कटरे यस्यां, पशुगेहद्रुमा अपि ॥६॥
भूषणानि प्रभूतानि, चीवराणि वराणि[५] च ।
लोकः परिदधात्यस्यां, सर्वोऽपि मुदिताशयः ॥७॥
प्रदीपपर्वणोऽस्यैव, विशेषेण प्रकाशकम् ।
मया[६] श्री**वर्धमान**स्य, चरित्रं[७] चारु रुच्यते ॥८॥

---

१. श्लोकोऽयं A प्रतिमध्ये सप्तमो दृश्यते । २. लक्ष्मीः, इत्यर्थः । ३. नागवल्ली, इत्यर्थः । ४. दीवाली–A । ५. चीवराण्यम्बराणि A । ६. हेमचन्द्राचार्येण, इत्यर्थः । ७. चरितं B ।

D:\chandan/new/kalp-1/pm5\3rd proof

## श्रीवीरचरित्रम् –

श्री**वीरप्राणत**स्वर्ग-**पुष्पोत्तर**विमानतः ।
[१]च्युत्वा**ऽऽषाढसिते** पक्षे **षष्ठ्यां** [२]**हस्तोत्तरे**न्दुनि ॥९॥

**कुण्डग्रामे**ऽथ **सिद्धार्थ**-भूपुरन्दरमन्दिरे ।
आगमत् **त्रिशला**कुक्षौ, सरस्यां राजहंसवत् ॥१०॥ [युग्मम्]

[१]सिंहो [२]गजो [३]वृषः [४]श्री [५]स्रक् [६]शशि[७]र्भानु[८]र्ध्वजो [९]घटः ।
[१०]सरो[११]ऽम्भोधि[१२]र्विमानं च, [१३]रत्नौघो[१४]ऽग्निरिति क्रमात् ॥११॥

अपश्यत् **त्रिशला**देवी, महास्वप्नांश्चतुर्दश ।
विशतो वदनाम्बुजे, प्रभौ [३]गर्भागते निशि ॥१२॥ [युग्मम्]

**चैत्र**[४]**मासि सिते** पक्षे, **त्रयोदश्यां** जगत्पतिम् ।
असूत **त्रिशला**देवी, सिंहाङ्कं कनकप्रभम् ॥१३॥

इतश्च दिक्कुमारीणामासनानि चकम्पिरे ।
जिनजन्मप्रभावेण, [५]वातेनेव [६]महीरुहाः ॥१४॥

अवधिज्ञानविज्ञातजिनजन्ममहोत्सवाः ।
आजग्मुर्दिक्कुमार्यस्ताः [७]सूतिकर्म च चक्रिरे ॥१५॥

[८]दत्त्वाऽवस्वापिनीं देव्याः, पद्मिन्या इव [९]शीतगुः ।
निधाय च तदभ्यर्णे, प्रभोः [१०]प्रतिकृतिं हरिः ॥१६॥

जिनजन्माभिषेकाय, कृत्वोत्सङ्गे जिनाधिपम् ।
मेरुमूर्ध्नि **सुधर्मेन्द्रो**, भेजे [११]कण्ठीरवासनम् ॥१७॥

[१२]अभिषिच्य प्रभुं तीर्थवारिभिश्चित्तहारिभिः ।
आनीय तत्क्षणं मातुरर्पयामास वासवः ॥१८॥

---

१. श्च्युत्वा B । २. हस्तोत्तरोडुनि B, F, G, H, I, L । ३. गर्भस्थिते-A, F, G, I, L । ४. माससिते B । ५. वातेनैव B, F । ६. महीरुहः B, F । वृक्षा इत्यर्थः । ७. शक्रोऽपि चलितासनः A, I । ८. स दत्त्वा स्वापिनीं A, I । ९. चन्द्र इत्यर्थः । १०. प्रभुप्रतिकृतिं B । द्वितीयरूपमित्यर्थः । ११. स्वर्णसिंहासनमित्यर्थः । १२. विंशतिर्भवनाधीशा द्वात्रिंशत् व्यन्तराधिपाः । दश वैमानिका इन्द्राश्चन्द्रादित्यौ तदाऽऽगताः ॥ श्लोकोऽयं केवलं A, I प्रति मध्ये १७-१८ श्लोकमध्ये दृश्यते ।

स्वराज्यवृद्धिकरणाद्यर्थार्थं पितरौ [१]तदा ।
नामधेयं विदधतु**र्वर्धमान** इति प्रभोः ॥१९॥[२]
कथञ्चिद् गृहवासेऽस्था[३]दष्टाविंशतिवत्सरीम् ।
स्मरन् स्वाभिग्रहं पूर्वं, प्रव्रज्योत्कण्ठितः प्रभुः ॥२०॥
पितृव्योऽथ **सुपार्श्वो**ऽभूत् , [४]भ्राताऽऽद्यो **नन्दिवर्धनः** ।
**सुदर्शना** [५]स्वसा तीर्थपतेः पत्नी **यशोमती** ॥२१॥
दुहिता महिता स्त्रीसु , बभूव **प्रियदर्शना** ।
कुटुम्बमिति **वीर**स्य, पवित्रं [६]गाङ्गवारिवत् ॥२२॥
[७]दत्त्वा संवत्सरं दानमुक्तो लोकान्तिकामरैः ।
[८]कृत्वा षष्ठं तपो देवैः कृतनिष्क्रमणोत्सवः ॥२३॥
सहस्रवाह्यामारुह्य, शिबीं **चन्द्रप्रभा**भिधाम् ।
ज्ञातखण्डवने गत्वा, सर्वसावद्यवर्जनात् ॥२४॥
**मार्गशीर्षा**भिधे [९]मासि, **श्यामा**यां **दशमी**तिथौ ।
प्रव्रज्यामग्रहीदह्नश्चतुर्थप्रहरे प्रभुः ॥२५॥[१०]
[११]उत्पेदे तुर्यकं ज्ञानं, जातं **बहुल**वेश्मनि ।
परमान्नेन नाथस्य, पारणं पुण्यकारणम् ॥२६॥
गोपालाः कौशिकः शूलपाणिः सङ्गमकः सुरः ।
इत्यादिभिः प्रभुः ध्यानात् क्षोभ्यमानोऽपि नाक्षुभत् ॥२७॥

---

१. तथा A । २. अनन्तरं A, F, G, I, L प्रतिषु–महावीराभिधाहेतुः जैनेन्द्रस्य च कारणम् । अभूदिह यशोमत्या पाणिग्रहमहोत्सवः ॥२०॥ इति दृश्यते । महावीर इत्यभिधाया हेतुः कारणम्–उत्पत्तिः, यशोमत्याः–यशोदायाः पाणिग्रहमहोत्सवश्च इह–अत्रान्तरे, अभूत्–संपन्नमिति भावः । B, H, J प्रतिषु – शैशवे बालकैः साकमामलकीश्रितेन च । निर्जितोऽमरस्तत्पृष्ठिघाते नीचीकृतोऽमरः ॥२०॥ तथा D प्रतौ – अत्रामलकीक्रीडादि सवयोभिः सह देवेन भुजगीभूय च स्थितं तत्राऽभितो भगवान् बिम्बरूपधरं देवमारुह्य मुष्टिना आहत्य पृष्ठे वामनीचकार इत्यस्ति । ३. अष्ट A, I । ४. भ्राताथो, H, A, । ५. भगिनीत्यर्थः । ६. गङ्गा A, J । ७. तीर्थ प्रवर्त्तयेत्युक्तस्ततो F, G, I, L । ८. कृत्वाष्टमं B, J । ९. मासे B । १०. अयं श्लोकः चतुर्विंशस्थाने, चतुर्विंशश्च पञ्चविंशस्थाने A, D, E, F, G, H, J, L प्रतिषु दृश्यते । ११. मध्याह्ने बहुलावासे द्वितीये दिवसे भवेत् । इति F, G, I, L प्रतिमध्ये । ब्राह्मणग्रामे इत्यर्थः A ।

**D:\chandan/new/kalp-1/pm5\3rd proof**

एवं च तप्यमानस्य,[1] तपस्तस्य[2] जिनेशितुः[3] ।
सार्धद्वादशवर्षाणि ययुः पक्षाधिकानि हि ॥२८॥[4]

ततश्च मासि **वैशाखे, शुक्ला**यां **दशमी**तिथौ ।
चत्वारि घातिकर्माणि, विलयं ययुरर्हतः ॥२९॥

**ऋजुवालिका**नदीतीरे, **श्यामाक**स्य कटुम्बिनः ।
क्षेत्रसीमनि मध्याह्ने, **शाल**भूमीरूहादधः ॥३०॥

गोदोहिकासनस्थस्य, षष्ठभक्तविधायिनः ।
**वर्धमान**स्य सञ्जज्ञे, केवलज्ञानमुज्ज्वलम् ॥३१॥ [युग्मम्]

रजतस्वर्णमाणिक्यवप्रत्रयविराजितम् ।
समवसरणं[5] चक्रुः, ततः शक्रादयः सुराः ॥३२॥

---

१. तपिच् ऐश्वर्ये वा इति धातुपाठोक्तेर्दिवादावात्मनेपदीयोऽपि तप्धातुरस्ति। २. ततस्तस्य A। ३. च B। 4- २८ पश्चात् निम्नदर्शिताः ६ श्लोका केवलं A, I मध्ये सन्ति अन्यत्र न सन्ति।

किञ्च प्रभोस्तपः संख्या त्वेकं षाण्मासिकं मतम् ।
साभिग्रही तु षण्मासी न्यूनाभूत् पञ्चभिर्दिनैः ॥१॥

चतुर्मास्यो नवाभूवंस्त्रिमास्यौ द्वे बभूवतुः ।
सार्धद्विमासके द्वे तु द्विमासक्षयणानि षट् ॥२॥

द्वे सार्धमासिके जाते मासिकान्यर्कसंख्यया ।
पक्षाः द्वासप्ततिश्चासन् भद्रादिप्रतिमात्रयम् ॥३॥

प्रतिमाश्चैकरात्रिक्यो द्वादशाष्टमभक्ततः ।
एकोनत्रिंशदधिके षष्ठानां द्वे शते मते ॥४॥

नित्यभक्तं चतुर्थं च कदाचिदपि नाऽजनि ।
सर्वमेव तपःकर्म जलहीनं प्रभोरभूत् ॥५॥

जातं चैकोनं पञ्चाशत् पारणाहः शतत्रयम् ।
द्वादशाब्दी च षण्मासी पक्षश्च छद्मनाऽजनि ॥६॥ तपोयन्त्रं त्वेदम्—

| दीक्षा तप | छ मासी तप | छ मासी तप | चउ मासी | त्रि मासी | अढी मासी | दो मासी | देढ मासी | मास खमण | पक्ष खमण | भद्र प्रतिमा | महाभद्र प्रतिमा | सर्वतो भद्रप्रतिमा | छट्ठ | अट्ठम | पारणा |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| दिन २ | १ | पांच दिन न्युनतम-१ | ९ | २ | २ | ६ | २ | १२ | ७२ | दिन २ | दिन ८ | दिन १० | २२९ | १२ | दिन ३४९ |

सर्वाग्रं वर्ष १२ मास ६ दिन १५

४. इतश्च F। ५. चक्रुः समवसरणं A।

**इन्द्रभूतिरग्निभूतिर्वायुभूतिश्च गोतमाः**[१] ।
**व्यक्तः सुधर्मामण्डितमौर्यपुत्रावकम्पितः** ॥३३॥
**अचलभ्रातामेतार्यप्रभासश्च** पृथक्कुलाः ।
**वीरस्यै**कादशाभूवन् , गुणिनो गणधारकाः ॥३४॥
सर्वलोकोपकाराय, त्रिलोकीतिलकः प्रभुः ।
विजहार धरापीठे, भव्याम्भोरुहभास्करः ॥३५॥
चतुर्दशसहस्राणि, श्रमणा जज्ञिरे प्रभोः ।
**चन्दना**द्याश्च षट्त्रिंशत् , सहस्राणि तपोधनाः ॥३६॥
लक्षमेकोनषष्टिश्च, श्रावकाः **शतका**दयः ।
अष्टादश सहस्राणि, लक्षाश्च श्राविकास्त्रयः ॥३७॥
अथ निर्वाणसमयं, स्वस्य ज्ञात्वा जिनेश्वरः ।
चक्रे पुर्या**मपापायां,** चातुर्मासिकमन्तिमम् ॥३८॥
स्वयं श्री **वर्धमान**स्तु , षोडशप्रहरावधि ।
व्याख्यां लोकोपकाराय, निर्वाणसमये व्यधात् ॥३९॥[२]

**अन्तिमदेशना –**

**''पुमर्था इह चत्वारः, कामार्थौ तत्र जन्मिनाम् ।**
**अर्थभूतौ नामधेयादनर्थौ परमार्थतः ॥४०॥**
**अर्थस्तु मोक्ष एवैको, धर्मस्तस्य च कारणम् ।**
**संयमादिर्दशविधः, संसाराम्भोधितारणः ॥४१॥**
**अनन्तदुःखः संसारो, मोक्षोऽनन्तसुखः पुनः ।**
**तयोस्त्यागपरिप्राप्तिर्हेतुर्धर्मं विना न हि ॥४२॥**
**मार्गं श्रितो यथा दूरं, क्रमात् पङ्गुरपि व्रजेत् ।**
**धर्मस्थो घनकर्माऽपि, तथा मोक्षमवाप्नुयात्'' ॥४३॥**

---

१. गौतमाः A, B ।

२. **चत्तारि परमंगाणि दुल्लहाणीह जंतुणो ।**
**माणुसत्तं सुई सद्धा संजमम्मि य वीरियं ॥३९-१॥**

इयं गाथा A. I मध्ये अस्ति, अन्यत्र नास्ति, अस्मिन् स्थाने, प्रतौ 'पुमर्था इह' इत्यादयश्चत्वारः श्लोकाः दृश्यन्ते, अन्यत्र न सन्ति ।

D:\chandan/new/kalp-1/pm5\3rd proof

**स्वप्नकथनं फलादेशश्च –**

*एवं च देशनां कृत्वा, विरते त्रिजगद्गुरौ ।
मण्डलेशः **पुण्यपालः**, प्रभुं नत्वा व्यजिज्ञपत् ॥४४॥
स्वामिन् ! स्वप्ना मयाद्याष्टौ दृष्टास्तत्र [१]**गजः** [२]**कपिः** ।
[३]**क्षीरद्रुः** [४]**काक**[५]**सिंहा**[६]**ऽब्ज**[७]**बीज**[८]**कुम्भाः** इमे क्रमात् ॥४५॥
★**जीर्णशालास्थितो [१]हस्ती, चापल्यं कुरुते [२]कपिः ।**
**[३]बब्बूलवृत[१]क्षीरद्रुः, [४]काकाश्च दीर्घिकारताः ॥४६॥**
•**[५]सिंहशवमथाधृष्यमस्थाने [६]कमलोद्भवः ।**
**ऊखरोर्व्यां [७]बीजवापः, [८]स्वर्णकुम्भाः मलाविलाः ॥४७॥**
[२]तदेषां फलमाख्याहि, भीतोऽस्मि भगवन्नहम्' ।
इति पृष्टो जगन्नाथो, व्याचकारेति तत्फलम् ॥४८॥

---

तुलना- * **किंच उदाहरणाइं, बहुजणमहिगिच्च पुव्वसूरीहिं ।**
**एत्थं निदंसियाइं, एयाइं इमम्मि कालम्मि ॥८१४॥**

किञ्चेत्यभ्युपाये, उदाहरणानि दृष्टान्ताः बहुजनमधिकृत्य बहोरसंविग्नलोकस्य प्रवृत्तिमधिकृत्य पूर्वसूरिभिः प्राक्तनाचार्यैरत्र प्रवचने निदर्शितान्येतानि । अस्मिन् दुष्षमालक्षणे काले एतत्कालोपयोगीनीत्यर्थः ॥८१४॥ उदाहरणान्येव विवक्षुस्तावत्ततसम्बन्धमाह-

**केणइ रन्ना दिट्ठा, सुमिणा किल दुसमसुसमंते ।**
**भीई चरमोसरणे, तेसिं फलं भगवया सिट्ठं ॥८१५॥**

केनचिदनिर्दिष्टनाम्ना राज्ञा उपलब्धा स्वप्ना निद्रायमाणावस्थायां मनोविज्ञानविकाररूपाः । किलेत्याप्तप्रवदासूचनार्थः । अष्टेतिसंख्या दुःषमसुषमान्तेऽस्यामवसर्पिण्यां चतुर्थारकपर्यवसाने । ततो जागरितस्य भीतिर्भयमुत्पन्नम् । ततोऽपि च चरमसमवसरणे कार्तिकमासामावास्यायां तस्य पृच्छतः, तेषां स्वप्नानां फलं भगवता श्रीमन्**महावीरेण** शिष्टं कथितमिति ॥८१५॥ स्वप्नानेवाह-

**[१]गय [२]वाणर [३]तरु [४]धखे, [५]सिंहे तह [६]पउम [७]बीय [८]कलसे य ।**
**पाएणं दुस्समाए, सुविणाणिट्ठफला धम्मे ॥८१६॥**

गजवानरास्तरवो ध्वांक्षाः सिंहस्तथा पद्मबीजानि कलशाश्चेति । प्रायेण दुःषमायां स्वप्ना एतेऽनिष्टफला धर्मे अधर्मविषय इति । अत्र च गाथायां वचनव्यत्ययः प्राकृतत्वात् ॥८१६॥ - इति उपदेशपदे ।

★ जीर्णशाला.... • सिंहशव....श्लोकद्वयं A, I, J, L मध्ये अस्ति, अन्यत्र नास्ति ।
१. कल्पद्रुमः । २. तदाख्याहि फलं तेषां B, D, F, G, J, L ।

## १. गजस्वप्नफलम् –

*"[1]विवेकिनोऽङ्गिनो भूत्वा, हस्तितुल्या अतः परम् ।
वत्स्यन्ति श्रावकाः लुब्धाः, क्षणिकर्द्धिसुखे गृहे ॥४९॥
न दौस्थ्ये परचक्रे वा, प्रवजिष्यन्त्युपस्थिते ।
[2]आत्तामपि परिव्रज्यां, त्यक्ष्यन्ति च कुसङ्गतः ॥५०॥
विरलाः पालयिष्यन्ति, कुसङ्गेऽपि व्रतं खलु ।
गजस्वप्नफलं चेदं, कपिस्वप्नफलं त्वदः ॥५१॥

---

तुलना– * **चलपासाएसु गया, चिट्ठंति पडंतएसु वि ण णिंति ।
णिंतावि तहा केई, जह तप्पडणा विणस्संति ॥८१७॥
विरलतरा तह केई, जह तप्पडणावि णो विणस्संति ।
एसो सुमिणो दिट्ठो, फलमेत्थं सावगा णेया ॥८१८॥**
विविहोवद्दवबहुला, चलंतसुहिसयणचित्तसंजोगा ।
चलपासायसमा खलु , गिहवासा राय ! होहिंति ॥१॥
सण्णायगुणगणड्ढा, परदुद्धरिसा गय व्व सड्ढावि ।
तेसु अइलुद्धगिद्धा विवेयकलियावि बाहिंति ॥२॥
विसयाण कडुविवागं, अणिच्चयं जीयजोव्वणधणाण ।
जाणंतावि हु मोहा, निक्खमिउं नो तरिहिंति ॥३॥
विहडंतम्मि वि विहवे, पुणो दुरासाए मोहिया धणियं ।
वेरग्गविप्पमुक्का, दुक्करकम्माइं काहिंति ॥४॥
निक्खमिऊण य अण्णे, घरसयणधणेसु निच्चपडिबद्धा ।
नीयावासविहारी, दट्ठूण य तव्विवत्तीओ ॥५॥
पडिबंधदोसओ च्चिय, मंतोसहिमूलकम्ममाईसु ।
सावज्जेसु पसत्ता, पायं होहिंति चुयधम्मा ॥६॥
विरलाओ दूसमाए वि, पडिबंधविवज्जिया जियकसाया ।
होहिंति सुद्धचरणा, एसत्थो पढमसुविणस्स ॥७॥ इति उपदेशपदे ।

१. विवेकयोगाद्भूत्वापि B H । विवेकवतोङ्गिनो भूत्वा–G । २. आत्तां दीक्षां A । आप्तामपि परिव्रज्यां–G, H, J, L । आत्तामपि परिव्रज्यां–F, I ।

D:\chandan/new/kalp-1/pm5\3rd proof

## २. वानरस्वप्नफलम् –

*प्रायः कपिसमा लोलपरिणामाऽल्पसत्त्वकाः ।
आचार्यमुख्याः गच्छस्थाः, [१]प्रमादं गामिनो व्रते ॥५२॥
ते विपर्यासयिष्यन्ति, धर्मस्थानितरानपि ।
भाविनो विरला एव, धर्मोद्योगपराः पुनः ॥५३॥
धर्मश्लथेषु ये शिक्षां, प्रदास्यन्त्यप्रमादिनः ।
ते तैरुपहसिष्यन्ते, ग्राम्यैर्ग्रामस्थपौरवत् ॥५४॥
इत्थं प्रवचनाऽवज्ञाऽतः परं हि भविष्यति ।
प्लवङ्गमस्वप्नफलमिदं, जानीहि पार्थिव ! ॥५५॥

---

तुलना- * **बहुवाणरमज्झगया, तव्वसहा असुइणो विलिंपंति ।**
**अप्पाणं अण्णे वि य, तहाविहो लोगहसणं च ॥८१९॥**
**विरलाणमलिंपणया, तदण्णखिंसा ण एयमसुइ त्ति ।**
**सुविणोयं एयस्स उ विवाग मो णवरि आयरिया ॥८२०॥**

'बहुवानरेत्यादि' - चलचित्ताण सहावा, गुणतरुविहरेसु निच्चमथिराण ।
जइ वानराण वसहा, आयरियाई भविस्संति ॥१॥
आहाकम्मुवभोगो, पडिबंधो गेहसयणसड्ढेसु ।
उवहिम्मि गाढमुच्छा, परोप्परासंखडं असई ॥२॥
संजमविरुद्धचेट्ठा, सव्वा दव्वत्थयाइया अहवा ।
असुई तेणप्पाणं, लिंपिस्संती तह परं पि ॥३॥
तहियं पवत्तयंता, पक्खग्गाहेण वा विसंवाए ।
एवं ते हासपयं, परतित्थीणं पि होहिंति ॥४॥
काहिंति तहा खिंसं, अन्नेसिं तप्पवित्तिविमुहाणं ।
पन्नविया भणिहंती, न हु दोसो एत्थ सुणहित्थं ॥५॥
कलहेमो नीइकए, दव्वत्थओ तित्थउन्नइनिमित्तं ।
आहाकम्मेण विणा, न गउरवं गुरुजणे होई ॥६॥
अक्खरसिक्खावणओ, किसिआरंभो न होइ सड्ढाणं ।
वेज्जयवेज्जाईहिं, सावयरक्खा तओ तेहिं ॥७॥
एवं तु अहाच्छंदा, पायं होहिंति निग्गुणा गुरुणो ।
विरला उ सुद्धसीला, बीययसुविणस्स एसत्थो ॥८॥ इति उपदेशपदे ।

१. प्रमादगामिनो A, B, H, I ।

D:\chandan/new/kalp-1/pm5\3rd proof

## ३. क्षीरवृक्षस्वप्नफलम् —

*क्षीरद्रुतुल्याः सुक्षेत्रे, दातारः शासनार्चकाः ।
श्रावकास्ते तु रोत्स्यन्ते, लिङ्गिभिर्वञ्चनापरैः ॥५६॥
तेषां च प्रतिभास्यन्ति, सिंहसत्त्वभृतोऽपि च ।
महर्षयः सारमेया, इवासारमतिस्पृशाम् ॥५७॥
आदास्यन्ते सुविहितविहारक्षेत्रपद्धितम् ।
लिङ्गिनो बब्बूलसमाः, क्षीरद्रुफलमीदृशम् ॥५८॥

---

तुलना– * **खीरतरुसुहछाया, तेसिमहो सीहपोयगा बहुगा ।**
**चिट्ठंति संतरूवा, लोगपसंसा तहाहिगमो ॥८२१॥**
**ते सिंखडा उ पायं, सुणगा तरुवणलय त्ति पडिहासो ।**
**एसो सुमणो दिट्ठो, फलमेत्थं धम्मगच्छ त्ति ॥८२२॥**

'खीरतरू इत्यादि' इह खीरतरुसरिच्छा, सुसावगा पवयणुन्नइपसत्ता ।
गुरुवच्छला सुभणिया, उदारचित्ता महासत्ता ॥१॥
तण्णिस्साछायासुं , पसंतरूवा वसंति मुणिसीहा ।
उवसग्गपरीसहसज्झसुज्झिया सुट्ठु सोंडीरा ॥२॥
लद्धपसंसा लोए, अहो इमे एत्थ पुन्नजम्माणो ।
अक्खलिओऽहिगमो, वत्थपत्तपाणासणाईण ॥३॥
सुद्धाणुट्ठाणवसा, निव्वाणफलप्पसाहगा पुव्विं ।
ते दूसमाणुभावा, होहिंति पमाइणो पायं ॥४॥
काहिंति संखडाई, न उज्जमिस्संति चरणकरणेसु ।
तो ते अन्ने वि मुणी, होहिंति अणाइया लोए ॥५॥
होहिंति य पाएणं, दंसणबज्झ व्व साहुपडिणीया ।
सड्ढावि दुव्वियड्ढा, नडिया कुग्गाहमाईहिं ॥६॥
तो दाणधम्मबुद्धिं, विहणंता अप्पणो परेसिं च ।
वट्टिस्संति न पायं उवग्गहे तदुचियाणं पि ॥७॥
णाणलवबद्धगव्वा उत्तरपडिउत्तरेहिं गुरुवग्गं ।
दुव्वयणकंटियाहिं तवहिंति परोक्खपच्चक्खं ॥८॥

एवं बब्बूलसमा होहिंति । - इति उपदेशपदे ।

D:\chandan/new/kalp-1/pm5\3rd proof

## ४. काकस्वप्नफलम् –

*धृष्टस्वभावा मुनयः, प्रायो धर्मार्थिनोऽपि हि ।
रंस्यन्ते न हि गच्छेषु, दीर्घिकाम्भःस्विव[१] द्विकाः[२] ॥५९॥
ततोऽन्यगच्छकैः[३], सूरिप्रमुखैर्वञ्चनापरैः ।
मृगतृष्णानिभैः सार्धं, चलिष्यन्ति जडाशयाः ॥६०॥
न युक्तमेभिर्गमनमिति तत्रोपदेशकान् ।
बोधिष्यन्ते नितान्तं ते, काकस्वप्नफलं ह्यदः ॥६१॥

---

तुलना– * **धंखा वावीय तडे, विरला ते उण तिसाए अभिभूया ।
पुरओ मायासरदंसणेण तह संपयट्टंति ॥८२३॥
केणइ कहणा णिसेहे, सद्दहणा पायसो गम विणासं ।
सुमिणो यं एयस्स उ, विवाग मो मूढधम्मरया ॥८२४॥**

'धंखेत्यादि' – इह तुच्छणाणसलिला, पयईए संकडा अगंभीरा ।
वावि व्व दुरवगाहा, गुरुणो होहिंति णरनाह ! ॥१॥
धंख व्व तयासन्ने, अमहिच्छा चलमणा अथिरदिट्ठी ।
समणोवासगजइणो, सिढिलायारा चरिस्संति ॥२॥
तेसिं च केइ सविसेसधम्मतण्हालुया अविन्नाणा ।
कालाणुरूवकिरियं पि, नियगुरुं निग्गुणं गणिउं ॥३॥
मायण्हियासमेसुं , नियमइकप्पियगुणेसु विविहेसु ।
संजायभत्तिराया, पासत्थाईसु गमिहिंति ॥४॥
मज्झत्थजाणगेहिं, पण्णवियावि हु असद्दहाणे उ ।
ठाहिंति ते य पायं, मरिहंति य धम्मजीएण ॥५॥
गुरुजणजणियावण्णा, सड्ढावि कुतित्थियाइजोएण ।
दंसणजीयविउत्ता, भमिहिंति भवन्नवे घोरे ॥६॥
अप्पा विवेयकलिया, वाविसमाण वि गुरूण आणाए ।
साहिस्संति सुधम्मं चउत्थसुविणप्फलं एयं ॥७॥ – इति उपदेशपदे ।

१. दीर्घिकाम्भसि बर्हिका B, H, J, L । ०म्भसीव द्विका A, I । २. काका इत्यर्थः । ३. ततोऽन्यगच्छिकैः A, F, I, J, L ।

## ५. सिंहस्वप्नफलम् –

*सिंहतुल्यं जिनमतं, जातिस्मृत्या[1]द्यनुज्झितम् ।
विपत्स्यतेऽस्मिन् [2]भरतवने धर्मज्ञ[3]वर्जिते ॥६२॥
न कुतीर्थिकतिर्यञ्चोऽभिभविष्यन्ति जातुचित् ।
स्वोत्पन्नाः कृमिवत्, किं तु लिङ्गिनोऽशुद्धबुद्धयः ॥६३॥
लिङ्गिनोऽपि प्राक्प्रभावात्, श्वापदाभैः कुतीर्थिकैः ।
न जात्वभिभविष्यन्ते, सिंहस्वप्नफलं ह्यदः ॥६४॥

---

तुलना– * **सीहो वणमज्झम्मी, अणेगसावयगणाउले विसमे ।**
**पंचत्तगओ चिट्ठइ, ण य तं कोई विणासेइ ॥८२५॥**
**तत्तो कीडगभक्खणपायं उप्पायदट्ठुमण्णे वि ।**
**सुमिणो त्ति इमस्सत्थो, पवयणनिद्धंधसाईया ॥८२६॥**

'सीहो इत्यादि' – अइसयणाणपरक्कमवित्तासियविविहकुमयमयनिवहो ।
कुग्गाहगयपणासी, सीहसमो एस जिणधम्मो ॥१॥
बहुविहलद्धिजुएहिं, देविंदाईहिं वंदियपएहिं ।
साहूहिं परिग्गहिओ, परिभूओ णेय केणावि ॥२॥
कुमयवणसंडगुविले, कुदेसणावल्लिभग्गमग्गम्मि ।
कुग्गाहगत्तपउरे, भरहारण्णम्मि दुसमाए ॥३॥
सो मयसीहसरिच्छो, होही वोच्छिन्नअइसयप्पसरो ।
तह वि हु पुव्वगुणेहिं, न हु गम्मो खुद्दलोयस्स ॥४॥
होहिंति कीडयसमा, संपागडसेविणो दुरायारा ।
एत्थेव य जइगिहिणो, पवयणनिद्धंधसा खुद्दा ॥५॥
छक्कायनिरणुकंपा, कयविक्कयमंतविज्जयाईहिं ।
अत्थज्जणेक्करसिया, लोयावज्जणपरा पावा ॥६॥
अन्ने वि आइसद्दा, अवन्नावाउज्जुया मुणिजणस्स ।
समइविगप्पियकिरिया, तवस्सिणो जे अगीयत्था ॥७॥
एएहिं जणियछिद्दं, दट्ठुं अन्ने वि तव्विघायत्थं ।
वट्टिस्संति गयभया, पंचमसुविणस्स फलमेयं ॥८॥ – इति उपदेशपदे ।

१. ०द्यसूचितम् A, I । ०दिकोज्झितम् B, J, H । २. भरतावनौ A, I । ३. ०वासिते B, J, H ।

D:\chandan/new/kalp-1/pm5\3rd proof

## ६. पद्मस्वप्नफलम् –

*[1]अब्जाकरेष्वम्बुजानि, सुग[2]न्धीनि न देहिनः ।
धार्मिका न भविष्यन्ति, सञ्जाताः [3]सुकुलेष्वपि ॥६५॥
अपि धर्मपरा [4]भूत्वा, भविष्यन्ति कुसङ्गतः ।
ग्रामावकरकोत्पन्नगर्दभाब्जवदन्यथा ॥६६॥
कुदेशे कुकुले जाता, धर्मस्था अपि भाविनः ।
हीना इत्यनुपादेयाः, पद्मस्वप्नफलं ह्यदः ॥६७॥

---

तुलना– * **पउमागरा अ पउमा, गद्दभगजुया य चत्तणियरूवा ।**
**उक्कुरुडियाए पउमा, तत्थ वि विरला तहारूवा ॥८२७॥**
**तेवि य जणपरिभूया, सकज्जणिप्फायगा ण पाएण ।**
**सुमिणसरूवं वीणणमिमस्स धम्मम्मि पच्चत्ता ॥८२८॥**

'पउमागरा इत्यादि' – एत्थ य सहावविमलाणि, सीलसुरभीणि अप्पसत्ताणि ।
सिरधारणोचियाइं, तियसाण वि पउमकप्पाइं ॥१॥
धम्मियजणपत्ताइं, तयागरा उग्गभोगमाईणि ।
उत्तमकुलाणि अहवा, सागेयपुराइनयराणि ॥२॥
दूसमवसेण होही न, धम्मपत्ताण तेसु उप्पत्ती ।
गद्दभगविब्भमाणं, सबलसहावाण वा भावो ॥३॥
ताणि वि न नियं रूवं, धरिहिंति जहुत्तलिंगमेत्तं पि ।
उक्कुरुडियासरिच्छं, पंतकुला अहव पच्चंता ॥४॥
धम्मत्थिनरा तेसुं , वक्कजडा मंदबुद्धिणो पायं ।
होहिंति अप्पछंदा, गुरुलाघवणाणपरिहीणा ॥५॥
थेवा पसंतरूवा, गुरुजणबहुमाणिणो असढसीला ।
मइमंतो सक्किरिया, विरियणुरूवं जइस्संति ॥६॥
सुहसीलथूलमइणा, जणेण पाएण ते वि परिभूया ।
साहिस्संति न सुगइं, अणुसइगव्वाइदोसेहिं ॥७॥
एत्थम्मि अप्पतरगा, सद्धम्माराहगा भविस्संति ।
छट्ठसुविणस्स एसो, परूविओ तुम्ह भावत्थो ॥८॥ – इति उपदेशपदे ।

१. अथाकरे B । २. ०न्धीनि च A, B, F, H, I । ३. स्वकुलेष्वपि–A, F, G, I । ४. भूता A, F, I ।

D:\chandan/new/kalp-1/pm5\3rd proof

## ७. बीजस्वप्नफलम् –

*[1]यथा [2]फलायाबीजानि, बीजबुद्ध्योखरे वपेत् ।
तथा वप्स्यन्त्यकल्पानि, कुपात्रे कल्पबुद्धितः ॥६८॥
[3]यद्वा घुणाक्षरन्यायात् , पुरा कोऽपि कृषीवलः ।
अबीजान्तर्गतं बीजं, वपेत् क्षेत्रे निराशयः ॥६९॥
अकल्पान्तर्गतं कल्पमज्ञात्वा श्रावकास्तथा ।
[4]पात्रे दानं करिष्यन्ति, बीजस्वप्नफलं ह्यदः ॥७०॥

---

तुलना- * **बीएसु करिसगो कोई, दुव्वियड्ढो त्ति जत्तओ किणइ ।**
**बीजे त्ति अबीजे वि य, पइरइय तहा अखित्तेसु ॥८२९॥**
**अवणेइय तं मज्झे, विरलं बीयं समागयंपीहं ।**
**सुमिणे त्ति इमस्सत्थो, विण्णेओ गमणपत्ताई ॥८३०॥**

'बीएसु इत्यादि' – किसिकम्मसमो सुरनरभोगफलो सुद्धदाणधम्मुत्थ ।
करिसगसमा य पहुणो, छित्ताइं सुद्धपत्ताइं ॥१॥
बीयाणि पुणो णायागयाओ आहारउवहिवसहीओ ।
उग्गमउप्पायणएसणाहिं णियमा विसुद्धाइं ॥२॥
दुसमाए दायारो, सबुद्धिबहुमाणिणो अगीया य ।
दुवियड्ढकरिसगा इव, न सुद्धदाणे रमिस्संति ॥३॥
धरिहिंति पक्खवायं, आहाकम्माइ दोसदुट्ठम्मि ।
पउरम्मि मणुन्नम्मि, दाणाम्मि अ बीयकप्पम्मि ॥४॥
वियरिस्संति तयं पुण, छक्कायविराहणापसत्तेसु ।
निक्कारणपडिसेविसु , ऊसरसरिसेसुं पत्तेसु ॥५॥
सुद्धं पि घयगुलाई, काउं ओगाहिमाइरूवेण ।
दाहिंति तुच्छबीया, मिच्छावच्छल्लतत्तिल्ला ॥६॥
अहव तिलभूमिगावीजुत्तहलाईणि पावहेऊणि ।
पायं दाहिंति जणा, सारंभाऽबंभयारीणं ॥७॥
सुद्धविवेगा विरला, जहागमं दाणधम्मववहारे ।
वट्टिस्संति सरूवं, सत्तमसुविणस्स निद्दिट्टं ॥८॥ इति उपदेशपदे ।

१. तथा B । २. फलाद्य०–H, J । ३. यथा A, B, E, F, G, H, I, J, L । ४. पात्रदानं B ।

D:\chandan/new/kalp-1/pm5\3rd proof

## ८. कुम्भस्वप्नफलम् –

*क्षमादिगुणपद्माङ्काः, सुचरित्राम्बुपूरिताः ।
रहस्थाः भाविनः कुम्भाः इव स्तोका महर्षयः ॥७१॥
श्लथाचारचरित्राश्च, कलशा मलिना इव ।
यत्र तत्र भविष्यन्ति, बहवो लिङ्गिनो पुनः ॥७२॥
समत्सराः करिष्यन्ति, कलहं च महर्षिभिः ।
उभयेषामपि तेषां, साम्यं लोके भविष्यति ॥७३॥

---

तुलना- * **कलसा य दुहा एगे, पासाओवरि सुहा अलंकरिया ।**
**अण्णे पुण भूमीए, वाडाओ गालिसयकलिया ॥८३१॥**
**कालेण दलणपागं, समभंगुप्पाय दट्ठुमप्पाणं ।**
**सुमिणसरूवं राया, अबंभसाहू य एसत्थो ॥८३२॥**

'कलसा येत्यादि' - कम्ममलहरणपच्चलचलणजलाधारभूयनेवच्छा ।
दुसमद्धाए जइणो, कलस व्व दुहा भविस्संति ॥१॥
एगे विसुद्धसंजमपासाओवरि सुहा जणाणंदा ।
उवसमपउमपिहाणा, तवसिरिसिरिखंडचच्चिक्का ॥२॥
विविहगुणकुसुममालालंकियमंगल्लभूइसत्तिल्ला ।
सुहगुरुआणाथालीसु , संठिया णाणकंतिल्ला ॥३॥
अन्ने पमायमहियलखुत्तंगा भग्गसुद्धवयकन्ना ।
अयसोगालिविलित्ता, पायडअइयारपंकंका ॥४॥
ते वि पुण कालदोसा, उग्घाडमुहे वि भासकिरियाए ।
दट्ठूण उवरिमावि हु , तेसिं दोसे पयासेंता ॥५॥
खावेंता निययगुणे, कलहंता गरुयमच्छरामरिसा ।
टलिऊण संजमाओ, आणाथालीसु परिभट्ठा ॥६॥
पडिहिंति ताण उवरिं, तुल्लगुणट्ठाणजोगओ पायं ।
दोग्गइ अबोहिरूवं, भंगं च समं लहिस्संति ॥७॥
उप्पइऊणं विरला, सुगइं जाहिंति जे उ चरणजुया ।
अट्ठमसुमिणस्स इमो, भणिओ नरनाह ! गब्भत्थो ॥८॥
उप्पाय दट्ठुमप्पाणमेयवक्कस्स पुण इमो अत्थो ।
अप्पाणं थोवाणं उप्पाओ राइणा...(णेओ ?) ॥९॥

गाथाक्षरार्थस्तु भाष्यानुसारेण विज्ञेय इति ।

गीतार्था लिङ्गिनश्च स्युः, साम्येन व्यवहारिणः ।
जनेन [1]ग्रहिलेनेवाऽग्रहिलो ग्रहिलो नृपः ॥७४॥

**कुवृष्टिन्यायः –**

''तथा हि **पृथिवीपुर्यां, पूर्णो** नाम महीपतिः ।
**सुबुद्धि**स्तस्य चामात्यो, निधानं बुद्धिसम्पदः ॥७५॥
कालं तेनागमिष्यन्तं, पृष्टोऽन्येद्युः **सुबुद्धि**ना ।
**लोकदेवो**ऽभिधानेन, नैमित्तिकवरोऽवदत् ॥७६॥
मासादनन्तरं मेघो, वर्षिता तज्जलं पुनः ।
यः पास्यति स सर्वोऽपि, ग्रहग्रस्तो भविष्यति ॥७७॥
कियत्यपि गते काले, सुवृष्टिश्च भविष्यति ।
पुनः सज्जाः भविष्यन्ति, तत्पयःपानतो जनाः ॥७८॥
राज्ञे मन्त्री [2]तदाचख्यौ, [3]राजाऽप्यानकताडनात् ।
आख्यापयज्जने वारिसङ्ग्रहार्थ[4]मथाखिले ॥७९॥
सर्वोऽपि हि तथा चक्रे, ववर्षोक्तेऽह्नि चाम्बुदः ।
कियत्यपि गते काले, सङ्गृहीताम्बु निष्ठितम् ॥८०॥

---

इत्थं लोकोत्तरे दुष्षमायां निगुणं बहुजनमाश्रित्य ज्ञातान्यभिहितानि, लोकेऽपि निजशैल्या कलियुगमाश्रित्य ज्ञातान्तराणि परैः प्रतिपादितानि दृश्यन्ते ।

**कूवावाहाजीवण तरुफलवह गाविवच्छिधावणया ।**
**लोहिविवज्जयकलमल, सप्पगरुडपूजपूजाओ ॥८३३॥**

'कूपेत्यादि' कूपावाहाजीवनं कूपेनावाह उपजीविष्यते । तथा–

तरुफलवहंति तरूणं, उवासगावि दुसमाए ।
पडिकूलाणावि तेसिं इयरे काहिंति अणुवित्तिं ॥१०॥
गुणरहियअप्पसत्ता, पायडदोस त्ति दीणयं पत्ता ।
जुत्तमजुत्तं तेसिं, बहु मन्निस्संति ववहारं ॥११॥
बहुकम्मरया एवं, सुणगा होहिंति धम्मगच्छावि ।
थोवा पुव्वुत्तगुणा, उभए वि य तइयसुविणत्थो ॥१२॥ – इति उपदेशपदे ।

१. ग्रथिलेनेवाऽग्रथिलो ग्रथिलो B, E, F, H, I, J, L । २. तदाचख्ये B, H, J । ३. राजाऽथानक A, G, I । ४. ०मथादिशत् E, F, G, H, J, L ।

D:\chandan/new/kalp-1/pm5\3rd proof

अक्षीणसङ्ग्रहाम्भस्कौ, राजामत्यौ तु[1] तौ विना ।
नवाम्बु लोकाः सामन्तप्रमुखाश्च पपुस्ततः ॥८१॥
तत्पानात् [2]ग्रहिलाः सर्वे, ननृतुर्जहसुर्जगुः ।
स्वैरं चिचेष्टिरेऽन्यत्र, विना तौ राजमन्त्रिणौ ॥८२॥
राजामात्यौ विसदृशौ, सामन्ताद्या निरीक्ष्य ते ।
मन्त्रयाञ्चक्रिरे नूनं, ग्रहिलौ राजमन्त्रिणौ ॥८३॥
[3]अस्मद्विलक्षणाचाराविमकावपसार्य तत् ।
अपरौ स्थापयिष्यामः स्वोचितौ राजमन्त्रिणौ ॥८४॥
मन्त्री ज्ञात्वेति तन्मन्त्रं, नृपायाख्यन्नृपोऽवदत् ।
आत्मरक्षा कथं कार्या, तेभ्यो वृन्दं हि राजवत् ॥८५॥
मन्त्र्युचे [4]ग्रहिलीभूय, स्थातव्यं [5]ग्रहिलैः सह ।
त्राणोपायो न कोऽप्यन्य, इदं हि समयोचितम् ॥८६॥
कृत्रिमं [6]ग्रहिलीभूय, ततस्तौ राजमन्त्रिणौ ।
तेषां मध्ये ववृताते, रक्षन्तौ निजसम्पदम् ॥८७॥
ततः सुसमये जाते, शुभवृष्टौ नवोदके ।
पीते सर्वेऽभवन्, स्वस्था मूलप्रकृतिधारिणः ॥८८॥
एवं च दुःषमाकाले, गीतार्था लिङ्गिभिः सह ।
सदृशीभूय [7]वर्त्स्यन्ते भावि[8]सुसमयेच्छवः'' ॥८९॥
इति श्रुत्वा स्वप्नफलं, **पुण्यपालो** महामनाः ।
प्रबुद्धः प्राव्रजत् तत्र, क्रमान्मोक्षमियाय च ॥९०॥

**भाविकालनिरूपणम् –**

इत्युक्तवन्तं श्री**वीरं, गौतमो** [9]गणधारकः ।
'पप्रच्छ केवलादित्यं, किं कुत्रोच्छेदमेष्यति' ॥९१॥[10]

---

१. च B । २. ग्रथिलाः B, F, J, L । तत्पानादिव ग्रथिलाः G । ३. असौ श्लोकः G मध्ये नास्ति । ४. ग्रथिलीभूय B । ५. ग्रथिलैः B । ६. ग्रथिलीभूय B । ७. वत्स्यन्ति A, C, E, F, G, I, L । वर्स्यन्ति-J । ८. स्वसमये० A, C, I । (७२) ९. गणभृद्वरः । १०. ९१ तथा ९२ मध्ये –

अथेन्द्रभूतिः श्रीवीरं नत्वाऽप्राक्षीत् कृताञ्जलिः ।
एष्यत्कालस्वरूपं तु शलाकापुरुषान्वितम् ॥१०३॥ अयं श्लोकः, केवलं A, I मध्येऽस्ति ।

D:\chandan/new/kalp-1/pm5\3rd proof

मम निर्वाणतो मुक्तिं, वर्षैर्द्वादशभिः स्फुटम् ।
**गौतमो**ऽथ **सुधर्मा** हि, गन्ता विंशतिवत्सरैः ॥९२॥
वत्सराणां चतुःषष्ट्या, मुक्तिं **जम्बू**र्गमिष्यति ।
उच्छित्तिं केवलज्ञानं, समं तेनैव यास्यति ॥९३॥
[1]उत्सन्ने केवले भावी, न मनःपर्ययोऽपि हि ।
[2]पुलाकलब्धिश्च न वाऽवधिश्च परमो न हि ॥९४॥
क्षपकोपशमश्रेण्यौ न च, नाऽऽहारकं वपुः ।
नैवाभू[3]ज्जिनकल्पोऽपि संयमत्रितयं तथा ॥९५॥[4]

---

१. उच्छिन्ने A, D, C-२११ । २. पुलाकलब्धिर्भविता न पुनः परमावधिः ॥ A, न चावधिः ॥२१०॥ C । ३. जिनकल्पो न हि न हि B, C ॥२११॥ ४. ९५ तः ९६ मध्ये A मध्ये ।

अस्मन्निर्वाणतो यश्चतुर्वर्षैः सप्ततिभिर्ध्रुवम् ।
अस्मत् स्वयम्भवं बिम्ब**मुपकेशाभि**धे पुरे ॥१०३॥
प्रासादे **हयुहड**श्रेष्ठी कारिते स्थापयिष्यति ।
श्रीम**द्रत्नप्रभाचार्य** प्रभावकशिरोमणिः ॥१०४॥

इमौ द्वौ संस्कृतश्लोकौ तथा च एते प्राकृतसप्तश्लोकाः A मध्ये सन्ति, अन्यत्र न सन्ति ।

**सिज्जंभवे**ण विहियं दसयालिअट्ठनवइ(९८)वरिसेहिं
सत्तरिसए (१७०) अ थक्का चउपुव्वा **भद्दबाहु**म्मि ॥१०५॥
तुट्टिंसु **थूलभद्दे** दोसयपनरेहिं (२१५) पुव्वअणुओगो
सुहुममहापाणाणि य, आइमसंघयणसंठाणा ॥१०६॥
पणचुलसीइसु (५८४) **वइरे** दसपुव्वा अद्धकीलिसंघयणं
छस्सोलेहि (६१६) अ थक्का **दुब्बल**ए सड्ढनवपुव्वा ॥१०७॥
छव्वाससएहिं नवुत्तरेहिं (६०९) तइआ सिद्धिं गयस्स **वीरस्स** ।
**रहवीरपुरे** नयरे खमणा पाखंडिआ जाया ॥१०८॥
तह **गद्दभिल्ल**रज्जस्स, छेअगो **कालगा**यरिओ
तेवन्नचउस्सएहिं (४५३) गुणसयकलियो पहाजुत्तो ॥१०९॥
तेणउअनवसएहिं (९९३) समइक्कं तेहिं **वद्धमाणा**ओ
पज्जोसवणचउत्थी, **कालग**सूरीहि तो ठविआ ॥११०॥
षड्भिर्वर्षशतैर्विंशत्यधिकैर्मम मोक्षतः ।
पुरादिषु गृहे वासं श्री**आर्यर्षिः** करिष्यति ॥१११॥

[१]**जम्बू**शिष्यः **प्रभव**श्च, भविता सर्वपूर्वभृत् ।
[२]**शय्यम्भव**स्तु तच्छिष्यो, द्वादशाङ्गी भविष्यति ॥९६॥
**दशवैकालिक**ग्रन्थं, स्रक्ष्यत्युद्धृत्य स श्रुतात् ।
तस्य शिष्यो **यशोभद्रो,** भविता सर्वपूर्वभृत् ॥९७॥
**सम्भूत-भद्रबाहू** च, तच्छिष्यौ सर्वपूर्विणौ ।
मम निर्वाणतो वर्षशतसप्ततिके गते ॥९८॥
[३]ततो **भद्रबाहु**र्गणधरो देवलोकं गमिष्यति ।
**स्थूलभद्रो**ऽथ **सम्भूता**ऽन्तेवासी सर्वपूर्वभृत् ॥९९॥
[४]**शकटाला**त्मजः शीललीलोन्मालिमहायशाः ।
अर्थतोऽन्त्यचतुःपूर्वव्युच्छेदोऽस्मिन् भविष्यति ॥१००॥
[५]**महागिरि-सुहस्त्या**द्या, **वज्रा**न्ता दशपूर्विणः ।
ततः परं भविष्यन्ति मत्तीर्थस्य प्रभावकाः ॥१०१॥
[६]षड्भिर्वर्षशतैर्विंशत्यधिकैर्मम मोक्षतः ।
ग्राममध्ये गृहेवासं करिष्यन्त्या**ऽऽर्यसूरयः** ॥१०२॥
[७]त्रिनवत्यधिकैर्वर्षशतैर्नवमितैस्तथा ।
आचार्या **कालिका**ह्वाना भविष्यन्तीन्द्रवन्दिताः ॥१०३॥

---

**वीर**जिणा पुव्वगयं सव्वं पि गयं सहस्सवरिसेहिं ।
सुन्नमुणिवेअजुत्तो (४७०) **विक्कम**कालो उ जिनकाला ॥११२॥

१. नवतितमतः नवनवतितमपर्यन्तं श्लोकाः A, C मध्ये न सन्ति । D प्रतौ गद्यपद्यरूपेण पाठभेदः तत्स्थले दृश्यते । A मध्ये १०२ श्लोकस्यान्तिमं चरणं "पुरादिषु गृहेवासं श्री आर्यर्षिः करिष्यति," इति दृश्यते । २. ०भवोऽपि D । ३. ततो **भद्रबाहु**गणधरः स्वर्गे गतः । D । ४. H, B अतिरिक्तप्रतिमध्ये श्लोकोऽयं नास्ति । ५. अर्थतः, **महागिरिः** E, F, G, H, I, J, K । ६. षड्वर्षशतैर्विंशत्यधिकैः श्री**महावीर**निर्वाणात् गृहे ग्रामे वासः **आर्यसूरिः** करिष्यति D । ७. J, L मध्ये एवं दृश्यते-

चतुःशतेषु वर्षाणां, गतेषु सप्ततावपि ।
भूपति**विक्रमादित्यो,** मन्निर्वाणाद्भविष्यति ॥१॥
**उज्जयिन्या** प्रभुः सोऽपि, मन्त्रसिद्धो महीपतिः ।
कृत्वाऽनृणां भुवं, स्वस्य वत्सरं वर्त्तयिष्यति ॥२॥

[1]ते च पर्युषणापर्व चतुर्थ्यां पञ्चमीदिनात् ।
कारणादानयिष्यन्ति सर्वाचार्यानुमाननात् ॥१०४॥
सप्तत्या सहिते वर्षचतुःशतमिति क्रमात् ।
**विक्रमादित्य** इत्याख्यख्यातो राजा भविष्यति ॥१०५॥
**उज्जयिन्याः** प्रभुः सोऽपि, मन्त्रसिद्धो [2]हि विक्रमः ।
कृत्वाऽनृणां भुवं, स्वस्य वत्सरं वर्त्तयिष्यति ॥१०६॥
[3]पञ्चत्रिंशत् [4]समधिके वत्सराणां शते ततः ।
**उज्जयिन्यां** शकाः स्वस्य वर्त्तयिष्यन्ति वत्सरम् ॥१०७॥
पञ्चाशीत्यधिकैर्वर्षशतैः [5]पञ्चभिर्विक्रमात् ।
महाप्रभावकः सूरि**र्हरिभद्रो** भविष्यति ॥१०८॥
सत्सप्तत्यधिकैर्वर्षशतैर्द्वादशभिर्जनाः ।
युगप्रधानो भविता, **बप्पभट्टि**र्मुनीश्वरः ॥१०९॥
**आम**भूपस्तदादेशान्मद्बिम्बं **गोप**पर्वते ।
कारयिष्यति सार्धाभिस्तिसृभिः स्वर्णकोटिभिः ॥११०॥[6]
*अस्मन्निर्वाणतो वर्षशतैः षोडशभिः पुनः ।
नवषष्टिश्च यास्यन्ति **हेमसूरि**र्भविष्यति ॥१११॥

---

तथा E, F, G मध्ये त्वेवं दृश्यते -

चतुःशतसप्तत्यधिके **विक्रमादित्य उज्जयिन्या** प्रभुः सोऽपि मन्त्रसिद्धो महीपतिः ॥१॥

श्लोकोऽयं केवलं B, H मध्येऽस्ति ।

१. श्लोकोऽयं केवलं H, B मध्ये अस्ति । २ महीपतिः B, D । ३. पञ्चविंशत् D । ४. समधिकैः B । ५. पञ्चभिरद्भुतः । **विक्रमानेहस**सूरि B, H । पञ्चभिः विक्रमकालाद् **हरि-भद्र**सूरिर्महाप्रभावको भविष्यति ॥ D । ६. ११०-१११ मध्ये श्लोकद्वयमिदमुपलभ्यते-

शतैर्नवोत्तरैः षड्भिः, वर्षाणां मम निवृत्तेः ।
भाविन्याशाम्बरोत्पत्ति**रथवीरा**भिधे पुरे ॥१॥ D, H

छव्वाससएहिं नवुत्तरेहिं तया सिद्धिं
गयशरीरस्स बोडियाण, दिट्ठि **रहवीरपुरे** समुप्पन्ना ॥२॥ D, E, F, J, L.

तुलना- * पुन्ने वाससहस्से सयम्मि वरिसाण नवनवई ।
काले एम्हाहि **कुमार**नरिंदो तह **विक्कम**रायसारिच्छो ॥१॥ B, H.

D:\chandan/new/kalp-1/pm5\3rd proof

भूपः **कुमारपाला**ख्यो, **हेमसूरि**गुरोर्गिरम् ।
निशम्य भविता श्राद्धः, **सम्प्रति**प्रतिमो गुणैः ॥११२॥
राजा **कुमारपालो**ऽथ, कारयिष्यति मेदिनीम् ।
उत्तुङ्गगिरिशृङ्गाभजिनप्रासादमण्डिताम् ॥११३॥[1]
भो भव्याः श्रूयतां सम्यक् पञ्चमारप्रभावतः ।
नाना भेदा भविष्यन्ति, ममापि खलु शासने ॥११४॥
मत्तीर्थे वर्त्तमानानां, मदेकागमपाठिनाम् ।
नानाविधानि व्रतिनां, भवितारो मतान्यहो ॥११५॥
[2]स्वाम्याख्यान्मम निर्वाणादतीतैर्वत्सरैस्त्रिभिः ।
सार्धाष्टमाससहितैः, पञ्चमारः प्रवेक्ष्यति ॥११६॥[3]

---

१. श्लोक११२ तथा ११३मध्ये G. L. प्रतयोः इमे चत्वारः श्लोकाः कथञ्चित् पाठभेदेन दृश्यन्ते –

राजा **कुमारपाला**ख्यः, **चौलुक्य**कुलचन्द्रमाः ।
भविष्यति महाबाहुः प्रचण्डाखण्डशासनः ॥१॥
स महात्मा दानयुतः धर्मवीरः प्रजा निजाम् ।
ऋद्धिं नेष्यति परमां पितेव परिपालयन् ॥२॥
पराक्रमेण धर्मेण दानेन च दयाऽऽज्ञया ।
अन्यैश्च पुरुषगुणैः सोऽद्वितीयो भविष्यति ॥३॥
स कौवेरीमातुरष्कमौद्रिमत्रिदशापगाम् ।
दक्षिणाविन्ध्यपश्चिमावार्धिं साधयिष्यति ॥४॥

२. श्लोकोऽयं F मध्ये नास्ति। ३. तथा ११६–११७ मध्ये चत्वारः प्राकृतश्लोकाः सन्ति–

कलहकरा डमरकरा, असमाहिकरा अनिव्वुइकरा य ।
होहिंति इत्थ समणा, दससु वि खित्तेसु सयराहं ॥१॥
ववहारमंततंताइएसु निच्चुज्जुआण य मुणीणं ।
गलिहंति आगमत्था, अत्थलुद्धाण तद्दियहं ॥२॥
उवगरणवत्थपत्ताइआण वसहीण सड्ढयाणं च ।
झुज्झिस्संति कएणं, जह नरवइणो कुडुंबीणं ॥३॥
बहवे मुंडे अप्पे समणा होहंति गुणसयाइन्ना ।
बलवंता मिच्छनिवा, अप्पबला हिंदुअनरिंदा ॥४॥ B, C, D मध्ये न सन्ति ।

D:\chandan/new/kalp-1/pm5\3rd proof

## कल्किस्वरूपम् –

[१]मन्निर्वाणाद् गतेष्वब्दशतेष्वेकोनविंशतौ ।
चतुर्दशाब्द्यां च **म्लेच्छ**कुले चैत्राष्टमीदिने ॥११७॥
विष्टौ भावी नृपः **कल्की,** स रुद्रोऽथ चतुर्मुखः ।
नामत्रयेण विख्यातः, **पाटलीपुर**पत्तने ॥११८॥

---

१. ११७ तथा ११८ श्लोकमध्ये अधो प्रदर्शितसंस्कृतगद्यभागः A मध्येऽस्ति–

एके त्वाहुः "श्री**वीरा**त् १९०२८ वर्षेषु पञ्चसु मासेषु च गतेषु **कल्की** भावी" इति ।

अम्हं निव्वाणाओ **गोयम** ! वासाण सहस्स दो एवं तह ।
विक्कमकालाओ पनरसतीसम्मि तस्संतो ॥

तत्पित्रादिजन्मसमयादि चैवम्– **पाटली**पुरे **यशगृहे यशोदा**कुक्षौ जयसंवत्सरे चैत्राष्टम्यां जयश्रीदिने रात्रिमध्याह्ने तस्यावतरणम् । ततस्त्रयोदशमासानन्तरं चैत्रशुक्लाष्टम्यां विष्टौ निशीथसमये मकरलग्ने वहमाने मङ्गलवारे, अश्लेषाप्रथमपादे राशिं नवभागीकृत्य षष्ट्यांशे कर्क्कस्थिते चन्द्रे ऐन्द्रयोगे चतुर्मुखस्य जन्म भविष्यति । स त्रिहस्तोच्चः । कपिलकेशलोचनस्तीक्ष्णस्वरः । अदृष्टपृष्टलाञ्छनो महविद्योद्धुरो । विशालहृदयो गुणशीलोज्झितः । ततस्तस्य जन्मतः पञ्चमीवर्षे जठरापत् । सप्तमे वैश्वानरापत् । एकादशमे महाद्रव्यसम्पत् । अष्टादशे वर्षे कार्त्तिकमासे शुक्लपक्षे प्रतिपदि शनौ स्वातिनक्षत्रे तुलस्थे चन्द्रे नन्दिदिने बवकरणे सिद्धवेलायां रावणमुहूर्त्ते महाराजरुद्रस्य पट्टाभिषेको भावी । तस्य तुरङ्गमो अदन्तः कुन्ती दुर्वाकः । खड्गो दैत्यसूदनः किरीटो मृगाङ्कः । पादकटके सूर्यशशिनौ । धवलगृहं त्रैलोक्यसुन्दरम् । बद्धस्वर्णदानतो । विक्रमसंवत्सरमुत्थापयित्वा स्वीयं संवत्सरं स्थापयिष्यति ।

ततः एकोनविंशे वर्षे **भरतार्द्धं** विग्रहाकुलं करिष्यति । सार्धविंशतितमे वर्षे **अर्बुद**-सत्क**खर्प्पर**राजदुहितृपाणिग्रहणं विधास्यति । ततोऽन्या राज्यो बहुतरा भविष्यन्ति । **दत्तविजयमुञ्जा पराजिता**ख्याः पुत्राः । ततो बृहत्**पाटलीपुरे कल्किनो** राजधानी भविष्यति । **पाटलीपुर**स्य **कल्किपुर**मिति नाम भावि । **दत्त**स्य राजधान्यां **राजगृह**स्य **दत्तपुर**मिति । **विजय**स्य राजधान्या **अणहिल्लपुरपाटणक**स्य **विजयपुरं** (नाम) चेति । **मुञ्जस्याऽवन्तिवर्धन**-देशमर्पयिष्यति । **अपराजित**स्य अपरं च देशं **कल्कि**राज्यसमये पृथिवी क्षत्रियाणां म्लेच्छानां च रुधिरेण स्नानं करिष्यति । तस्य भाण्डागारे नवनवतिस्वर्णकोट्यः । चतुर्दशसहस्रगजाः हस्तिनीनां सार्धचतुःशतानि सप्ताशीतिलक्षाश्वाः । पदातयः पञ्चकोट्यः । इतरजनसंख्या नास्ति । पञ्चासत्तमवर्षे वामजङ्घादक्षिणकुक्ष्योः प्रहारौ भविष्यतः । मन्निर्वाणाद् द्विवर्षसहस्रान्ते भाद्रशुक्लाष्टमी दिने रवौ ज्येष्ठाभे शक्रचपेटया पञ्चत्वं **कल्किनः** ॥ केवलः J प्रतौ पाठोऽयम-सम्पूर्णः कथञ्चित् पाठभेदेन दृश्यते ।

[१]तदा च **मथुरा**पुर्यामकस्माद्**रामकृष्ण**योः ।
निपतिष्यत्यायतनं, वाताहतजरद्रुवत् ॥११९॥
क्रोधमानमायालोभा, सदा काष्ठे घुणा इव ।
नैसर्गिका भविष्यन्ति, तस्मिन् क्रूरतराशये ॥१२०॥[२]
चौरा राजविरोधो, राड्भयं गन्धरसक्षयः ।
दुर्भिक्षमीत्यवृष्टी च, भविष्यन्ति तदा खलु ॥१२१॥
[३]कुमारोऽष्टादशाब्दानि, तावन्त्येव च [४]डामरी ।
ततः परं प्रचण्डात्मा, राजा **कल्की** [५]भविष्यति ॥१२२॥

---

१. तदा—**कल्की**जन्मनि संपन्न इत्यर्थः । २. १२०-१२१ मध्ये श्लोकोऽयमवलोक्यते-

तदा कषायाश्चत्वारो वृद्धिमेष्यन्ति भुव्यपि ।
मतं गजा इव वनं जनं नेष्यन्ति च क्षयम् ॥१॥

३. श्लोकोऽयं B.H मध्ये नास्ति । ४. इत्थं चायं **कल्की** आ अष्टादशाब्दीं कुमारत्वेऽवसत्, तावन्त्येव च वर्षाणि डामरी-चौरा राजविरोधो....इति श्लोकोक्तो महाविप्लवोऽभवत् । ततश्च अष्टादशेऽब्दे **कल्की** राजा बभूवेति पूर्वोक्तार्थस्यानुवादकोऽयं श्लोकः । ५. श्लोक११६अनन्तरं F मध्ये संस्कृतप्राकृतमिश्रितपाठः किञ्चिदशुद्धरूपेण एवमधिकं दृश्यते ।

मम सिद्धिगयस्स पुणो, **पालय**राया **अवन्ती**नयरीए होही ।
तं रयणीस्विय सट्ठि-वासाई पुहईवई ॥१॥

एतत् अङ्कतोऽपि दृश्यते । पालकराज्यं वर्ष ६० । नवनन्दराज्यं वर्ष १५५ । मोरीयवंश १०८ । पुष्पमित्रवंश ३० । बलमित्र भानुमित्र वर्ष ६० । सामीवाहनवर्ष ४० । गर्दभिल्लवर्ष १७ । एवं जिनसंवत्सरो ८६ । सुन्नमुणिवेयजुत्तं **विक्कम**कालाओ जिनकालम् ।

संजाते विक्रमराज्यवर्ष १३५ । शाकसंवत्सर ६०५ उभयं विक्रमशतसंवत्सरमिलने वर्षत ८१४ ततो वनराजराज्यं वर्ष ६० योगराज वर्ष १० रत्नादित्य वर्ष ४ वैरसिंह वर्ष ११ खिमराजवर्ष ३० चामुण्डराज वर्ष २६ अगडराजवर्ष २६ । भूयडवर्ष १६ । चापोत्कटानां राज्यमेवं वर्ष १६६ । ततः सोलंकीय श्रीमूलराजवर्ष ८५ । चामुण्डराजवर्ष १२ । वल्लभराजमास ६ । दुर्लभराट् वर्ष १२ । भीमवर्ष ४० तत्र महं. नेडविमस्तौ अमात्यौ कर्णदेवराज्यं वर्ष ३० । तत्र महं. श्री आणंदधवलौ अमात्यौ । श्रीजयसिंहदेवराज्यं वर्ष ४६ । कुमारपालदेव राज्यं ३० मास ६ । अजयदेव वर्ष ३ तत् पुत्रः लघुमूलराजराज्यं वर्ष २ तत् पुत्रः भीमदेवराज्यं वर्ष ६३ मास ६ । १२३४ वर्षे चैत्र सुद १५ तत्पुत्रतिहुअणपालदेवराज्यं वर्ष ३ एवं २६१ । अनन्तरं राज्यं क्रमेण श्री**वीर**तीर्थकरनिर्वाणवर्धमानसंवत्सर ८६० तथा

D:\chandan/new/kalp-1/pm5\3rd proof

[1]जनानामाददानः स्वं, निःस्वं विश्वं करिष्यति ।
ज्वलता ज्वलनेनैवं, तृणशून्यं वनं यथा ॥१२३॥
[2]अतिवृष्ट्या खनन्तः, क्ष्मां जलदा निधिसङ्गतम् ।
धनं प्रकाशयिष्यन्ति, तस्य कोशाभिवृद्धये ॥१२४॥
नगरे पर्यटंस्तत्र, पञ्चस्तूपान्[3]निरीक्ष्य सः ।
परिप्रक्ष्यति पार्श्वस्थान्, 'कैरेते कारिता' ? इति ॥१२५॥
कथयिष्यन्ति तेऽप्येवं, 'पुरासीद्विश्वविश्रुतः ।
**नन्द**नामक्षितिपतिः, [4]धनैर्धनदसन्निभः ॥१२६॥
हिरण्यमस्ति स्तूपेषु, तेनेह निहितं बहु ।
नादातुं तत् क्षमः कोऽपि बभूव पृथिवीपतिः' ॥१२७॥
**कल्कि**राजस्तदाकर्ण्य, भूरिलोभो निसर्गतः ।
खानयिष्यति तान् स्तूपान्, हिरण्यं च ग्रहीष्यति ॥१२८॥
सर्वतोऽपि पुरं तच्च, [5]सोऽर्थार्थी खानयिष्यति ।
अखिलांश्च महीपालांस्तृणवद् गणयिष्यति ॥१२९॥
**कल्किना** खान्यमानायास्तदा च स्वपुरावने ।
नाम्ना **लवणदेवी** गोरुत्थास्यति शिलामयी ॥१३०॥
चतुष्पथेऽवस्थिता सा, भिक्षार्थमटतो मुनीन् ।
तत्प्रातिहार्याच्छृङ्गाग्रभागेनोद्घट्टयिष्यति ॥१३१॥

---

विक्रमसंवत्सर १३०१ उभयराज्यं जाते १७७१ । एवं काले प्रवर्तमाने नर्मदातटे सोलंकीयवंशे श्रीविसलदेव नामा महाराजाधिराजो भविष्यति । ततः श्री विसलदेवराट् अभिषेकं सं. १३०१ वर्षात् **कलङ्की**जन्म अर्वाक् तिष्ठति वर्ष १४३ (१४३१) । एवं जिननिर्वाणदिनात् सं. १६९८ **कल्की**राजा कुमारावस्था वर्ष १४ अनन्तरं **कल्की**राजा भविष्यति । **कल्की** राज्यं वर्ष ७२ । सर्वायुः ८६ । सर्वाङ्कमिलने वर्षसहस्र २००० । एतत् भस्मकग्रहप्रमाणम् । अनन्तरं **कल्की**पुत्रो **दत्तो** राजा भविष्यति । सम्यक्त्वधरो । परमश्रावको। दिने दिने जिनबिम्बं प्रतिष्ठाकयभोजनं करिष्यति । तस्य पुत्रो **जितशत्रु**राजा तस्य तु **मेघघोष**नामा पुत्रो एवं अन्यान्यराजवंशे अपश्चिमो **विमलवाहनो** राजा भविष्यति । वर्ष २१००० ।

१-२. एतौ श्लौको केवलं A मध्ये स्तः । ३. केनैते ॥C९४॥ ४. स्वेन A । ५. सोऽर्थार्थः A ।

स्थविराश्च वदिष्यन्ति, 'भाविनं सूचयत्यसौ ।
जलोपसर्गमत्यन्तं, तत् क्वापि व्रजतान्यतः' ॥१३२॥
श्रुत्वा [१]तत् क्वापि यास्यन्ति विहारेण महर्षयः ।
अन्ये तु भक्तवस्त्रादिलुब्धा वक्ष्यन्त्यदः खलु ॥१३३॥
कालात् कर्मवशाद्भावि, शुभं वा यदि वाऽशुभम् ।
कस्तन्निषेधयितुमलम्भुष्णुर्जिष्णुरपि स्वयम् ॥१३४॥[२]
ततः पाखण्डिनः सर्वान्, **कल्की** याचिष्यते करम् ।
ते च तस्मै प्रदास्यन्ति सारम्भाः [३]सपरिग्रहाः ॥१३५॥
'अन्यैः पाखण्डिभिर्दत्तः, करो यूयं न दत्थ किम्' ? ।
इति ब्रूवाणो लुब्धात्मा, स साधूनमपि [४]रोत्स्यति ॥१३६॥
[५]साधवस्तं वदिष्यन्ति, 'राजन् ! वयमकिञ्चनाः ।
भिक्षाभुजो धर्मलाभं, विना किं दद्महे तव' ? ॥१३७॥
पुराणेषूक्तमस्त्येवं, ब्रह्मनिष्ठांस्तपोधनान् ।
रक्षंस्तत्पुण्यषष्ठांशभाग्भवेदवनीपतिः ॥१३८॥
अस्माद्दुष्कर्मणस्तस्माद्विरमावनिशासन ! ।
व्यवसायोऽशुभायायं पुरे राष्ट्रे च सर्वथा' ॥१३९॥
एवं मुनिवचः श्रुत्वा, **कल्की** कोपिष्यति [६]द्रुतम् ।
उद्भृकुटिः करालास्यः, कृतान्त इव भीषणः ॥१४०॥
किमरे ! मर्त्तुकामोऽसि, मर्त्याधममुनीनपि ।
याचसेऽर्थं वक्ष्यतीति ततस्तं पुरदेवता ॥१४१॥
देवतावचसा तेन, सिंहनादेन दन्तिवत् ।
भीतः **कल्की** नतिपूर्वं, तान् साधून् क्षमयिष्यति ॥१४२॥
भविष्यन्ति च भूयांसस्तदोत्पाता भयङ्कराः ।
अन्वहं **कल्कि**राजस्य [७]नगरक्षयसूचकाः ॥१४३॥

---

१. तत् केऽपि ॥C९२॥ २. श्लोकोऽयं सर्वास्वपि प्रतिषु १३३वर्णयुक्तो दृश्यते । ३. ते सारम्भपरिग्रहाः ॥C९८॥ ४. रोत्स्यते B, C, D । ५. साधवस्ते B । ६. ध्रुवम् ॥C९९॥ ७. नगरक्षयकारिणः A, B ।

D:\chandan/new/kalp-1/pm5\3rd proof

अहोरात्रान् सप्तदश, वर्षिष्यत्यथ वारिदः ।
**गङ्गा**प्रवाहश्चोद्धृत्य, तत्पुरं प्लावयिष्यति ॥१४४॥
तत्राचार्यः प्रातिपदः कोऽपि सङ्घजनोऽपि च ।
पूर्लोकः कोऽपि **कल्की** च स्थास्यन्ति स्थलमूर्धनि ॥१४५॥
**गङ्गा**प्रवाहपयसा, परितोऽपि प्रसारिणा ।
यास्यन्ति निधनं सद्यो, बहवो पुरवासिनः ॥१४६॥
जलोपसर्गे विरते, **नन्द**द्रव्येण तेन तु ।
**कल्कि**राजः पुनरपि, करिष्यति नवं पुरम् ॥१४७॥
भविष्यन्त्यायतनानि, विहरिष्यन्ति साधवः ।
वर्षिष्यन्ति च [१]कालेऽब्दाः, सस्यनिष्पत्तिकारणम् ॥१४८॥
[२]द्रव्येण कुम्भलाभेऽपि, सस्यं न क्रेष्यते जनः ।
पञ्चाशदब्दीमेवं च, सुभिक्षं भावि **कल्किनि** ॥१४९॥
आसन्नमृत्युर्भूयोऽपि, **कल्की**पाखण्डिनोऽखिलान् ।
त्याजयिष्यति लिङ्गानि, [३]व्यपद्रोष्यति चोच्चकैः ॥१५०॥
ससङ्घं च प्रातिपदं, न्यस्य गोवाटके तदा ।
याचिष्यते स भिक्षायाः, षष्ठं भागं दुराशयः ॥१५१॥
सङ्घः शक्राराधनाय, कायोत्सर्गं करिष्यति ।
शासनदेव्यो वक्ष्यन्ति, **कल्किन्** ! क्षेमाय न ह्यदः ॥१५२॥
सङ्घस्य कायोत्सर्गानुभावेन चलितासनः ।
वृद्धद्विजवपुर्भूत्वा, शक्रस्तत्रागमिष्यति ॥१५३॥
महासिंहासनासीनं, **कल्किनं** पर्षदि स्थितम् ।
शक्रो वक्ष्यति '[४]किं न्वेते, निरुद्धाः साधवस्त्वया' ? ॥१५४॥
**कल्की** भाषिष्यते शक्रं, 'मत्पुरे निवसन्त्यमी ।
न मे करं तु यच्छन्ति, भिक्षाषष्ठांशमप्यहो ! ॥१५५॥
पाखण्डाः करदाः सर्वे, ममाभूवन्नमी पुनः ।
दुर्गवीवद्बलाद्दोग्धुं , निरुद्धास्तेन वाटके' ॥१५६॥

---

१. वर्षिष्यति च कालेऽब्दः C-१०७ । २. द्रम्मेण C-१०८, B, D । ३. व्युपद्रोष्यति B, C-१०९ । ४. किन्त्वेति A, C-११३ ।

**D:\chandan/new/kalp-1/pm5\3rd proof**

[1]तं जल्पिष्यति 'शक्रोऽपि, नैतेषामस्ति किञ्चन ।
भिक्षांशमपि दास्यन्ति न कस्यापि कदाप्यमी ॥१५७॥[2]
[3]भिक्षुभ्यो याच्यमानस्त्वं, भिक्षांशं लज्जसे न हि ? ।
तन्मुञ्चामूनन्यथा ते भाव्यनर्थो महान् खलु' ॥१५८॥
कुप्यन्निितिगिरा **कल्की,** वदिष्यत्यररे ! भटाः ! ।
कण्ठे धृत्वा द्विजममुमपसारयत द्रुतम्' ॥१५९॥
इत्युक्ते **कल्किनं** कल्कपर्वतं पाकशासनः ।
चपेटाताडनात् सद्यो, भस्मराशीकरिष्यति ॥१६०॥
षडशीतिं वत्सराणामायुः सम्पूर्य **कल्कि**राट् ।
नारको नरकावन्यां, दुरन्तायां भविष्यति ॥१६१॥
अनुशिष्याऽऽर्हतं धर्मं, **दत्ताख्यं कल्किनः** सुतम् ।
राज्ये निवेश्य वन्दित्वा, सङ्घं शक्रो गमिष्यति ॥१६२॥

---

१. असौ श्लोकः A, B मध्ये नास्ति । २. १५७ तथा १५८ मध्यस्थिता अधोदर्शिताः षट्श्लोकाः केवलं A प्रतौ दृश्यन्ते अन्यत्र न सन्ति ।

जल्पिष्यति सुरेशस्तं मुनीन् भूपाल ! पालय ।
ये त्वां पुण्यषडंशेन सर्वदाप्युपकुर्वते ॥१६८॥
सारम्भाभूपपाखण्डास्त्वया स्वैरं विडम्बिताः ।
भिक्षामात्रभुजो नामी युक्ताः पीडयितुं तदा ॥१६९॥
भिक्षांशमपि दास्यन्ति न कस्यापि कदाचन ।
भिक्षुभ्यो याचमानं स्वं भिक्षांशं लज्जसे न हि ॥१७०॥
अधःकृतं तपस्तेजः किञ्चानर्थाय जायते ।
दहत्येव हि धातारं, दीपवर्त्तिरधोमुखी ॥१७१॥
पर्यन्तं विरसादस्मात्ततो हि त्वं दुराग्रहात् ।
निवर्त्तस्व प्रवर्त्तस्व, पथि न्याय्ये जिजीविषुः ॥१७२॥
मुक्तारम्भममत्वानां, नैतेषामस्ति किञ्चन ।
तन्मूञ्चामूनन्यथा ते, भाव्यनर्थो महान् खलु ॥१७३॥

३. असौ श्लोकः A, B मध्ये नास्ति ।

D:\chandan/new/kalp-1/pm5\3rd proof

पितुः पापफलं घोरं, शक्रशिक्षां च संस्मरन् ।
दत्तः करिष्यति [१]महीमर्हच्चैत्यविभूषिताम् ॥१६३॥

पञ्चमारकपर्यन्तं, यावदेवमतः परम् ।
प्रवृत्तिर्जिनधर्मस्य, भविष्यति निरन्तरम् ॥१६४॥[२]

**पञ्चमारकभरतक्षेत्रस्थितिनिरूपणम् –**

इदं हि **भरत**क्षेत्रं, ग्रामाकरपुराऽऽकुलम ।
धनधान्याञ्चितमर्हत्कालेऽभूत्स्वर्गसन्निभम् ॥१६५॥

ग्रामा नगरवत्स्वर्गसमानि नगराणि च ।
कुटुम्बिनो नृपसमा, नृपा वैश्रमणोपमाः ॥१६६॥

[३]आचार्याश्चन्द्रमास्तुल्याः, पितरो देवतासमाः ।
[४]श्वश्रुश्च जननीकल्पाः, श्वशुराः पितरोपमाः ॥१६७॥

सत्यशौचपरो धर्माऽधर्मज्ञो विनयप्रियः ।
गुरुदेवार्चकः स्वस्त्रीसन्तुष्टश्च [५]सदा जनः ॥१६८॥

अर्घति स्म च विज्ञानं, विद्याशीलं कुलं तथा ।
परचक्रे[६]ति[७]दस्युभ्यो, नाऽभूद्भीर्न करोऽपि च ॥१६९॥

अर्हद्भक्ताश्च राजानोऽवगीताश्च कुतीर्थिकाः ।
बभूवुरुपसर्गादीन्याश्चर्याणि दशापि च ॥१७०॥

---

१. श्लोकसंख्या १६३ तथा १६४मध्ये निम्नोद्धृताः त्रयः श्लोकाः केवलं A प्रतौ सन्ति, अन्यत्र न सन्ति ।

सद्वासप्ततिवर्षायुस्तत्पुत्रो **जितशत्रु**राट् ।
तत्सूनु**र्मेघघोषा**ख्यो नृपः धर्मपरायणः ॥१॥

भावि महानिशीथं न, **कल्किनो**ऽनन्तरं किल ।
भस्मकापगमे देवैरपि स्वं दर्शयिष्यति ॥२॥

विद्या मन्त्रा अपि स्तोकजापादपि स्वसिद्धिदा ।
भविष्यन्त्यवधिज्ञानजातिस्मृत्यादयो मनाक् ॥३॥

२. श्लोकोऽयं F, J मध्ये नास्ति । ३. श्लोकोऽयं E प्रतौ नास्ति । ४. स्वस्त्रुश्च जननीतुल्याः श्वशुराः पितृसन्निभाः । C-१२६ जननीकल्पाः A । ५. तदा C-१२७ । ६. ईतिरुपद्रवः । ७. दस्युभ्योऽभून्न भीर्न करो नवः ॥C-१२८॥

अतः परं दुःषमायां, कषायैर्लुप्तधर्मधीः ।
भावी लोकोऽपमर्यादोऽत्युदकक्षेत्रभूरिव ॥१७१॥[१]
यथा यथा यास्यति च, कालो लोकस्तथा तथा ।
कुतीर्थिमोहितमतिर्भाव्यहिंसादिवर्जितः ॥१७२॥
ग्रामाः श्मशानवत्प्रेत-लोकवन्नगराणि च ।
कुटुम्बिनश्चेटसमा, यमदण्डसमा नृपाः ॥१७३॥
लुब्धा नृपतयो भृत्यान्, ग्रहीष्यति धनं निजान् ।
तद्भृत्याश्च जनमिति, मात्स्यो न्यायः प्रवर्त्स्यति ॥१७४॥
येऽन्त्यास्ते भाविनो मध्ये, ये मध्यास्तेऽन्तिमाः क्रमात् ।
देशाश्च दोलायिष्यन्ते, नावोऽसितपटा इव[२] ॥१७५॥
चोर्याच्चोराः[३] पीडयिष्यन्त्युर्वी भूपाः करेण तु ।
श्रेण्यो भूतग्रहप्राया, लुञ्चालुब्धा नियोगिनः ॥१७६॥
भावी विरोधो[४] स्वजनैर्जनः स्वार्थैकतत्परः ।
परार्थविमुखः सत्यलज्जादाक्षिण्यवर्जितः ॥१७७॥
गुरूनाराधयिष्यन्ति शिष्याः शिष्येषु तेऽपि हि ।
अतो[५] ज्ञानोपदेशं न, प्रदास्यन्ति कथञ्चन ॥१७८॥
एवं गुरुकुलवासः, क्रमादपगमिष्यति ।
मन्दा धीर्भाविनी धर्मे, बहुसत्त्वाकुलाः च भूः ॥१७९॥
न साक्षाद्भाविनो देवा, विमंस्यन्ते सुताः पितॄन् ।
सर्पीभूताः स्नुषा श्वश्रूः कालरात्रिसमाः पुनः[६] ॥१८०॥
दृग्विकारैः स्मितैर्जल्पैर्विलासैरपरैरपि ।
वेश्यामनुकरिष्यन्ति, त्यक्तलज्जाः कुलस्त्रियः ॥१८१॥

---

१. श्लोकसंख्या १७१ तथा १७२मध्ये A प्रतौ श्लोकोऽयं दृश्यते । यथा –
तिरस्कार्य पुरस्कार्य नृणां भावी विपर्ययः ।
अस्वस्था भाविनो देशाः कृतपापा इवाङ्गिनः ॥१॥ A-१९१। अन्यत्र नास्ति ।

२. A, E मध्ये नास्ति । ३. एकव्यापारवन्त इत्यर्थः । श्रेणीभूत० इति संभाव्यते । ४. विरोधी स्वार्थै ॥१३६-C॥ ५. श्रुतज्ञानोपदेशं न ॥१३६-C॥ ६. सहोदरा A ।

D:\chandan/new/kalp-1/pm5\3rd proof

श्रावकश्राविकाहानिश्चतुर्धाधर्मसंक्षयः ।
साधूनामथ साध्वीनां, पर्वस्वप्यनिमन्त्रणम् ॥१८२॥
कूटतुला कूटमानं, शाठ्यं [1]धर्मेऽपि भावि च ।
सन्तो दुस्थीभविष्यन्ति, सुस्थास्यन्ति च दुर्ज्जनाः ॥१८३॥
मणिमन्त्रौषधितन्त्रविज्ञानानां धनायुषाम् ।
फलपुष्परसानां च रूपस्य वपुरुन्नतेः ॥१८४॥
धर्माणां शुभभावानां, चान्येषां पञ्चमे ह्यरे ।
हानिर्भविष्यति ततोऽप्यरे षष्ठेऽधिकं [2]पुनः ॥१८५॥
[3]क्रमादेवं [4]हीयमाणे, पुण्ये काले प्रसर्पति ।
धर्मे धीर्भाविनी यस्य, सफलं तस्य जीवितम् ॥१८६॥[5]

---

१. धर्मे च B, D । २. खलु B, C-१४४, D । ३. छन्दोदृष्ट्या, हीयमाणे क्रमादेव अथवा क्षीयमाणे क्रमादेव, इति पाठो योग्यः प्रतिभाति । किन्तु सर्वासु प्रतिषु उपरितनपाठः दृष्यते । ४. क्षीयमाणपुण्ये ॥C-१४५ । ५. अतः परं A, I प्रतिमध्ये अत्र ०....० मध्ये दर्शितः शुद्धाशुद्धरूपः पाठः अधिकः दृश्यते तस्य आ. श्री **जिनप्रभसूरि**विरचितदीपोत्सवकल्पपत्र-५२ तः ५५ सत्केन पाठेन सह तुलना कार्याः । ० । एयं च दुसमासमयविलसियं लोइया वि कलिकालव्ववएसेणं पन्नवंति, जहा पुव्विं किल दावरजुगुप्पन्नेणं रन्ना जुहुट्ठिलेणं राय-वाडिगएणं कत्थ वि वच्छिआए हिट्ठे गावी थणपाणं कुणंती दिट्ठा । तं च अच्छेरयं ति रन्ना दियवरा पुट्ठा किमेयं ति ? तेहुत्तं, देव ! आगमिणो कलिजुग्गस्स सूयगमेअं इमस्स अब्भु-अस्स फलमिणं, कलिजुगे अम्मापियरो कन्नयं कस्स वि रिद्धिमन्तस्स दाउ तओ उवजीवि-स्संति । तत्तो दविणगहणाइणा ॥१॥ तओ अग्गओ चलिएणं रन्ना सलिलवीसालिअवालुआए रज्जुओ वलंता केवि दिट्ठा । खणेण ताओ रज्जुओ वायाइ संजोएण मुसुमूरिआ । तत्थ वि पुट्ठे दिएहिं निवस्सुत्तं । जं दविणं किच्छवित्तीए लोआ विढविस्संति तं कलिजुगे चोरग्गिदंडाइएहिं विणस्सिस्सई ॥२॥ पुणरवि अग्गओ आवाहाओ पलुट्टिअं जलं कूवे पडन्तं दट्ठूण पुट्ठे दिएहिं वुत्तं । देव ! जं दव्वं जणो किसिवाणिज्जाइएहिं उववज्जिहिइ तं सव्वं राउले गच्छहित्ति । अन्नजुगे रायाणो नियदव्वं दाउं जणं सुट्ठिअं अकरिंसु ॥३॥ अग्गओ चंपयदुमस्स छत्तायारस्स सुगंधसुमहिअस्स वि जणाऽकयपूअस्स । समीदुमस्स कयवेइ-आबंधस्स मंडणगंधमल्लगीअनट्टाइणा जणपूइअस्स य एगत्थ दिट्ठुस्स फलं विप्पेहिं वुत्तं । जहा गुणवंताणं सज्जणाणं न पूआ भविस्सइ, न य रिद्धी । पाएणं निग्गुणाणं पाविट्ठाणं पूआ इड्ढी अ भविस्सइ ॥४॥ पुणो अग्गओ सुहमछिद्दबद्धवालग्गालंबणेणं अन्तरिक्खट्ठिअं सिलं दट्ठूण पुट्ठेहिं सिट्ठं विप्पेहिं जहा कलिजुगे सिलातुल्लं पावं विउलं भविस्सइ । वालग्गसरिसो

धम्मो पयट्टिही, परं तत्तिअस्स वि धम्मस्स माहप्पेणं कंचि कालं निरिस्सइ लोओ तम्मि वि तुट्ठे सव्वं बुड्डिस्सइ । इत्यादि १०८ दष्टान्तैर्महाभारते कलिस्थितिरुक्ता ॥५॥

**सुहमाइदुपसहं**ता तेवीसुदएहिं चउजुअ दुसहसा ।
एगावयारिसुचरणा समयविऊं पभावगा य जुगपवरा ॥६॥

इय**सुहमजंबू** तब्भवसिद्धा एगावयारिणो सेसा ।
सड्ढदुजोअणमज्झे जयंतु दुब्भिक्खडमरहरा ॥७॥

जुगप्पहाणसमाणा एगारसलक्खसोलससहस्सा ।
सूरी उ हुंति अरए पंचमए जाव **दुप्पसहो** ॥८॥

पंचम अरम्मि पणपन्नलक्ख पणपन्नसहस्सकोडीणं ।
पंचसयकोडिपन्ना नमामि सुचरणसयलसूरी ॥९॥

तित्तीसं लक्खाओ चउरसहस्साउ चउसयाइं च ।
इगनवइ दूसमाए सूरीणं मज्झिमगुणाणं ॥१०॥

पंचावन्नाकोडी पंचावन्नाइ सयसहस्साइं ।
पंचावन्नसहस्सा पंचसया चेव पणसीया ॥११॥ इत्येतेऽधमसूरयः ।

यदुक्तम्-तीआणागयकाले केई होहंति **गोयमा** ! सूरी ।
जेसिं नामग्गहणे निअमेणं होइ पच्छित्तम् ॥१२॥

पंचावन्नाकोडी लक्खाणं हुंति तह सहस्साणं ।
चउवन्नाकोडिसया चोआलीसा य कोडीओ ॥१३॥ इत्युपाध्यायवाचनाचार्यसंख्या ।

तह सत्तरिकोडिलक्खा नवकोडिसहस्स कोडिसयमेगं ।
इगवीसकोडि सयलक्ख सट्ठिं सहस्सा सुसाहूणं ॥१४॥

समणीण कोडिलक्खा दस नवकोडिसया बारकोडीओ ।
छप्पनलक्ख बत्तीससहस्स एगूण दुन्नि सया ॥१५॥ इति साध्व्यः ॥

एककोटिरेकादशलक्षाः षोडशसहस्रा उत्तमनृपसंख्या ।

तह सोलकोडिलक्खा तियकोडीसहस्स तिन्निकोडिसया ।
सत्तरकोडी चुलसीलक्खा सुसावगाणं तु ॥१६॥

पणतीसकोडिलक्खा सुसाविआ कोडिसहसबाणउई ।
पणकोडिसया बत्तीसकोडि तह बारसब्भहिआ ॥१७॥

सप्तकोटिलक्षषट्पञ्चाशत्सहस्रा मध्यमगुणनृपाः ।

अह सग्गचुओ सूरी **दुप्पसहो** साहुणी अ **फग्गुसिरी** ।
**नाइल**सड्ढो सड्ढी **सच्चसिरी** अंतिमो संघो ॥१८॥

**विमलवाहन** इति राट्, मन्त्री च **सुमुखा**भिधः ।
अपश्चिमा भाविनोऽमी दुःषमायां हि **भारते** ॥१९॥
दसवेयालिअजिअकप्पाऽऽवस्सयअणुओगदार ।
**नंदि**धरो सययं इंदाइनओ छट्ठुग्गतवो दुहत्थतणू ॥२०॥
गिहिवयगुरुत्तबारसचउचोवरिसो कयट्ठमो अंते ।
**सोहंमि** सागराउ होउं तओ सिज्झही **भरहे** ॥२१॥
एयं सुअसूरिसंघधम्मो पुव्वण्हे छिज्झिही अगणि सायं ।
नि**वविमलवाहणसुमुह**मंतिनयधम्म मज्झण्हे ॥२२॥

एतस्य स्थाने F, G, H, J, L मध्ये कथंचित् क्रमभेदेन संस्कृतप्राकृतमिश्रितः शुद्धा-शुद्धरूपेण अधोदर्शितपाठः दृश्यते ।

जा **दुप्पसहो** सूरी, होहिंति जुग्गप्पहाण आयरिया ।
अज्ज**सुहम्म**प्पभिई, चउरहिया दुन्नियसहसा ॥१॥
जुगप्पहाणसमाणे एगारस्सलक्ख सोलससहस्सा ।
सूरीउ होंति अरए पञ्चमए जाव **दुप्पसहो** ॥२॥
पञ्चावन्नाकोडि पञ्चावन्नाई सयसहस्साइं ।
पञ्चावन्नसहस्सा पञ्चसया चेव पणसीया ॥३॥ एतेऽधम्मा ।
तेत्तिसलकखाओ चउसहस्साओ चउसयाइं च ।
ईगनवई दुसमाए सूरीणं मज्झिमगुणाणं ॥४॥
पञ्चावन्नाकोडि लकखाणं होंति तह सहस्साणं ।
चउवन्नकोडिसया चउआलिस्सा य कोडीओ ॥५॥ इति स्वाध्यायवाचनाचार्यसंख्या ।
सत्तरिकोडिलक्षा नवकोडिसहस्र कोडिशत एककोडिलक्ष सट्ठिसहस्र ॥
इति साधुसंख्या।
दशकोडाकोडि छनवईकोडि बारकोडिशत बत्तीसलाख नवाणवईसहस्र एकशतं ॥
इति साध्वीसंख्या ।
एकाकोडि अगियारलाख सोलहसहस्र ॥ इति उत्तमनृपसंख्या ।
एककोडी कोडिलक्ष सट्ठिकोडाकोडिं चउरासिलाख चउणवईसहस्र नवशतनवई ॥
इति श्रावकसंख्या ।
कोडिलक्ष बावनकोडिसहस्र बत्तीसकोडिशत पञ्चकोडि पञ्चसहस्र ॥
इति श्राविकासंख्या ।

**अन्तिमश्रीसङ्घस्य स्थितिः—**

[१]आचार्यो **दुःप्रसहा**ऽऽख्यः, **फल्गुश्री**रिति साध्व्यपि ।
श्रावको **नागिलो** नाम, **सत्यश्री** श्राविका पुनः ॥१८७॥
[२]**विमलवाहन** इति [३]राण्मन्त्री **सुमुखा**भिधः ।
अपश्चिमा भाविनोऽमी दुःषमायां हि **भारते** ॥१८८॥
रत्निद्वयप्रमाणाङ्गा, विंशत्यब्दायुषश्च ते ।
तपो **दुःप्रसहा**दीनां, चतुर्णां षष्ठमुत्कटम् ॥१८९॥
**दशवैकालिक**भृद्यः, स चतुर्दश[४]पूर्वभृत् ।
प्रबोधयिष्यति सङ्घं, तीर्थं **दुःप्रसहा**वधि ॥१९०॥
ततोऽर्वाग्[५]वर्त्स्यते धर्मो, धर्मो नास्तीति यः पुनः ।
वदिष्यति स सङ्घेन, कर्त्तव्यः सङ्घतो बहिः ॥१९१॥
द्वादशाब्दीं गृहे नीत्वाष्टाब्दीं **दुष्प्रसहो** व्रते ।
पर्यन्तेऽष्टमभक्तेन, **सौधर्मं** कल्पमेष्यति ॥१९२॥
पूर्वाह्णेऽथ चारित्रस्य, समुच्छेदो भविष्यति ।
मध्याह्ने राजधर्मस्यापराह्णे जातवेदसः ॥१९३॥[६]
इत्थं च दुःषमा वर्षसहस्राण्येकविंशतिः ।
एकान्तदुःषमाकालोऽप्येवम्मानो भविष्यति ॥१९४॥

**षष्ठारकस्य स्थितिः —**

धर्मतत्त्वे प्रणष्टेऽथ, हाहाभूतो भविष्यति ।
पशुवन्मातृपुत्रादिव्यवस्थावर्जितो जनः ॥१९५॥
परुषाः पांशुभूयांसोऽनिष्टा वास्यन्ति वायवः ।
दिशश्च धूमायिष्यन्ति, भीषणाश्च दिवानिशम् ॥१९६॥
इन्दुः स्रक्ष्यत्यतिशीतं, तप्स्यत्यत्युष्णमर्यमा ।
अतिशीतोष्णाभिहतो, लोकः क्लेशमवाप्स्यति ॥१९७॥

---

१. श्लोकोऽयं A मध्ये नोपलभ्यते । २ श्लोकोऽयं A मध्ये नोपलभ्यते । ३. मन्त्री च B, D । ४. ०पूर्ववित् ॥C-१४९। ५. वर्त्स्यति B, C, D । ६. १९३अनन्तरं दृश्यमानोऽयं श्लोकः अन्यत्र नास्ति । वासाण वीससहस्सा नव सय तिम्मास पंचदिणपहरा । इक्का घडिआ दोपल अक्खरइगुआल जिणधम्मो ॥२३॥

[1]वर्षिष्यन्ति तथाम्भोदास्तथा वास्यन्ति वायवः ।
तप्स्यत्यर्कस्तथा सर्वं, यथा भस्म भविष्यति ॥१९८॥
[2]तदा च विरसा मेघाः, क्षारमेघाम्लमेघकाः ।
विषाग्न्यशनिमेघाश्च वर्षिष्यन्त्यात्मसन्निभम् ॥१९९॥
येन भावी कासः श्वासः, शूलं कृष्टं जलोदरम् ।
ज्वरः शिरोर्त्तिरन्येऽपि, मनुष्याणां महाऽऽमयाः ॥२००॥
दुःखं स्थास्यन्ति तिर्यञ्चो, जलस्थलखचारिणः ।
भावी क्षेत्रवनारामलतातरुतृणक्षयः ॥२०१॥
**वैताढ्यऋषभकूटगङ्गासिन्धु**र्विमुच्य च ।
समीभविष्यत्यखिलं गिरिगर्त्तापगादिकम् ॥२०२॥
अङ्गारमर्मराभा भूर्भष्मरूपा भविष्यति ।
कदाचिद्धूलिबहुला, कदाचित्सान्द्रकर्दमा ॥२०३॥
[3]रत्निमानाः पुरुषाङ्गा, दुर्वर्णा निष्ठुरोक्तयः ।
रोगार्त्ताः क्रोधना उच्चघाटाश्चिपटनासिकाः ॥२०४॥
निर्लज्जा वस्त्ररहिता, भविष्यन्ति नराः स्त्रियः ।
आयुर्विंशतिरब्दानि नृणां स्त्रीणां तु षोडश ॥२०५॥
गर्भं वक्ष्यति षड्वर्षा, स्त्री दुःखप्रसवा तदा ।
स्थविरा षोडशाब्दा च, भूयिष्ठसुतनप्तृकाः ॥२०६॥
भाविनो बिलवासाश्च, गिरौ **वैताढ्य**नामनि ।
द्वासप्ततिर्नद्युभयतटभूषु बिलानि तु[4] ॥२०७॥
कूले कूले कूलिनीनां, बिलानि नव तत्र च ।
तिर्यञ्चस्तु भविष्यन्ति, बीजमात्रतयैव हि ॥२०८॥
पललाहारनिरता, नृशंसा निर्विवेककाः ।
तदानीं च भविष्यन्ति, मनुष्याद्या अशेषतः ॥२०९॥
तदा रथपथमात्रं, **गङ्गासिन्धु**नदीजलम् ।
प्रवक्ष्यति चलन्मत्स्यकच्छपादिभि[5]राचितम् ॥२१०॥

---

१. श्लोकोऽयं B, C, D मध्ये नास्ति । २. श्लोकोऽयं B, D प्रतिषु न दृश्यते । ३. रत्निमानपुरुषाङ्गः । C-१६१ । ४. च A । ५. रावृत्तम् A ।

D:\chandan/new/kalp-1/pm5\3rd proof

तत्रैत्य निशि मत्स्यादीन् , कृष्ट्वा मोक्ष्यन्ति च [१]स्थले ।
दिवा सूर्यत्विषा पक्वान् , खादिष्यन्ति निशान्तरे ॥२११॥
एवं सदापि भोक्ष्यन्ते, यद्दध्यादि तदा न हि ।
न पुष्पं न फलं नान्नं न च शय्यासनादिकम् ॥२१२॥
[२]**भरतैरावते**ष्वेवं दशस्वपि हि दुःषमा ।
[३]तथाऽतिदुःषमाऽप्येकविंशत्यब्दसहस्रिका ॥२१३॥

**उत्सर्पिणीकालनिरूपणम् –**

अरौ याववसर्पिण्यामन्त्योपान्त्यावुभौ च तौ ।
[४]उत्सर्पिणी स्वकीयानुभावाद्यद्वितीयकौ ॥२१४॥
उत्सर्पिण्यां [५]दुःषमादौ समये पुनरम्बुदाः ।
भाविनः [६]पञ्च सप्ताहवर्षिणस्ते पृथक् पृथक् ॥२१५॥
तत्राद्यः **पुष्करो** नाम महीं निर्वापयिष्यति ।
द्वितीयः **क्षीरमेघा**ख्यो धान्यान्युत्पादयिष्यति ॥२१६॥
तृतीयो **घृतमेघा**ख्यः स्नेहं सञ्जनयिष्यति ।
तुर्यस्त्व**मृतमेघा**ख्य [७]ओषध्यादि करिष्यति ॥२१७॥[८]
पृथ्व्यादीनां रसं कर्त्ता [९]**रसमेघ**श्च पञ्चमः ।
[१०]पञ्चत्रिंशद्दिनीं वृष्टिर्भाविनी सौम्य ! दुर्दिना ॥२१८॥
द्रुमौषधिलतावल्लीहरितादि निरीक्ष्य च ।
बिलेभ्यो निःसरिष्यन्ति मुदिता बिलवासिनः ॥२१९॥
ते वक्ष्यन्ति **भरत**भूरभूत् पुष्पफलादिभृत् ।
भक्ष्यं नातः परं मांसं त्याज्यो मांसादिकश्च यः ॥२२०॥
यथा यथैष्यति कालो [११]वर्धिष्यन्ति तथा तथा ।
रूपसंहननायूंषि धान्यादीनि च **भारते** ॥२२१॥

---

१. ते बहिः A। २. भरतैरवतेष्वेवं ॥C-१७१॥ भरतैरावतैष्वेवं B। ३. तथाहि दुःषमा A। तथा दुःषमा B। ४. उत्सर्पिण्यां B। ५. दुषम-दुःषमान्तसमयेऽम्बुदाः ॥C-१७३॥ ६. पञ्चपञ्चार्हवर्षिणस्ते A। ७. औषध्यादि B। ८. श्लोकोऽयं H मध्ये नास्ति। ९. रसमेघाश्च B। १०. पञ्चविंशदिना वृष्टि० A। पञ्चत्रिंशद्दिना वृष्टि० B। ११. वर्त्स्यन्ति ॥C-१७९॥

D:\chandan/new/kalp-1/pm5\3rd proof

भविष्यन्ति सुखा वाता, ऋतवः सलिलानि च ।
तिर्यञ्चश्च मनुष्याश्च गतरोगा क्रमेण च ॥२२२॥

दुःषमान्ते भविष्यन्ति, मध्ये प्राग्**भरता**वनि ।
कुलकराः सप्त तत्राऽऽदिमो [1]**विमलवाहनः** ॥२२३॥

[2]**सुदामा** [3]**सङ्गम**श्चापि, [4]**सुपार्श्व**श्च चतुर्थकः ।
[5]**दत्त**श्च [6]**सुमुख**श्चैव [1]**सुमुचि**[7]श्चेति ते क्रमात् ॥२२४॥

[2]तत्र जातिस्मरः [3]पूर्वं, नाम्ना **विमलवाहनः** ।
निवेशयिष्यति ग्रामपुरादीन् राज्यहेतवे ॥२२५॥

सङ्ग्रहीष्यति गोगजाश्वाद्यथ व्यञ्जयिष्यति ।
शिल्पानि व्यवहारं च लिपीश्च गणितानि च ॥२२६॥

उत्पन्ने दुग्धदध्यादौ, सस्येषु ज्वलनेऽपि च ।
[4]हितकामी स प्रजानां रन्धनाद्युपदेक्ष्यति ॥२२७॥

**भाविनश्चतुर्विंशतितीर्थपतयः –**

दुःषमायामतीतायां, [5]**शतद्वारे** महापुरे ।
**भद्रा**नाम्न्यां महादेव्यां [6]**सुमुचेः** पृथिवीपतेः ॥२२८॥

**नन्दनः श्रेणिक**जीवो, भविष्यत्याद्यतीर्थकृत् ।
**पद्मनाभा**भिधस्तुल्यो, जन्ममानादिना मम ॥२२९॥

अतः परं पूर्ववच्च, भविष्यन्ति जिनेश्वराः ।
प्रातिलोम्येन पूर्वार्हत्समाः सर्वेऽप्यमी क्रमात् ॥२३०॥

तत्र **श्रेणिक**राड्जीवः, **पद्मनाभो** जिनेश्वरः ।
**सुपार्श्व**जीवो भगवान् **सूरदेवो** द्वितीयकः ॥२३१॥

तृतीयः **पोट्टिल**जीवः, [7]**सुपार्श्व**जिनपुङ्गवः ।
जीवो **दृढायुष**स्तुर्यस्तीर्थनाथः [8]**स्वयम्प्रभुः** ॥२३२॥

**कार्त्तिक**स्य जीवः, **सर्वानुभूति**रिति पञ्चमः ।
जीवः **शङ्ख**स्य षष्ठोऽर्हन् **देवश्रुतो**ऽभिधानतः ॥२३३॥

---

१. सम्मुचि । २. तदा A । ३. जातिस्मृतिपूर्वं B, ०पूर्वो ॥C १८३। ४. हितकामी प्रजानां सः A । ५. शतद्वारमहापुरे A । ६. सुमुचेः B, सम्मुच्चेः ॥C-१८६। D, । ७. सुपार्श्वो ॥C-१९०॥ ८. स्वयंप्रभः A ।

सप्तमो **नन्द**[१]जीवस्तु , जिनेन्द्र **उदयाह्वयः** ।
**सुनन्द**जीवोऽष्टमोऽर्हन् **पेढाल** इति नामतः ॥२३४॥
नवमः[२] **केकसी**जीवो, जिनेन्द्रः **पोट्टिला**भिधः ।
दशमो **रेयलि**जीवः **शतकीर्त्ति**र्जिनेश्वरः ॥२३५॥
अर्हन् **सत्यकि**जीवश्चैकादशः **सुव्रता**भिधः ।
द्वादशोऽर्हन्**नममाख्यो** जीवः **कृष्ण**स्य शाङ्र्गिणः ॥२३६॥
**बलदेव**स्य जीवोऽर्हन्**निष्कषाय**[३]स्त्रयोदशः ।
जिनेन्द्रो **रोहिणी**जीवो **निष्पुलाक**[४]श्चतुर्द्दशः ॥२३७॥
**निर्ममः सुलसा**जीवो, जिनः पञ्चदशः पुनः ।
षोडशो **रेवती**जीव**स्त्रिगुप्तो**ऽभिधानतः ॥२३८॥
**गवालि**जीवः **समाधि**र्नाम्ना सप्तदशो जिनः ।
जीवश्च **गार्गले**रष्टादशोऽर्हन् **संवरा**भिधः ॥२३९॥
**द्वीपायन**जीवस्त्वेकोनविंशोऽर्हन् **यशोधरः** ।
**विजयो** विंशतितमः **कर्णजीवो** जिनेश्वरः ॥२४०॥
एकविंशो जिनो **मल्लो,** यः पुरा **नारदो**ऽभवत् ।
**अम्बड**स्य पुनर्जीवो द्वाविंशो **देव**तीर्थकृत् ॥२४१॥
त्रयोविंशो**ऽनन्तवीर्यो,** जीवो **द्वारदम**[५]स्य च ।
**स्वाति**जीवश्चतुर्विंशो **भद्रकृन्**नामतीर्थकृत् ॥२४२॥

**भाविचक्रिणः –**

[१]**दीर्घदन्तो** [२]**गूढदन्तः,** [३]**शुद्धदन्त**स्तृतीयकः ।
तथा [४]**श्रीचन्द्रः** [५]**श्रीभूतिः** [६]**श्रीसोमः** [७]**पद्म** इत्यपि ॥२४३॥
[८]**महापद्मो** [९]**दशमा**ख्यस्तथा [१०]**विमल** इत्यपि ।
[११]**विमलवाहनो**[१२]**ऽरिष्टो** भाविनोऽमी च चक्रिणः ॥२४४॥ युग्मम् ।

**भाविवासुदेवाः –**

[१]**नन्दिश्च** [२]**नन्दिमित्रं,** तथा [३]**सुन्दरबाहुकः** ।
[४]**महाबाहू** [५]**रतिबलो,** [६]**महाबल**[७]**बला**वपि ॥२४५॥

---

१. आनन्दजीवो B । २. नवमो नन्दकीजीवो A । नवमो आनन्दजीवो B । ३. निःकषाय, A, B । ४. निःपुलाक. A । ५. द्वारमदस्य तु B, C-२०० ।

D:\chandan/new/kalp-1/pm5\3rd proof

[८]**द्विपृष्ठ**श्च [९]**त्रिपृष्ठ**श्च, नवामी अर्धचक्रिणः ।
चटत्प्रकर्षा रामास्तत्र प्रथमतो बलः ॥२४६॥

**भाविबलदेवाः –**

[१]**जयन्तो**ऽथा[२]ऽ**जितो** [३]**धर्मः**,[1] [४]**सुप्रभ**श्च [५]**सुदर्शनः** ।
[६]**आनन्दो** [७]**नन्दनः** [८]**पद्म**स्तथा [९]**सङ्कर्षणो**ऽन्तिमः ॥२४७॥

**भाविप्रतिवासुदेवाः –**

प्रत्यर्धचक्रिणैते [१]**तिलको** [२]**लोहजङ्घकः** ।
[३]**वज्रजङ्घः** [४]**केसरी** च [५]**बलिः** [६]**प्रह्लाद** इत्यपि ॥२४८॥
[७]तथा**ऽपराजितो** [८]**भीमः**, [९]**सुग्रीवो** नवमः पुनः ।
इत्युत्सर्पिण्यां त्रिषष्टिशलाकापुरुषा अमी ॥२४९॥
एवमाख्याय समवसरणान्निर्ययौ प्रभुः ।
**हस्तिपाल**नरेन्द्रस्य, शुल्कशालां जगाम च ॥२५०॥

**प्रभोर्निर्वाणं दीपोत्सवप्रवर्तनं च –**

स्वामी तद्दिनयामिन्यां विदित्वा मोक्षमात्मनः ।
दध्यावहो **गौतम**स्य, मयि स्नेहो निरत्ययः ॥२५१॥
स एव केवलज्ञानप्रत्यूहोऽस्य महात्मनः ।
स च्छेद्य इति विज्ञाय निजगादेति '**गौतम** ! ॥२५२॥
**देवशर्मा** द्विजो ग्रामेऽपरस्मिन्नस्ति स त्वया ।
बोधं प्राप्स्यति तद्धेतोस्तत्र त्वं गच्छ **गौतम**' ! ॥२५३॥
'[2]यदादिशति मे स्वामी'त्युदित्वा च प्रणम्य च ।
जगाम **गौतम**मुनिस्तथा चक्रे प्रभोर्वचः ॥२५४॥
तदा च **कार्तिकदर्श**निशायाः पश्चिमे क्षणे ।
**स्वाति**ऋक्षे वर्त्तमाने कृतषष्ठो जगद्गुरुः ॥२५५॥
कल्याणफलपाकानि, पञ्चपञ्चाशतं तथा ।
तावन्त्यघविपाकानि, जगादाध्ययनानि च ॥२५६॥ युग्मम् ।
षट्त्रिंशत्तम[3]पृष्टव्याकरणान्यभिधाय च ।
**प्रधानं** नामाध्ययनं जगद्गुरुरभावयत् ॥२५७॥

---

१. वैजयन्तो धर्मः B, D । २. यथादिशति । C-२२२ । ३. प्रश्न. । C-२२४ ।

स्वामिनो मोक्षसमयं, विज्ञायासनकम्पतः ।
सुरासुरेन्द्रस्तत्रेयुः, सर्वेऽपि सपरिच्छदाः ॥२५८॥
सहस्राक्षोऽश्रुपूर्णाक्षः, [1]प्रणम्य च जगद्गुरुम् ।
विरचय्याञ्जलिं मूर्ध्नि, ससम्भ्रममदोऽवदत् ॥२५९॥
'गर्भे जन्मनि दीक्षायां, केवले च तव प्रभो ।
हस्तोत्तरर्क्षमधुना [2]तद्गन्ता भस्मकग्रहः ॥२६०॥
विपद्यमानस्य जन्मर्क्षं, क्रमान् स दुर्ग्रहः ।
बाधिष्यते ते सन्तानं, सहस्रे शरदामुभे ॥२६१॥
प्रतिपालय [3]नाथ त्वं, तस्य सङ्क्रमणक्षणम् ।
स यथा त्वत्प्रभावेण, विफलो भवति ग्रहः' ॥२६२॥[4]
स्वाम्यथोचे 'न कोप्यायुः, शक्र ! सन्धातुमीश्वरः ।
विदन्नपि वदस्येवं, किं [5]तीर्थप्रेममोहितः ? ॥२६३॥
प्रवर्त्तनाद् दुषमायास्तीर्थबाधा भविष्यति ।
भवितव्यतानुसाराद्भस्मकस्योदयोऽप्यभूत्' ॥२६४॥
[6]वज्रिणं बोधयित्वैवं सार्धषण्मासवर्जितम् ।
त्रिंशदब्दीं केवलित्वे, परिपाल्य जगद्गुरुः ॥२६५॥
पर्यङ्कासननिषिन्नो, योगे कायस्य बादरे ।
स्थितो [7]वाङ्मनसयोगावरोत्सीदथ बादरौ ॥२६६॥
सूक्ष्मं च वपुषो योगमास्थाय परमेश्वरः ।
रूरोध बादरकाययोगं योगविचक्षणः ॥२६७॥
तौ च सूक्ष्मौ वाङ्मनसयोगावप्यरुणत् प्रभुः ।
इति सूक्ष्मक्रियं शुक्लध्यानं चक्रे तृतीयकम् ॥२६८॥

---

१. प्रणम्याऽथ । C-२२६। २. तद्गता A, B । तद्गता C-१२९ । ३. तन्नाथ ।C-१२९ ।
४. अस्यानन्तरं C मध्ये

कुस्वप्ना कुशकुनानि दुर्ग्रहा यान्ति शस्तताम् ।
अन्येषामपि सर्वेषां हृदि त्वां धारयन्ति ये ॥C-२३०॥
किं पुनर्यत्र साक्षात् त्वं स्वामिन् समवतिष्ठसे ।
प्रसीद तत्क्षणं तिष्ठ दुर्ग्रहोपशमोऽस्तु तत् ॥C-२३१॥ इति द्वौ श्लोकावधिकौ स्तः ।

५. तीर्थप्रेमविमोहितः B । ६. श्लोकोऽयं A, C, I मध्ये उपलभ्यते । श्लोकसंख्या २६५ तः २६९ पर्यन्तं श्लोकाः A, C, I मध्ये उपलभ्यन्ते । ७. ०मनसो योगा A ।

D:\chandan/new/kalp-1/pm5\3rd proof

अपि सूक्ष्मं तनुयोगं, विनिरुध्य जगद्गुरुः ।
समुच्छिन्नक्रियं शुक्लध्यानं तुर्यं दधावथ ॥२६९॥
[१]पञ्चर्हस्वाक्षरोच्चारमितकालेन तेन तु ।
ध्यानेन तुर्येण तुर्यपुमर्थाव्यभिचारिणा ॥२७०॥
[२]एरण्डबीजवद्बन्धाभावादूर्ध्वगतिः प्रभुः ।
यथा स्वभावऋजुना मोक्षमेकमुपाययौ ॥२७१॥
निर्वाणे स्वामिनि ज्ञानदीपके द्रव्यदीपकान् ।
तदानीं रचयामासुः, सर्वेऽपि पृथिवीभुजः ॥२७२॥
तदाप्रभृति लोकेऽपि, [३]पर्व **दीपोत्सवा**भिधम् ।
सर्वतो दीपकरणात्, तस्यां रात्रौ प्रवर्त्तते ॥२७३॥
गोशीर्षचन्दनादीनि, चानाय्योत्तरसङ्क्रियाम् ।
श्री**वीर**जिनदेहस्य, कारयामास वासवः ॥२७४॥[४]
*इतश्च प्रभुनिर्वाणं, श्रुत्वा चेतस्यचिन्तयत् ।
'ईदृशे निर्ममे **वीरे** ममत्वं क्रियते कथम्' ? ॥२७५॥
इति चिन्तयतस्तस्य, [५]**गौतम**स्य महामुनेः ।
उत्पेदे केवलज्ञानं महाकारि सुरासुरैः ॥२७६॥
[६]निर्वीरां क्षितिमाप्य मोहचरटो लुण्ठन्नलं सर्वतो,
दृष्टः श्रीगणनायकेन भणितो मे राज्यमेतन्न किम् ? ।
जानासि त्वमहो मुमूर्षुरधुना यासीति दूरे किय-
न्नष्टो दीपकै[७]र्जनैर्निजगृहात् सर्पच्छला त्रास्यते ॥२७७॥ [शार्दूल...]

---

१. ततः पञ्च B । २. एरण्डफलवत् B । ३. सर्वदीप B । ४. श्लोकोऽयं A, C, D, G, H, K, L मध्ये नास्ति, २७४ तः २७८ पर्यन्तं श्लोकाः A, C, D मध्ये न सन्ति । ५. केवलज्ञानमुज्ज्वलं तत्रोत्पेदे **गौतम**स्य महिमाऽकारि सुरासुरैः । B । ६. श्लोकोऽयं केवलं A, I मध्ये अस्ति । ७. अत्र चतुर्थपादे जनैः – इति पदं न दृश्यते ।

** इतश्च प्रभो निर्वाणं० ॥२७५॥ इति श्लोकानन्तरं भिन्नभिनप्रतिषु यो यावान् पाठ दृश्यते तदत्रोधृत्य प्रकाश्यते ।

D इतश्च प्रभोर्निर्वाणं श्रुत्वाऽथ **गौतम** ईदृशे निर्ममे कथं ममत्वं क्रियते । इति चिन्तयतः केवलज्ञानमुत्पेदे भगवतः । अत्र केवली महिमा विदधे श्री **गौतम**स्य सुरेन्द्रादिभिः देवैः । श्री**महावीरचरिता**दुद्धृतश्री**दीपोत्सवकल्पः** समाप्तः ।

[१]जयश्रियं यच्छतु तुभ्यमेष **दीपोत्सवा**ख्यः दिनचक्रवर्त्ती ।
समस्तविश्वत्रितयप्रदत्तराज्योत्सवः साधित**वीर**सिद्धिः ॥२७८॥

**इति श्रीदीपोत्सवकल्पः श्रीहेमाचार्यकृतः समाप्तः ॥***

---

१. असौ श्लोकः F मध्येऽस्ति, अन्यत्र नास्ति ।

E गोशीर्षचन्दनादिभिः शक्रोत्तरक्रियां प्रभोः कारयामास इतश्च प्रभोर्निर्वाणम् । श्रुत्वाथ श्री**गौतम** ईदृशे निर्ममे कथं ममत्वं क्रियते । इति चिन्तयतः केवलमुत्पेदे **गौतमः** महिमा ॥६१॥ श्री**महावीरचरित्रा**दुद्धृतः । संवत् १६३६ वर्षे मार्गशीर्ष वदि १३ दिने **कर्पटवाणिज्य**महानगरे पं. **लावण्यशील**गणिनाऽलेखि श्रीकल्प**दीवालिका**दिने वाचनार्थम् । शुभं भवतु ।

F गोशीर्षचन्दनादीन्यानाय्याभियोगिकैः सुरैः ।
सहोत्तरक्रियां देवैः कारयामास वासवः ॥६१॥

**शक्रेशाना**वूर्ध्वदंष्ट्रे दक्षिणे दक्षिणा ततः ।
अधोदंष्ट्रे तु **चमरः बली** जगृहतुः प्रभोः ॥६२॥

शेषेन्द्राश्च देवाश्च दंतास्थीनि प्रमोदतः ।
नरास्तच्चिताभस्म जगृहुर्भक्तिपूर्वकम् ॥६३॥

इतश्च प्रभुनिर्वाणं श्रुत्वा गणभृद्**गौतमः** ।
ईदृशे निर्ममे **वीरे** ममत्वं क्रियते कथम् ? ॥६४॥ इति

चिन्तयतस्तस्य **गौतम**स्य महामुनेः ।
उत्पेदे केवलं ज्ञानं महाकारि सुरासुरैः ॥६५॥

नि**र्वीरां** क्षितिमाप्य मोहचरटो लुण्ठन्नलं सर्वतो,
दृष्टः श्रीगणनायकेन भणितो मे राज्यमेतन्न किम् ।
जानासि त्वमहो मुमूर्षुरधुना यासीति दूरे किय-
न्नष्टो दीपकरैर्जनैर्निजगृहात्सर्पच्छलात् त्रास्यते ॥६६॥ [शार्दूल....]

जयश्रियं यच्छतु तुभ्यमेष दीपोत्सवाख्यः दिनचक्रवर्त्ती ।
समस्तविश्वत्रितयप्रदत्तराज्योत्सवः साधित**वीर**सिद्धिः ॥६७॥

इति श्री**दीपालिकाकल्पः** श्री**महावीरचरित्रादु**द्धृतः समाप्तः ॥ शुभं भवतु माङ्गल्यम् ।

संवत् १५५९ वर्षे कार्तिकमासे शुक्लपक्षे नवम्यां तिथौ निशापतिर्वासरे उ. श्री **अभयचन्द्रे**णालेखि । यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥श्रीः॥

G हिमाद्रितः समानीतैः गोशीर्षचन्दनादिभिः ।
शक्रोत्तरक्रियां सर्वां कारयामास तु प्रभोः ॥२२॥

इतश्च प्रभोनिर्वाणं श्रुत्वा श्री**गौतमः**-

ईदृशे निर्ममे **वीरे,** कथं ममत्वं क्रियते ।
भगवता लोकव्यवहारोऽपि न पालितः ॥२३॥ (?)

तं पौषधोपवासादि विधायाऽमावसीदिने ।
भावोद्योते गते द्रव्योद्योतदीपालिका व्यधुः ॥२४॥

आगच्छद्भिश्च गच्छद्भिर्देवदेवीगणैस्तदा ।
रात्रिर्ज्योतिमयी साभून्मेराइयरवाकुला ॥२५॥

मर्त्यामर्त्यगवादीनां चक्रे नीरजनाजनैः ।
भस्मकप्रतिघाताय मेराइयरभूत्ततः ॥२६॥

निर्वाणमहिमां भर्तुः समाप्य प्रतिपत्प्रगे केवली महिमां चक्रे शक्रः श्री **गौतम**प्रभोः ।

नि**र्वीरां** क्षितिमाप्य मोहचरटो लुण्ठन्नलं सर्वतो,
दृष्टः श्रीगणनायकेन भणितो मे राज्यमेतन्न किम् ।
जानासि त्वमहो मुमूर्षुरधुना यासीति दूरे किय-
न्नष्टो दीपकरैर्जनैर्निजगृहात् सर्पच्छलात्त्रास्यते ॥२७॥ [शार्दूल....]

**नन्दिवर्धन** राजाप्यभुञ्जानो निर्वृते प्रभोः ।
**सुदर्शना** स्वसाऽभ्यर्थ्य द्वितीयायामभोज्यत ॥२८॥

ततो भ्रातृद्वितीयाभूद्विरज्यते वसुधातले ।
सम्प्रते सांप्रतं ते न रज्यते दीपालिकाजने ॥२९॥

राजा पुनः स्माह भोगो वस्त्रान्नपानादिविशेषाद् गेहमण्डनम् ।
अन्यो व्यञ्जनजोत्काराः कस्मादस्मिन् दिने प्रभो ॥३०॥

सूरिः ईहै**वोज्जयिनी**पुर्यां समवासरदेकदा ।
श्री**मुनिसुव्रत**स्वामिशिष्यः श्री **सुव्रतो** गुरुः ॥३१॥

तं नन्तुमाययौ राजा श्री**धर्म**सचिवोऽस्य च ।
**नमुचि**र्विवदन् जिग्ये क्षुल्लकेन चुकोप सः ॥३२॥

हन्तुं मुनीन् कृष्टखड्गो देव्यासौ स्तम्भितो निशि ।
राजा विस्मितेन साधून् क्षामित्वा मोचितः प्रगे ॥३३॥

लज्जितो **नमुचि**र्नंष्ट्वा प्रययौ **हस्तिनापुरे** ।
तत्र **पद्मोत्तरो** राजा **ज्वालादेव्य**स्ति तत्प्रिया ॥३४॥

तत्पुत्रो **विष्णुकुमारः महापद्मो** बभूवतुः ।
ज्येष्ठानिच्छति **पद्माय** यौवराज्यमदात् पिता ॥३५॥

तन्मन्त्री **नमुचिः** सोऽभूत् जिग्ये **सिंहरथं** रिपुम् ।
**पद्म**स्तुष्टो वरं प्रादात् न्यासी च **केश**मन्त्रिणा ॥३६॥

एकदा क्षालयाराइयाकारित आर्हतो रथः ।
मिथ्यादृष्टया ते सपत्न्या **लक्ष्म्या** ब्रह्मरथः पुनः ॥३७॥
रथाकृष्टतयोर्वादे राजा द्वावप्यवारयत् ।
मातुर्वीक्ष्यापमानं नु **पद्मो** देशान्तरं ययौ ॥३८॥
ऊढा **मदनावलीको** जितषट्खण्डभारतः ।
**महापद्मः** पुरायातः पिता राज्ये न्यवेश्यत ॥३९॥
समं **विष्णुकुमारेण** स्वयं **पद्मोत्तरो** नृपः ।
**सुव्रता**चार्यपदान्ते प्रव्रज्य च दिवं ययौ ॥४०॥
मुनि**र्विष्णुकुमार**स्य षष्टिवर्षशतान्यथ ।
तपस्यतः समुत्पन्ना लब्धयो विक्रियादिका ॥४१॥
चक्रवर्ती **महापद्मो** अर्हच्चैत्यै र्भूषितावनिः ।
मातुर्मनोरथापूर्त्यै रथयात्रोत्सवं व्यधात् ॥४२॥
ययाचे **नमुची** राज्यं वरेणाथ कृतो कृते ।
चक्री च तस्मै तद् दत्त्वा स्वयमन्तःपुरेऽविशत् ॥४३॥
तदा श्री **सुव्रताचार्यो** वर्षासु **हस्तिनापुरे** ।
चतुर्मासाभिग्रहेण तत्रास्थुः सपरिच्छदाः ॥४४॥
अन्यदा **नमुचिः** सूरीन् दृष्ट्वा वैरमनुस्मरन् ।
अवोचल्लिङ्गिनः सर्वे त्वद्वर्जं मामुपस्थिताः ॥४५॥
स्थातव्यं तन्न मद्भूमौ सप्ताहोपरि साधुभिः ।
यः स्थाता तं हनिष्यामि सङ्घं पृष्ट्वाऽथ सूरिभिः ॥४६॥
प्रहित्य मुनिमाहूतो **विष्णुर्मेरु**शिखास्थितः ।
**नमुचि**वर्जा राजानो **विष्णुं** वीक्ष्य ववन्दिरे ॥४७॥
ऊचे **विष्णु**र्यान्ति पूर्णाभिग्रहा साधवः स्वयम् ।
तद्देहि कियतीं भूमिं ते ततोऽस्मै त्रिपदीमदात् ॥४८॥
लक्षयोजनदेहोऽभू**द्विष्णुर्वै**क्रियलब्धितः ।
क्रमौ पूर्वापरां बुध्यो न्यस्य विश्वमकम्पयत् ॥४९॥
क्रमं तृतीयं **नमुचेः** पृष्ठेऽनिष्टमादधे(?) ।
क्षिप्रक्षिप्तस्त्रिविक्रमेणेति रसातलं बली रिपुः ॥५०॥
इन्द्रप्रहितं गन्धर्वगीतोपशमसान्वितः ।
**विष्णुं** स्वभावसंपन्नं चक्रवर्त्यादयोऽनमन् ॥५१॥

**महापद्म**मुपालभ्य कृत्वा सङ्घप्रभावनाम् ।
प्रतिक्रम्य गुरोरन्ते ययौ **विष्णुः** शिवं क्रमात् ॥५२॥

योऽवज्ञाकृन्मुनीन्द्राणां मर्त्यरूपो मृगो हि सः ।
इति लोकप्रबोधार्थं लोकोक्तो **गोहिसोऽभवत्** ॥५३॥

तत्रोत्पाते प्रशान्ते च पुनरुज्जीवितं जगत् ।
संभूय भोजनाच्छादविभूषाद्युत्सवान् व्यधात् ॥५४॥

प्रतिवर्षं तदाद्यत्र दिने प्रवर्तितोत्सवाः ।
**दीपालिवीर**निर्वाणादिति दीपोत्सवो स्थितिः ॥५५॥

चतुर्दश्याममावस्यां षोडशप्रहरावधि ।
कोटीसहितमुत्प्रोषं पूजयेत्छुतमष्टधा ॥५६॥

मृत्वा सहस्रपञ्चाशत् परिवारं हि **गौतम** ! ।
स्वर्णाम्भोजे ततोऽखण्डदीपो बोध्यः सतण्डुलः ॥५७॥

इत्थं सहस्रपञ्चाशद् गुणपुण्यमुपार्ज्यते ।
जैनधर्मरता भव्याः प्राप्नुवन्त्यक्षयं पदम् ॥५८॥

श्रुत्वेति **सम्प्रति**नृपः प्रतिवर्षमेव दीपोत्सवं जनपदेष्वखिलेष्वतो,
तेने श्रीमत्**सुहस्ति**गुरुपादगुरुप्रसादादाप्तं च राज्यमासेव्यजिनधर्मरम्यम् ।
किञ्चिद् ज्ञात्वा श्रुताम्भोधिं किञ्चिद् बहुश्रुताननात्,
कृतो **दीपालिका**कल्पः शोध्यः सद्भिः प्रसद्य सः ॥५९॥

इति चिन्तयतः केवलमुत्पेदे अत्र केवलिमहिमा विस्तार्यते । अयं दीपालिकाकल्पः समाप्तः ॥६०॥ शुभं भवतु ।

श्री**महावीरचरिता**दुद्धृतः श्री**जिनप्रभ**सूरिभिः पंडितश्री **वस्ता**गणिः ॥६१॥

H प्रभोर्देहस्य संस्कारक्रियां गोशीर्षचन्दनैः ।
देवेन्द्रः कारयामास पुष्पवृष्ट्यादिपूर्वकम् ॥६९॥

इतश्च स्वामिनो मोक्षं श्रुत्वा श्री**गौतमो** प्रभुः ।
अचिन्तयदियं चित्ते निर्ममः कीदृशो जिनः ॥७०॥

ईदृशे निर्ममे **वीरे** मुधा मोहं व्यधामहम् ।
येन निर्वाणसमये स्वस्यात्र प्रेषितोऽमुना ॥७१॥

निर्मोहभावनापीत्थ**मिन्द्रभूति**र्गणेशितुः ।
भावयतोऽजायत क्षिप्रं केवलज्ञानमुज्वलम् ॥७२॥

सुरेन्द्रप्रमुखैर्देवैस्ततो निःप्रतिमो महः ।
वितेने हर्षकल्लोललीलोल्लसितमानसैः ॥७३॥

ततश्च धरणीपीठे प्रथमो गणनायकः ।
विजहार चिरं भूरि भव्यजीवप्रबोधकः ॥७४॥ इति **दीवालीकल्पः मणिविजय**लिखितः ॥

J गोशीर्षचन्दनादिभिः शक्रोत्तरक्रियां प्रभोः कारयामास। प्रभोनिर्वाणं श्रुत्वाऽथ **गौतमो**ऽचिन्तयदिति ईदृशे निर्ममे कथं ममत्वं क्रियते। इति चिन्तयतो भगवतोऽपि केवलं ज्ञानमुत्पेदे। महिमा सुरेन्द्रादिभिः कृतः। ते पौषधोपसादि विधायामावसीदिने। भावोद्योतेगते द्रव्योद्योतदीपालिकां व्यधुः।

शिष्टं सर्वं G प्रत इव ॥ शरयुगशिखिशशिवर्षे शिष्यः श्री**रत्नसिंह**सूरीणां श्री**विनयचन्द्र**सूरिश्चिक्रे **दीपालिकाकल्पम्** । इति **दीपालिकाकल्पः** संपूर्णः शुभं भवतु कल्याणमस्तु । संवत् १६५६ । वर्षे कार्त्तिक सुदि १३ संपूर्णम् । ग्रं-३१६

K प्रभोर्देहस्य संस्थार(संस्कार ?)क्रियां गोशीर्षचन्दनैः ।
देवेन्द्रः कारयामास पुष्पवृष्ट्यादिपूर्वकम् ॥६२॥
इतश्च स्वामिनो मोक्षं श्रुत्वा श्री**गौतमः** प्रभुः ।
अचिन्तयदिदं चित्ते निर्ममः कीदृशो जिनः ॥६३॥
ईदृशे निर्ममे **वीरे** मुधा मोहं दधाम्यहम् ।
येन निर्वाणसमये स्वस्यात्र प्रेषितोऽमुना ॥६४॥
निर्मोहभावनामित्थ**मिन्द्रभूते**र्गणेशितुः ।
भावयतोऽजायत क्षिप्रं केवलज्ञानमुज्ज्वलम् ॥६५॥
सुरेन्द्रप्रमुखैर्देवैस्ततो निःप्रतिमो महः ।
वितेने हर्षकल्लोललीलोल्लासितमानसः ॥६६॥
ततश्च धरणीपीठे प्रथमो गणनायकः ।
निजहार चिरं(?) भूरि भव्यजीवप्रबोधकः ॥६७॥ इति **दीपालिकाकल्पः** ॥

L जगद्गुरुं पुनर्नत्वा व्याख्यायितदृशः सुराः ।
अरेतस्थस्थिते(?) शोचन्तः स्वमनाथकम् ॥२७२॥
शक्रोऽथ धैर्यमालम्ब्य चन्दनादिवनाहृतैः ।
गोशीर्षचन्दनादिभिः शक्र उत्तरक्रियां प्रभोः कारयामास ॥२७३॥

इतश्च प्रभो निर्वाणं श्रुत्वाथ श्री**गौतम** ईदृशे निर्ममे कथं ममत्वं क्रियते इति चिन्तयतः केवलमुत्पेदे । अत्र केवलमहिमा । अयं **दीपालिकाकल्पः** श्री**महावीरचरित्रादु**द्धृत श्री **जिनप्रभसूर्य**भिधमेधोभिः एकान्ते रचयिता । बीरोदशायांराभाभिवपुरस्तपयत्प्रभो (?) विलये पंचदिव्ये नागरागेण स्वयं हरिः । अनन्तरं केचन असंबद्धाः श्लोकाः दृश्यन्ते ।

दोषा समस्ताः प्रलयं प्रयान्तु , परोपकारं कलयन्तु सन्तः ।
श्रीसङ्घमुख्याः सुखिनो भवन्तु , कल्याणवल्ली(ल्ल्यो) फलदा भवन्तु ॥

इति श्री **दीपालिकाकल्पः** कृतः श्री**जिनप्रभ**सूरिणा, लिपीकृतम् ऋ. **केशरीचन्दे**न ॥

इति श्री **दीपालिकाकल्पः** कृतः श्री**जिनप्रभ**सूरीणाम् ॥

### श्रुतस्थविराचार्यदेवश्रीविनयचन्द्रसूरीश्वरविरचितः

# दीपालिकाकल्पः ॥

श्री**वर्द्धमान**मानम्य स्मृत्वा श्री**श्रुतदेवता**म् ।
जैनागमानुसारेण वक्ष्ये **दीपदिन**स्थितिम् ॥१॥

**मौर्या**न्वयनभश्चन्द्र-**चन्द्रगुप्त**नृपाङ्गजः ।
भूपति**र्बिन्दुसारो**ऽभू**दशोकश्री**श्च तत्सुतः ॥२॥

तत्पुत्रस्य **कुणालस्यावन्ति**नाथस्य नन्दनः ।
नृपतिः **सम्प्रति**र्जात-स्त्रिखण्ड**भरता**धिपः ॥३॥

**जीवत्स्वामि**प्रतिमानां वन्दनायान्यदाऽऽययुः ।
**उज्जयिन्यां** श्रीम**दार्य-सुहस्त्या**चार्यकुञ्जरः ॥४॥

एकदा रथयात्रायां दृष्ट्वा तान्नृप**सम्प्रतिः** ।
सञ्जातजातिस्मरणो, नमस्कृत्य व्यजिज्ञपत् ॥५॥

मया द्रमकमात्रेण प्रसादाद्भवतामिदम् ।
प्राप्तं राज्यं तु गृह्णीध्व-मनुगृह्णीत मां प्रभो ! ॥६॥

**श्रीसुहस्तिरुवाच –**

राज्यं न कल्पतेऽस्माकं निःस्पृहाणां वपुष्यपि ।
त्वं मोक्षवृद्धिबीजे तु सम्यक्त्वे निश्चलो भव ॥७॥

संपूज्याः श्रीमदर्हन्तः पर्युपास्याः सुसाधवः ।
दयादानादिको धर्मः कर्त्तव्यः सर्वपर्वसु[१] ॥८॥

**राजा उवाच –**

पर्युषणादिपर्वाणि जैना एव विदन्ति यत् ।
ख्यातं **दीपालिका**पर्व लोके लोकोत्तरे कुतः ? ॥९॥

---

१. कर्मसु ।

**श्रीसुहस्तिरुवाच –**

**प्राणता**द्दशमात् कल्पात् विंशतिसागरस्थितेः ।
**पुष्पोत्तरपुण्डरीक**महाविमानतश्च्युतः ॥१०॥
द्वीपेऽत्र **जम्बूद्वीपा**ख्ये क्षेत्रे **भरत**नामनि ।
अस्यामेवावसर्पिण्यां व्यतिक्रान्तेऽरकत्रये ॥११॥
अर्द्धनवमासाधिकपञ्चसप्ततिवत्सरैः ।
ऊने गते चतुर्थारे पूर्वतीर्थङ्करोदितः ॥१२॥
भगवान् श्री**महावीरो** ज्ञानत्रयपवित्रितः ।
**आषाढे विमले षष्ठ्यां** धिष्ण्ये **हस्तोत्तरा**भिधे ॥१३॥
**ब्राह्मणकुण्ड**ग्रामेऽत्र**र्षभदत्त**द्विजन्मनः ।
**देवानन्दा**ख्यभार्यायाः स्वामी कुक्षाववातरत् ॥१४॥
पूर्वरात्रापररात्रे काले सा सुप्तजागरा ।
**देवानन्दा** ददर्शेमान् महास्वप्नांश्चतुर्दश ॥१५॥
गजो[१] वृषो[२] हरि[३]र्लक्ष्मी[४] दामे[५]न्दु[६]र्कौ[७] ध्वज[८] घटः[९] ।
पद्मसरः[१०] समुद्रश्च[११] विमानं[१२] मणयः[१३] शिखी[१४] ॥१६॥
साऽऽख्यत् **ऋषभदत्ता**य स्वप्नान् सोऽपि विचारयन् ।
अर्थ-भोग-पुत्र-सौख्य-लाभकरा अमी प्रिये ! ॥१७॥
सर्वलक्षणसंपूर्णो वेद-वेदाङ्गपारगः ।
साधिकैर्नवभिर्मासैस्तव पुत्रो भविष्यति ॥१८॥
**देवानन्दा** तदाकर्ण्य धाराहतकदम्बवत् ।
उच्छ्वसितरोमकूपा तद्वाक्यमभ्यनन्दयत् ॥१९॥
तस्मिन् काले देवराजो वज्रपाणिः पुरन्दरः ।
शतक्रतुः सहस्राक्षो मघवा पाकशासनः ॥२०॥
विमानलक्षद्वात्रिंश-दधीशो दक्षिणाधिपः ।
इन्द्रसमचतुरशीतिसहस्रश्च सुरेश्वरः ॥२१॥
अष्टाग्रमहिषीनाथो लोकपालचतुष्टयः ।
सप्तसेनाधिपाधीशः परिषत्त्रितयान्वितः ॥२२॥

D:\chandan/new/kalp-1/pm5\3rd proof

चतुर्गुणैश्चतुरशीतिसहस्त्रैरङ्गरक्षकैः ।
सेवितो देवदेवीना-माधिपत्यं प्रपालयन् ॥२३॥
भुञ्जानो विविधान् भोगान् शक्रः सौधर्मनायकः ।
**जम्बूद्वीपं** केवलीव प्रश्यन्नवधिना ततः ॥२४॥
ददर्श श्री**महावीर**-मवतीर्णं द्विजौकसि ।
सिंहासनादथोत्थाय विमुच्य मणिपादुके ॥२५॥
एकशाटोत्तरासङ्गः पादसप्ताष्टकं गतः ।
वामं जानुं निरालम्बं दक्षिणं न्यस्य भूतले ॥२६॥
मूर्ध्ना प्रणम्य त्रिःकृत्वा ललाटघटिताञ्जलिः ।
शक्रः शक्रस्तवेनोच्चैस्तुष्टाव परमेश्वरम् ॥२७॥
तत्र गतं भगवन्तं वन्दे चाहमिह स्थितः ।
स्वामी पश्यतु मामित्थं स्तुत्वा शक्रो व्यचिन्तयत् ॥२८॥
नैतद्भूतं भवति वा भविष्यद्वा कथञ्चन ।
यदर्ह-च्चक्रि-बलभृत्-वासुदेवादिपुरुषाः ॥२९॥
कृपण-ब्राह्मण-प्रान्त-तुच्छ-भिक्षु-दरिद्रिणाम् ।
कुले किल न जायन्ते जायन्ते वा जनुर्न तु ॥३०॥
इक्ष्वाकु-हरिवंशो-ग्र-भोग-राजन्य-चक्रिणाम् ।
क्षत्रियाणां कुलेष्वेव शलाकानृजनिर्भवेत् ॥३१॥
अनन्तकालादाश्चर्यं लोके स्यादेतदप्यथ ।
अक्षीणस्य प्रभावाद्वा नीचैर्गोत्रस्य कर्मणः ॥३२॥
जीतमेतत् सुरेन्द्राणां यदर्हन्तोऽधमात् कुलात् ।
नीयन्ते गर्भव्युत्क्रान्त्या जन्महेतोर्महाकुले ॥३३॥
तदथ श्री**महावीर**मायान्तं ब्राह्मणौकसि ।
हरिनैगमेषीपार्श्वात् प्रापयाम्युत्तमे कुले ॥३४॥
स्मरणमात्रोपनतं पदात्यनीकनायकम् ।
अथादिक्षत् सहस्त्राक्षः प्राञ्जलिं [१] प्राञ्जलाशयः ॥३५॥

---

१. मनोहरः ।

व्रज सेनापते ! शीघ्रं **जम्बूद्वीप**स्य **भारते** ।
ब्राह्मणकुण्डग्रामेऽत्रर्षभदत्तद्विजौकसि ॥३६॥
संहृत्य **देवानन्दा**याः गर्भाद्**वीर**जिनेश्वरम् ।
**क्षत्रियकुण्ड**ग्रामाख्ये पुरे ज्ञातकुलेशितुः ॥३७॥
श्री**सिद्धार्थ**नरेन्द्रस्य क्षत्रियाणां शिरोमणेः ।
राज्ञ्या श्री**त्रिशला**देव्या गर्भे संक्रामय क्रमात् ॥३८॥
गर्भं च **त्रिशला**देव्या **देवानन्दो**दरं नय ।
दुर्घटेन सदा कार्ये त्वदधीना हि सिद्धयः ॥३९॥
देवेन्द्रस्य तदादेशं मूर्ध्नादाय चमूपतिः ।
गत्वेशान्यां च विदधे समुद्घातं च वैक्रियम् ॥४०॥
सङ्ख्यातयोजनायामं दण्डं चक्रे च तद्यथा ।
मसारगल्ल-वैडूर्य-वज्र-सौगन्धिकाञ्जनाः ॥४१॥
लोहिताक्ष-हंसगर्भा-पुलका-सुभगाश्चये ।
रिष्टाञ्जन-पुलकाश्च जातरूपाश्च राजताः ॥४२॥
ज्योतीरसाङ्क-स्फटिकाः तेषां बादरपुद्गलान् ।
त्यक्त्वादाय तदा सूक्ष्मान् वैक्रियं रूपमादधे ॥४३॥
चण्ड-चपलाप-वातोद्धुताभिर्गतिभिर्व्रजन् ।
संप्राप ब्राह्मणावासं यत्राऽस्ति परमेश्वरः ॥४४॥
कृत्वा प्रणाममालोक्याऽपहृत्याऽशुभपुद्गलान् ।
दत्त्वाऽवस्वापिनीं मातुः प्रक्षिप्य शुभपुद्गलान् ॥४५॥
अनुज्ञाप्य जगन्नाथं गृहीत्वा करसंपुटे ।
**क्षत्रियकुण्डग्रामे**ऽसौ ययौ **सिद्धार्थ**मन्दिरे ॥४६॥
कुक्षौ श्री**त्रिशला**देव्या व्याबाधारहितं विभुम् ।
अवस्वापिनीकापूर्वं स तथैव न्यवेशयत् ॥४७॥
निवेश्य पूर्वगर्भं च **देवानन्दो**दरे रयात् ।
तथैव गत्वा स स्वर्गमाज्ञां प्रत्यर्पयद्धरेः ॥४८॥
**कृष्णाश्विनत्रयोदश्या**मृक्षे **हस्तोत्तरा**भिधे ।
द्व्यशीतिदिवसान्तेऽभूद्विभोर्गर्भव्यतिक्रमः ॥४९॥

**देवानन्दा** च तद्रात्रौ महास्वप्नांश्चतुर्दश ।
हृतानपश्यत् **त्रिशला**देव्या दिव्यगजादिकान् ॥५०॥
अथ दिव्यकृतोल्लोचे[१] मणिदीपप्रकाशिते ।
विचित्रपुष्पप्रकरे कालागरुसुधूपिते ॥५१॥
वासौकसि तदन्तस्य पल्यङ्के हंसतूलिके ।
पट्टांशुकप्रतिच्छन्ने रम्यालिङ्गनवर्त्तिके ॥५२॥
गम्भीरे सरजस्त्राणे गङ्गापुलिनकोमले ।
प्रसुप्तजागरावस्था सायाह्नीवारविन्दिनी ॥५३॥
राज्ञी श्री**त्रिशलादेवी** महास्वप्नांश्चतुर्दश ।
पूर्वरात्रापररात्रे कालेऽपश्यदिति क्रमात् ॥५४॥ चतुर्भिः कलापकम् ॥
ददृशे प्रसरद्दानः सप्ताङ्गेषु प्रतिष्ठितः ।
गजराजः सुविस्तीर्णो हस्तप्रोन्नतविंशकः[२] ॥५५॥
देव्या सुष्टुगतिं बिभ्रच्चतुष्पादप्रतिष्ठितः ।
त्रैलोक्यधूर्वह श्वेतो वृषभो वृषसन्निभः ॥५६॥
डकाराकारलाङ्गूलश्चन्द्रांशूपमकेशरः ।
दृष्टो दंष्ट्राकरालास्यो मृगेन्द्रो रौद्रलोचनः ॥५७॥
दिग्गजैः (रभिषिक्ता च) कृताभिषेका सर्वाभरणभूषिता ।
दृष्टा सर्वानवद्याङ्गी पद्मा पद्मनिवासिनी ॥५८॥
सौरभ्यलुभ्यद्भ्रमरं परागैरञ्जिताम्बरम् ।
यशः समुज्ज्वलं दाम ददर्श **त्रिशला** तदा ॥५९॥
चन्द्रः कुवलयानन्दकारी स्वामिस्वभाववत् ।
नरामरोपजीव्यश्रीर्दृष्टो देव्या तमोपहः ॥६०॥
प्रकाशयन्निशामास्यं भव्याम्भोजविकाशकृत् ।
स्वामिन्या ददृशे सूर्यः साक्षात् स्वामिप्रतापवत् ॥६१॥
मेरुचारुलसद्दण्डः स्वर्गङ्गाभपताकिकः ।
मूर्द्धनिविष्टसिंहोऽथ दृष्टो देव्या महाध्वजः ॥६२॥

---

१. चंदरवो । २. (हस्तविंशतिप्रोन्नतः) ।

सत्फलः सुमनोमालापूजितो जिनसन्निभः ।
महोदयप्रदो देव्या ददृशे कलशोत्तमः ॥६३॥
जैनास्थानमिवो[१]च्चक्रं राजहंसोपसेवितम् ।
सुप्रापामृतमैक्षिष्ट देवी पद्मसरोवरम् ॥६४॥
सम्यक्तत्त्वादिरत्नाढ्यं कल्लोलीकृतकेवलम् ।
स्वाम्याशयमिवासाद्यं साऽपश्यत् क्षीरसागरम् ॥६५॥
प्रभोः पूर्वभवस्नेहात् सहायकमिवानघम् ।
सर्वेन्द्रियाह्लादकरं सा विमानमवैक्षत ॥६६॥
सुरशैलमिवोत्तुङ्गं तिग्मांशुमिव भास्वरम् ।
रत्नराशिमपश्यत् सा पुण्यराशिमिव प्रभोः ॥६७॥
ज्योतिर्द्योतितदिग्चक्रो धूतधूमादिकल्मषः ।
देव्या प्रभोः प्रभापिण्डसदृशो ददृशे शिखी ॥६८॥
नभसोऽवतीर्य स्वप्नानेतान् प्रविशतो मुखे ।
दृष्ट्वावधार्य सा राज्ञे मृद्वालापैर्व्यजिज्ञपत् ॥६९॥
राजाख्यत् स्वमतिज्ञानात् शृणु स्वप्नफलं प्रिये ! ।
कल्याणं सुखमारोग्यं भावी ते चोत्तमः सुतः ॥७०॥
श्रुत्वेति **त्रिशला** तुष्टा बद्धाञ्जलिरदोऽवदत् ।
इष्टं युष्माभिरादिष्टं सत्यं चावितथं प्रभो ! ॥७१॥
अथानुज्ञापिता राज्ञा राज्ञी स्वस्थानमाश्रिता ।
धर्मजागरतः शेषां रजनीमत्यवाहयत् ॥७२॥
सज्जयित्वा नृपो बाह्यां सभां कौटुम्बिकैः प्रगे ।
मल्लैः सार्धंनियुद्धेन स्वयं व्यायाममातनोत् ॥७३॥
श्रमरोगहरैस्तेलैर्लक्षपाकादिभिस्ततः ।
त्वग्रोममांसास्थिसुखं (मांसास्थित्वग्रोमानां) [२]छेकैश्चक्रे सुमर्दनम् ॥७४॥
स्नात्वा गन्धजलैर्गन्धकाषायीरूक्षिताङ्गकः ।
देवदूष्यं परिधाय लिप्ताङ्गो हरिचन्दनैः ॥७५॥

---

१. सारी रीते जलमां पडती घुमरी । २. अवसरज्ञैः पुरुषैः ।

D:\chandan/new/kalp-1/pm5\3rd proof

आबद्धमौलिमुकुटः कुण्डलोल्लिखिताननः ।
हारार्द्धहारकेयूरैः कल्पद्रुरिव जङ्गमः ॥७६॥
सकोरिण्टदामछत्रचारुचामरवीजितः[१] ।
नृपतिः शशीवाभ्रेभ्यो निर्ययौ मज्जनौकसः ॥७७॥ त्रिभिर्विशेषकम् ॥
अन्वीयमानमार्गोऽथ बहुभिर्गणनायकैः ।
सेनापतिमहामन्त्रि-कौटुम्बिकमण्डविकैः ॥७८॥
राजेश्वरैस्तलवरैर्गणकामात्यमन्त्रिभिः ।
दौवारिकैः पीठमर्दैर्भटैर्नगरनैगमैः ॥७९॥
सार्थवाहश्रेष्ठिदूतसन्धिपालैश्च भूपतिः ।
आससाद सदस्ताराधिपवत्तारकैर्वृतः ॥८०॥
स्वयं सिंहासनासीनः **त्रिशलां** स महीपतिः ।
तिरस्करिण्यान्तरिते भद्रासने न्यवीविशत् ॥८१॥
अथाकार्य स्वप्नपाठा-नीशान्यामासनाष्टके ।
निवेश्य राजा सच्चक्रे वस्त्रपुष्पफलादिभिः ॥८२॥
स्वप्नानां फलमापृच्छ-त्ते विमृश्य परस्परम् ।
ऊचुश्चैकमतीभूय शृणु स्वप्नफलं विभोः ॥८३॥
द्वाचत्वारिंशत्सुस्वप्ना महास्वप्नादशत्रिकम् ।
एवं द्वासप्ततिः स्वप्नाः स्वप्नशास्त्रेषु कीर्तिताः ॥८४॥
तत्रार्हतां च चक्रिणां वीक्षन्ते मातरः किल ।
चतुर्दश महास्वप्नान् केशवानां तु सप्त तान् ॥८५॥
चतुरो बलदेवाना-मेकं सामान्यभूभृताम् ।
देव्या दृष्टा महास्वप्ना-श्चतुर्दश महाफलाः ॥८६॥
ततः कुलस्य युष्माकं केतुर्दीपोऽवतंसकः ।
तिलकः पर्वताधारो नन्दिवृद्धियशस्करः ॥८७॥
सुकुमारपाणिपादः पूर्णपञ्चेन्द्रियात्मकः ।
लक्षणव्यञ्जनोपेतः मानोन्मानप्रमाणयुक् ॥८८॥

---

१. अवसरज्ञैः पुरुषैः ।

भाविपुत्रः स तारुण्ये चक्री तीर्थङ्करोऽथवा ।
भविष्यति विभोऽवश्यं नाऽन्यथा मुनिभाषितम् ॥८९॥

विपुलां जीविकां दत्त्वा विसृज्य स्वप्नपाठकान् ।
राजा देव्यै तदाचख्या-वभ्यनन्दच्च साऽपि तत् ॥९०॥

तदा च **जृम्भिका** देवा देवाधीशनिदेशतः ।
न्यधुः सर्वनिधानानि **सिद्धार्थ**नृपमन्दिरे ॥९१॥

राजाऽथ **त्रिशला**माह यदाप्रभृति नः कुले ।
पुण्यात्मावततारासौ वर्द्धामहे ततो वयम् ॥९२॥

तस्य पुत्रस्य दास्यामो **वर्द्धमाना**भिधां ध्रुवम् ।
स्वाम्यऽथ सप्तमे मासे स्वमातुरनुकम्पया ॥९३॥

अङ्गोपाङ्गानि सङ्कोच्याऽ-स्थान्मातेति शुशोच च ।
गर्भो मे नैजतीदानीं हृतोऽथ गलितः कथम् ॥९४॥ युग्मम् ॥

हृत्वा दुःखं प्रभुः पित्रोः स्वाङ्गैकदेशकम्पनात् ।
निश्चिक्ये च भविष्यामि न पित्रोर्जीवतोर्व्रती ॥९५॥

नात्याम्लैर्नातिमधुरै-र्नातिरुक्षैर्न शीतलैः ।
पुपोष गर्भमाहारै-र्माता सम्पूर्णदोहदा ॥९६॥

एवं नवसु मासेषु सार्द्धाष्टदिवसेषु च ।
**चैत्रशुक्लत्रयोदश्या**-मिन्दौ **हस्तोत्तरा**भिधे ॥९७॥

निर्मलास्वखिलादिक्षु ग्रहेषूच्चस्थितेषु च ।
विश्वत्रयोद्योतकरं नारकेभ्योऽपि सौख्यदम् ॥९८॥

जरारहितमरुजाजरायुमलवर्जितम् ।
प्राचीव रविमुद्रश्मिं स्वामिनी सुषुवे सुतम् ॥९९॥ त्रिभिर्विशेषकम् ॥

तदा चासनकम्पेन षट्पञ्चाशत्कुमारिकाः ।
ज्ञात्वा दिग्भ्यः समभ्येत्य सूतिकर्म व्यधुर्विभोः ॥१००॥

आसनादि तदेन्द्राणां समस्तानां चकम्पिरे ।
ते चाऽभ्येत्य **मेरु**शृङ्गे जिनजन्मोत्सवं व्यधुः ॥१०१॥

तद्रात्रौ **जृम्भका** देवाः **सिद्धार्थ**नृपमन्दिरे ।
ववृषुः स्वर्णरत्नादि-वस्त्रपुष्पफलादिकम् ॥१०२॥

**भवनव्यन्तरज्योति-वैमानिक**सुरैः प्रभोः ।
निर्वर्तितेऽभिषेके च श्री**सिद्धार्थ**नरेश्वरः ॥१०३॥
अकारयद् गुप्तिमुक्तिं मानोन्मानप्रवर्द्धनम् ।
पताकातोरणाद्याढ्यां सबाह्याऽभ्यन्तरां पुरीम् ॥१०४॥ युग्मम् ॥
दिवि दुन्दुभयो नेदुर्वारनार्यः प्रनर्त्तिताः ।
सौवर्णयूपमूशल-सहस्राण्युच्छ्रितानि च ॥१०५॥
अनुत्तमर्णाधर्मण-मशुल्कमकरं पुरम् ।
दशाह्नि **वर्धमानं** च नृपो वर्धापनं व्यधात् ॥१०६॥
सूर्याचन्द्रमसोश्चक्रे तृतीयेऽहनि दर्शनम् ।
षष्ठे धर्मजागरिकां शुद्धं चैकादशे दिने ॥१०७॥
निमन्त्र्य द्वादशे चाऽह्नि संभोज्य स्वजनं जनम् ।
**वर्द्धमान**कुमारोऽस्या-भिधानं गौणमादधे ॥१०८॥
प्रभोः **काश्यप**गोत्रस्य नामधेयं त्रयं व्यधुः ।
पितृदत्तं **वर्द्धमानः श्रमणः सहसंभव**म् ॥१०९॥
देवैर्दत्तं **महावीरः श्रमणो भगवानि**ति ।
पितुर्नामानि **सिद्धार्थः श्रेयांसश्च यशश्विकः** ॥११०॥
मातुर्नामानि **त्रिशला विदेहा प्रियकारिणी** ।
पितृव्यस्तु **सुपार्श्वः सुदर्शना** स्वसा प्रभोः ॥१११॥
**नन्दिवर्धन**नामा च ज्येष्ठो भ्राता प्रभोरभूत् ।
**कौडिन्य**गोत्रभार्या च **यशोदा** राजकन्यका ॥११२॥
नामद्वयं सुतायाश्चाऽ-**नवद्या प्रियदर्शना** ।
दौहित्र्या अपि नाम्नी द्वे **शेषवती यशोवती** ॥११३॥
सप्तहस्तप्रमाणाङ्गः स्वर्णाभः सिंहलाञ्छनः ।
ववृधेऽष्टाग्रसहस्र-लक्षणैर्लक्षितः प्रभुः ॥११४॥
अथ स्वर्गतयोः पित्रो-र्व्रतायाभ्युद्यतः प्रभुः ।
**नन्दिवर्द्धनो**परोधात् तस्थौ वर्षद्वयं गृहे ॥११५॥
लोकान्तिकसुरैरेत्य विज्ञप्तो विनयाद्विभुः ।
जय भगवान् बुध्यस्व नाथ तीर्थं प्रवर्तय ॥११६॥

ज्ञानेन दीक्षासमयं विज्ञाय भगवानथ ।
सांवत्सरिकमारेभे दानं दातुं किलेप्सितम् ॥११७॥
[1] अशीतिलक्षैरधिका तथाऽष्टाशीतिकोटिभिः ।
संवत्सरेण स्वर्णस्य दत्ता कोटिशतत्रयी ॥११८॥
**मार्गस्य कृष्णदशम्यां** कृतषष्ठतपाः प्रभुः ।
सुरासुरनराधीशैर्दीक्षार्थमभ्यनन्दयन् ॥११९॥
**चन्द्रप्रभा**शिबिकाया-मारुह्याहनि पश्चिमे ।
अनुगम्यमानमार्गः सदेवमनुजासुरैः ॥१२०॥
मङ्गलकल्याणवाग्भिः स्तूयमानश्च बन्दिभिः ।
नन्द जीव जयाविघ्नं तेभ्यः शृण्वंस्तथाऽऽशिषः ॥१२१॥
वीक्ष्यमाणोऽक्ष्णां सहस्रैः दृश्यमानोऽङ्गुलीगणैः ।
नरनारीसहस्राणां प्रतीच्छन्प्रणताञ्जलीन् ॥१२२॥
हृद्भिरभिनन्द्यमानः प्रार्थ्यमानो मनोरथैः ।
**क्षत्रियकुण्ड**ग्रामाख्या-न्निर्गत्य **ज्ञातनन्दनः** ॥१२३॥
सर्वबलेन सर्वद्ध्या ज्ञातखण्डवने प्रभुः ।
समुत्तीर्य शिबिकाया **अशोक**स्य तरोरधः ॥१२४॥
विमुच्य सर्वालङ्कारान् लुञ्चित्वा केशसंचयम् ।
**सुव्रते** दिवसे स्वामी मुहूर्त्ते **विजये** तथा ॥१२५॥
एकेन देवदूष्येण स्कन्धन्यस्तेन वज्रिणा ।
एकः प्रपेदे भगवा-नगारादनगारिताम् ॥१२६॥ अष्टभिः कुलकम् ॥
अपानकेन षष्ठेन कृत्वा सिद्धनमस्कृतिम् ।
सामायिकं प्रपद्याथ **मनःपर्यवमा**सदत् ॥१२७॥
अथो नरामरनाथं नत्वा जग्मुर्निजालयम् ।
प्रभो[2]**र्बहुल**गेहेऽभू-त्परमान्नेन पारणम् ॥१२८॥
वर्षमासाधिकं चेली स्वाम्यचेलस्ततः परम् ।
पञ्चसमितिस्त्रिगुप्तो मौनी पाणिपतद्ग्रहः ॥१२९॥

---

१. अर्थ—त्रण अबज अठ्यासी क्रोड अने एंशी लाख सुवर्णनुं दान एक वरसमां आप्युं ॥
२. बहुलबाह्मणगृहे ।

तिर्यग्नृदेवविहितो-पसर्गाणां तितिक्षकः ।
क्रोधमानमायालोभ-वर्जितो विजितेन्द्रियः ॥१३०॥
गगनमिवानालम्बोऽप्रतिबद्धश्च वायुवत् ।
गुप्तेन्द्रियः कूर्म इव शुद्धहृच्छरदिन्दुवत् ॥१३१॥
अनाश्रवः प्रशान्तात्मा मुक्ताम्बुकांस्यपात्रवत् ।
नीरङ्गसंखवज्जीव इवाऽव्याहतसद्गतिः ॥१३२॥
खड्गिशृङ्गमिवैकाकी विप्रमुक्तो विहङ्गवत् ।
[१]भारण्ड इवाऽप्रमत्तः शौण्डीरः कुञ्जरो यथा ॥१३३॥
वृषभ इव जातस्थामा (जातस्थामेव वृषभो) दुर्द्धर्षः सिंहवत्सदा ।
मन्दर इवाऽप्रकम्पो गम्भीरः सागरो यथा ॥१३४॥
चन्द्र इव सौम्यलेश्यो [२]दीप्ततेजाश्च सूर्यवत् ।
काञ्चनवज्जातरूपः सर्वंसहः क्षितिर्यथा ॥१३५॥
हुताशनवज्ज्वलत्तेजाः परीषहचमूसहः।
द्रव्यक्षेत्रकालभावे-ष्वप्रतिबन्धबन्धुरः ॥१३६॥
वासीचन्दनयोर्लेष्टु-स्वर्णयोः सुखदुःखयोः ।
निन्दास्तुत्योः समानश्च समः संसारमोक्षयोः ॥१३७॥
एवं द्वादशवर्षाणि पक्षाश्चैव त्रयोदश ।
ग्रामे विहृत्यैकरात्रं नगरे पञ्चरात्रिकम् ॥१३८॥
**वैशाखशुक्लदशम्यां** पौरुषीशेषकेऽहनि ।
**ऋजुवालि**नदीतीरे **जृम्भिक**नगराद्बहिः ॥१३९॥
व्यावृतचैत्यनिकटे श्यामाकस्य कुटम्बिनः ।
क्षेत्रे **काष्ठकरणा**ख्ये **शाला**भिधतरोरधः ॥१४०॥
उत्कटिकानिषद्यायां गोदोहिकासनस्थितः ।
अपानकेन षष्ठेन धिष्ण्ये **हस्तोत्तरा**भिधे ॥१४१॥
ध्यानान्तरे वर्त्तमानो लोकालोकप्रकशकम् ।
श्रमणो भगवान् **वीरः** केवलज्ञानमासदत् ॥१४२॥ चतुर्दशभिः कुलकम् ॥

---

१. एकोदराः पृथग् ग्रीवास्त्रिपदामर्त्यभाषिणः भारण्डपक्षिणस्तेषां मृतिर्भिन्नफलेच्छया ।
२. द्रव्यतो देहकान्त्या, भावतो ज्ञानेन ।

D:\chandan/new/kalp-1/pm5\3rd proof

सुरैः समवसरणं चक्रे स्वामी च देशनां ।
बभूवु**रिन्द्रभूत्या**द्या एकादश गणाधिपाः ॥१४३॥
शिष्यसंख्या गणेशानां पञ्च पञ्चशतीयुताः ।
द्वावध्येष्टशतैर्युक्ता-श्चत्वारः त्रिशतीवृताः ॥१४४॥
वर्षा चतुर्माससंख्या विभोरेवं व्रतादभूत् ।
प्रथम**मस्थिक**ग्रामे त्रितयं **पृष्ठचम्पयोः** ॥१४५॥
**वैशालीवाणिज**ग्राम-निश्रया द्वादशाभवन् ।
**नालन्दाराजगृहयो**-र्निश्रया तु चतुर्दश ॥१४६॥
**मिथिला**यां षडभवन् **भद्रिका**यां पुनर्द्वयम् ।
एक**मालम्भिका** पूर्या-मेकं **प्रणीतभूम्य**भूत् ॥१४७॥
**श्रावस्त्या**मेकमेकं तु मध्यमा **पापका**पुरी ।
**हस्तिपाल**नृपस्याभू-**द्रज्जुका**भिधसंसदि ॥१४८॥
अपश्चिमचतुर्मास्यां स्वायुषः स्वल्पतां विदन् ।
लोकानुकम्पया स्वामी विशेषाद्धर्ममादिशत् ॥१४९॥
नन्तुं तदागतो भूपः **पुण्यपालो** व्यजिज्ञपत् ।
अष्टौ स्वप्ना मया दृष्टा नाथ ! तत्फलमादिश ॥१५०॥
जीर्णशालास्थितो **हस्ती** चापल्यं कुरुते **कपिः** ।
बब्बूलैर्वृत्त**क्षीरद्रुः काका** न दीर्घिकारताः ॥१५१॥
**सिंह**शबमथाधृष्य-मस्थाने **कमलोद्भवः** ।
ऊखरोर्व्यां **बीजवापः स्वर्णकुम्भा** मलाविलाः ॥१५२॥
स्वामी स्वप्नफलं प्राह जीर्णशाला गृहाश्रमः ।
गृही गजो व्रतशालां नापद्यप्यादरिष्यति ॥१५३॥
कपिवच्चपलाः सत्त्वा भविष्यति श्लथा व्रते ।
रोत्स्यन्ते लिङ्गबब्बूलैः श्राद्धाः क्षीरद्रुमा इव ॥१५४॥
काकवद्दीर्घिकायां न गच्छे स्थास्यन्ति साधवः ।
कुतीर्थिश्वापदाऽधृष्यं सिंहवज्जिनशासनम् ॥१५५॥
शबवन्निःप्रभावत्वा-ल्लक्ष्यन्ते कृमिवन्मतैः ।
उत्तमा नीचगोत्रेषु कमलानीव भाविनः ॥१५६॥

D:\chandan/new/kalp-1/pm5\3rd proof

अपात्रोखरे वप्स्यन्ति वित्तबीजानि गेहिनः ।
यतयो भाविनो भ्रष्टाः सकिट्टाः कलशा इव ॥१५७॥
श्रुत्वेत्थं व्रतमादाय पुण्यपालो दिवं ययौ ।
प्रपच्छ **गौतम**स्वामी स्वामिन् ! किं भाव्यतः परम् ॥१५८॥
स्वाम्यूचे मम निर्वाणात् पञ्चमारो लगिष्यति ।
एकोननवति पक्षे-ष्वतिक्रान्तेषु **गौतम** ! ॥१५९॥
ततो वर्षचतुःषष्ट्यां **जम्बू**नाम्नि शिवङ्गते ।
[१]केवल[२]मनः[३]परमाऽ[४]वध्याहारकदेहीनाम् ॥१६०॥
[५]क्षपको[६]पशम[१०]श्रेण्योः [७]पुला[८]कजिनकल्पयोः ।
[९]संयमत्रिकसिद्धीनां भाव्यभावोऽत्र **भारते** ॥१६१॥
सप्तत्यग्रे वर्षशते **स्थूलभद्रे** दिवं गते ।
चतुःपूर्वाद्यसंस्थानं महाप्राणं च नश्यति ॥१६२॥
पुराणि ग्रामतुल्यानि ग्रामाः स्मशानसन्निभाः ।
यमदण्डसमा भूपाः दासरूपाः कुटुम्बिनः ॥१६३॥
एके तपोगौरविता धर्मक्रियाश्लथाः परे ।
साधवोऽपि भविष्यन्ति परस्परं समत्सराः ॥१६४॥
सप्तत्यग्रचतुःशत्या वर्षाणां **विक्रमो** नृपः ।
दशमपूर्विच्छेदः श्री**वज्र**स्वामिना समम् ॥१६५॥
चतुर्दशाधिकैकोनविंशत्यब्दशतेष्वथ ।
चैत्राष्टम्यां सार्पविष्टौ **पाटलीपुर**पत्तने ॥१६६॥
**कल्कीम्लेच्छ**कुले भावी पातश्च **कृष्ण**सद्मनः ।
तदा दुर्भिक्षडमर-रोगैः पीडिष्यते जनः ॥१६७॥

**कल्की जन्मकुंडली ॥**



**नन्द**स्वर्णं जनाज्ज्ञात्वा गृहीत्वा स्तूपपञ्चकान् ।
अष्टादशवर्षावधेः **कल्की** राजा भविष्यति ॥१६८॥
षट्त्रिंशत्वत्सरो भावी त्रिखण्ड**भरता**धिपः ।
खानं खानं निधानानि ग्रहीष्यति स सर्वतः ॥१६९॥
**लवणदेव**स्य धेनुः खनतां निर्गमिष्यति ।
शृङ्गाभ्यां घट्यते साधुः स्थापिता सा चतुःपथे ॥१७०॥
दण्डित्वाऽशेषपाखण्डान् भिक्षाषष्ठांशसमर्थयन् ।
कायोत्सर्गाहूतदेव्या साधुभ्यो वारयिष्यति ॥१७१॥
**कल्की** नंष्ट्वा स्थलभुवि करिष्यति नवं पुरम् ।
पंचाशद्वर्षसुभिक्षे द्रोणो द्रम्मेण लभ्यते ॥१७२॥
पुनः धनार्थी लोभात्मा निस्वं कृत्वाखिलं जनं ।
भिक्षाषष्ठांशयात्रायै स रोत्स्यति पुनर्मुनीन् ॥१७३॥
तदा **प्रातिपदा**चार्य-मुख्यसङ्घोऽखिलोऽपि हि ।
स्थास्यति कायोत्सर्गेण स्मृत्वा शासनदेवताम् ॥१७४॥
बोधितः शासनदेव्या यावत् **कल्की** न भोत्स्यते ।
तावदासनकम्पेनागन्ता शक्रो द्विजाकृतिः ॥१७५॥
तेनापि शिक्षितो भूपः सकोपोऽपि चपेटया ।
हनिष्यति षडशीति-वर्षायुर्नरकं गमी ॥१७६॥
ततस्तस्य सुतं **दत्तं** राज्येऽभिषिच्य देवराट् ।
नत्वा **प्रातिपदं** सूरिं सङ्घसौख्ये दिवं गमी ॥१७७॥
**दत्तः** प्रतिदिनं जैनं चैत्यं मण्डिष्यते महीम् ।
एकोनविंशतिवर्ष-सहस्राण्यथ धर्मधीः ॥१७८॥
दुःषमाऽरकपर्यन्ते प्रव्रज्य द्वादशाब्दिकः ।
**दुःप्रसहो** द्विहस्तांगो **दशवैकालिका**गमः ॥१७९॥
व्रतं समाः प्रपाल्यष्टौ विंशत्यब्दः कृताष्टमः ।
एकावतारः सौधर्मे पल्यायुर्भविता सुरः ॥१८०॥ युग्मम् ॥
अन्त्याथ साध्वी **फल्गुश्रीः** श्रावको **नागिल**स्तथा ।
**सत्यश्रीः** श्राविका सङ्घः पूर्वाह्ने शममेष्यति ॥१८१॥

मध्याह्ने **सुमुखो** मन्त्री राजा **विमलवाहनः** ।
शमिष्यति चापराह्ने वह्निर्विधास्यति क्षितौ ॥१८२॥
क्षयाय वाता वात्स्यन्ति वर्षिष्यन्ति विषाम्बुदाः ।
द्वादशार्कसमः सूर्यो हिमांशुश्च दहिष्यति ॥१८३॥
**गङ्गासिन्धू**भयतटे बिलद्वासप्ततावथ ।
**वैताढ्य**मूले स्थास्यन्ति नृतिर्यञ्चः षट्खण्डजाः ॥१८४॥
रथाङ्गमध्यतुल्योऽथ **गङ्गासिन्धु**जलोद्भवैः ।
रात्रौ कृष्टैः सूर्यपक्वैः तेषां मत्स्यादिभिर्घस्रं ॥१८५॥
धास्यन्ति गर्भं षड्वर्षा नार्यः षोडशाऽब्दाऽऽयुषः ।
द्रक्ष्यन्ति पुत्रप्रपौत्रान् विंशत्यब्दायुषो नराः ॥१८६॥
हस्तोच्छ्रयाः कषायोग्रा नग्नास्ते बिलवासिनः ।
षष्ठाऽरे भाविनो वर्ष-सहस्राण्येकविंशतिः ॥१८७॥
उत्सर्पिण्याद्याऽरकेऽपि तत्तुल्येऽपि गते ततः ।
वर्षिष्यति पञ्चमेघाः सप्ताहं भारते पृथक् ॥१८८॥
तेष्वादौ **पुष्करावर्त्त**-स्तापं निर्वापयिष्यति ।
**क्षीरोदः** कर्त्ता धान्यानां **धृतोदः** स्नेहकारकः ॥१८९॥
**अमृतोद** औषधीकृत् **रसदो** रसकृद्भुवः ।
निर्यास्यन्ति बिलेभ्यस्ते वर्धमानायुरङ्गिकाः ॥१९०॥
मांसाहारं निषेध्यन्ति ते धान्यफलभोजिनः ।
मध्यदेशे कुलकराः सप्तैते भाविनस्ततः ॥१९१॥
श्री[१]**विमलवाहना**ख्यः [२]**सुदामा** [३]**सङ्गम**स्ततः ।
[४]**सुपार्श्वा** [५]**दत्त**[६]**सुमुखौ** [७]**सम्मुचि**स्तेषु सप्तमः ॥१९२॥
जातिस्मृतेः पुरादीनां कर्ता **विमलवाहनः** ।
उत्पन्नेऽग्नावन्नपाकं शिल्पाद्यप्युपदेक्ष्यति ॥१९३॥
सैकोननवति पक्षेऽ-थोत्सर्पिण्या अरद्वये ।
गते **शतद्वारपुरे सम्मुचिः** पृथ्वीपतिः ॥१९४॥
**भद्रादेव्या** चतुर्दश-महास्वप्नोपसूचितः ।
**श्रेणिका**त्मा जिनो भावी कृतजन्मोत्सवः सुरैः ॥१९५॥ युग्मम् ॥

स्वर्णवर्णः सप्तहस्तप्रमाणः सिंहलाञ्छनः ।
सद्वासप्ततिवर्षायु-र्भावी **गौतम** मत्समः ॥१९६॥
जीवः **श्रेणिक**राजस्य **पद्मनाभ**जिनो भुवि ।
**सुपार्श्व**जीवो भविता **सूरदेवो** द्वितीयकः ॥१९७॥
तृतीयः **उदायी** जीवः **सुपार्श्व**स्तीर्थनायकः ।
भविता **पोट्टिल**जीव-स्तुर्यः **स्वयम्प्रभो** जिनः ॥१९८॥
पञ्चमो **दृढायु**र्जीवः **सर्वानुभूति**तीर्थकृत् ।
**देवश्रुतो** जिनः षष्ठः **कार्त्तिक**स्तु भविष्यति ॥१९९॥
**उदया**ख्यजिनो भावी **शङ्ख**जीवस्तु सप्तमः ।
**आनन्द**जीवो भविता-ष्टमः **पेढाल**तीर्थकृत् ॥२००॥
जीवो भावी **सुनन्द**स्य नवमः **पोट्टिलो** जिनः ।
दशमः **शतक**जीवः **शतकीर्त्ति**र्जिनोत्तमः ॥२०१॥
**देवकी** जीवो भवितै-कादशो **मुनिसुव्रतः** ।
**अममो वासुदेव**स्य जीवो द्वादश तीर्थकृत् ॥२०२॥
भविता **सत्यकी** जीवो **निष्कषाय**स्त्रयोदशः ।
**बलदेव**स्य जीवस्तु **निष्पुलाक**श्चतुर्दशः ॥२०३॥
पञ्चदशः **सुलसा**या-जीवो **निर्मम**तीर्थकृत् ।
भविता **रोहिणी** जीव-**श्चित्रगुप्तस्तु** षोडशः ॥२०४॥
**रेवती**जीवस्तु सप्त-दशः **समाधि**तीर्थकृत् ।
भविता **शताली** जीवः **संवरो**ऽष्टादशो जिनः ॥२०५॥
**यशोधर**जिनो भावी जीवो **द्वीपायन**स्य तु ।
**विजया**ख्यजिनो विंशः **कर्ण**जीवो भविष्यति ॥२०६॥
**मल्लो** जीवो **नारद**मस्यै-कविंशो भविता जिनः ।
**अम्बड**जीवो भविता द्वाविंशो देवतीर्थकृत् ॥२०७॥
त्रयोविंशो**ऽमर**जीवो**ऽनन्तवीर्यो** जिनाधिपः ।
**स्वातिबुद्ध**जीवो भावी **भद्रो** पश्चिमतीर्थकृत् ॥२०८॥
आयुः प्रमाणकल्याण-वर्णान्तरकलाञ्छनैः ।
एते पश्चादनुपूर्व्या वर्त्तमानजिनैः समाः ॥२०९॥

**दीर्घदन्तो गूढदन्तः शुद्धदन्त**स्तृतीयकः ।
**श्रीचन्द्र**चक्री **श्रीभूतिः श्रीसोमः पद्म**संज्ञिकः ॥२१०॥
**महापद्मो दर्शना**ख्यो **विमलोऽमलवाहनः** ।
**अरिष्ट**श्च द्वादशैते **भरते** भाविचक्रिणः ॥२११॥
नव कृष्णः **नन्दि-नन्दिमित्र-सुन्दरबाहुकाः** ।
**महाबाहू रतिबलो महाबलो बल**स्तथा ॥२१२॥
**द्विपृष्ठ**श्च **त्रिपृष्ठ**श्च तथैते प्रतिविष्णवः ।
**तिलको लोहजङ्घ**श्च **वज्रजङ्घ**श्च **केशरी** ॥२१३॥
**बलिपह्लाद**नामाना**वपराजितभीमकौ** ।
**सुग्रीव**श्च भविष्यन्ति स्वचक्रेण हता नव ॥२१४॥
**जयन्तो व्याजितो धर्मः सुप्रभ**श्च **सुदर्शनः** ।
**आनन्दो नन्दनः पद्मः सङ्कर्षणो** बला नव ॥२१५॥
उत्तमनरैकषष्टि-स्तृतीयेऽरे भविष्यति ।
उत्सर्पिण्यां चतुर्थे तु भाविनौ जिनचक्रिणौ ॥२१६॥
ततः कल्पद्रुमोत्पत्तौ युग्मिधर्मो भविष्यति ।
अष्टादशकोटिकोटी-सागराणि निरन्तरम् ॥२१७॥
उत्सर्पिण्यवसर्पिणी कालचक्राण्यनन्तशः ।
अनन्तगुणा व्यतीता वातो भावीनि **भारते** ॥२१८॥
इत्यादिश्य भगवान् प्र-बोधाय **देवशर्मणः** ।
प्राहिणोद् **गौतमं** ग्रामे प्रेमबन्धच्छिदे तथा ॥२१९॥
तदासन् स्वामिनः शिष्याः सहस्राणि चतुर्दश ।
षट्त्रिंशच्च सहस्राणि **चन्दना**प्रमुखार्यिकाः ॥२२०॥
एकोनषष्टिसहस्राधिकलक्षमुपासकाः ।
अष्टादशसहस्राणि-लक्षत्रयमुपासिकाः ॥२२१॥
चतुर्दशपूर्विणां तु शतत्रयं प्रभोरभूत् ।
त्रयोदशशतान्यास-न्नवधिज्ञानशालिनाम् ॥२२२॥
सप्तशती केवलिनां वैक्रियाणां च साऽभवत् ।
पञ्चशती विपुलानां वादिनां च चतुःशती ॥२२३॥

अजायन्त शतान्यष्टा-वनुत्तरोपपातिनां ।
एवं परिवारयुतः कृतषष्ठतपाः प्रभुः ॥२२४॥
छद्मस्थोऽस्थात् समा-स्त्रिंशत्सार्द्धद्वादश छद्मवान् ।
केवली त्रिंशदर्द्धोना सर्वायुर्द्व्यग्रसप्ततिः ॥२२५॥
**कार्त्तिकस्यामावास्यायां चन्द्रे** द्वितीयवत्सरे ।
**प्रीतिवर्द्धन**सन्मासे पक्षे च **नन्दिवर्द्धने** ॥२२६॥
**देवानन्दा**भिध रात्रा-**वुपशमा**ख्यवासरे ।
**नागे** करणे मुहूर्त्ते **सर्वार्थसिद्धि**नामनि ॥२२७॥
**स्वातौ** रात्र्यन्तयामार्द्धे पर्यङ्कासनमाश्रितः ।
स्वामी शक्रेण विज्ञप्तः प्रतीक्षस्व क्षणं विभो ! ॥२२८॥
यतस्ते जन्मभं नाथ तीर्थपूजाप्रभावहृत् ।
द्विवर्षसहस्रस्थायी संक्रान्तो भस्मको ग्रहः ॥२२९॥
ऊचे प्रभुः शक्र ! नाऽऽयु-र्वृद्धौ क्षमा जिना अपि ।
किं वा भाव्यं भवन्नेवं नाशः स्यान्न कदाचन ॥२३०॥
कल्याणफलपाकानि तथा पापफलानि च ।
प्रत्येकं पञ्चपञ्चाशद्वि-भाव्याऽध्ययनान्यथ ॥२३१॥
अपृष्टव्याकरणानि षट्त्रिंशत्प्रकाशयन् ।
स्मरन् **प्रधाना**ध्ययनं शैलेशीमाश्रयद्विभुः ॥२३२॥ युग्मम् ॥
कृतयोगनिरोधोऽथ सिद्धानन्तचतुष्टयः ।
श्री**वीरः** प्राप निर्वाणं **गौतम**श्चाप केवलम् ॥२३३॥
उत्पन्नेऽनुद्धरीकुन्थौ दुष्पालं वीक्ष्य संयमम् ।
बहु निर्ग्रन्थनिर्ग्रन्थ्य-स्तदा चानशनं व्यधुः ॥२३४॥
नव **मल्लकि**ज्ञातीया **लच्छकि**ज्ञातयो नव ।
गणराजानोऽष्टादशाः **काशीकोशल**नायकाः ॥२३५॥
ते पौषधोपवासादि प्रस्थाप्**यामावसी**दिने ।
भावोद्योते गते द्रव्यो-द्योतां **दीपालिकां** व्यधुः ॥२३६॥
आगच्छद्भिश्च गच्छद्भिर्देवदेवीगणैस्तदा ।
रात्रिर्ज्योतिमयी साभू-त्कोलाहलभृशाकुला ॥२३७॥

मर्त्यामर्त्यगवादीनां चक्रे नीराजना जनैः ।
भस्मकप्रतिघाताय **मेराईयं** जगत्यभूत् ॥२३८॥
निर्वाणमहिमानं भर्त्तुः समाप्य **प्रतिपत्**प्रगे ।
केवलमहिमानं चक्रे शक्रः श्री**गौतम**प्रभोः ॥२३९॥
निवेश्य सहस्रपत्रे स्वर्णपद्मे हरिर्गुरुम् ।
पुष्पप्रकरमादाय पुरश्चक्रेऽष्टमङ्गलम् ॥२४०॥
**नन्दिवर्द्धन**राजाप्य-भूजानो निर्वृतौ विभौ ।
**सुदर्शना** स्वसाभ्यर्थ्य द्वितीयायामभूज्यत ॥२४१॥
ततो **भ्रातृद्वितीया**भू-त्तद्वारे वत्सरा नृप ! ।
**सम्प्रति** साम्प्रतं लोके विख्याता दीपपर्ववत् ॥२४२॥

**पुनरपि राजा उवाच –**

भोगो वस्त्राऽन्नपानादे-र्विशेष्यगृहमण्डनम् ।
जनस्याऽन्यस्य जोत्काराः कस्मादस्मिन् दिने प्रभो ! ॥२४३॥

**श्रीसुहस्तिरुवाच –**

इहैव**ोज्जयनी**पूर्यां समवासरदेकदा ।
श्री**मुनिसुव्रत**स्वामि-शिष्यः श्री**सुव्रतो** गुरुः ॥२४४॥
तं नन्तुमाययौ राजा श्री**धर्मः** सचिवोऽस्य च ।
**नमुचि**र्विवदन् जिग्ये क्षुल्लकेन चुकोप सः ॥२४५॥
हन्तुं मुनीन् कृष्टखड्गो देव्यासौ स्तम्भितो निशि ।
राज्ञा विस्मितेन साधून् क्षामयित्वा विमोचितः ॥२४६॥
लज्जितो **नमुचि**र्नंष्ट्वा प्रययौ **हस्तिनापुरे** ।
तत्र **पद्मोत्तरो** राजा **ज्वालादेव्य**स्ति तत्प्रिया ॥२४७॥
तत्पुत्रौ **विष्णुकुमार-महापद्मौ** बभूवतुः ।
ज्येष्ठे तिष्ठति **पद्माय** यौवराज्यमदात् पिता ॥२४८॥
तन्मन्त्री **नमुचिः** सोऽभू-ज्जिग्ये **सिंहरथं** रिपुम् ।
**पद्म**स्तुष्टो वरं प्रादा-न्न्यासीचक्रे च मन्त्रिणा ॥२४९॥
एकदा **ज्वालया** राज्ञ्या कारितश्चार्हतो रथः ।
मिथ्यादृष्ट्या तत्सपत्न्या **लक्ष्म्या** ब्रह्मरथः पुनः ॥२५०॥

रथाकृष्टौ तयोर्वादे राजा द्वावप्यवारयत् ।
मातुर्वीक्ष्यापमानं तु **पद्मो** देशान्तरं ययौ ॥२५१॥
ऊढ **मदनावलीको** जितषट्खण्ड**भारतः** ।
**महापद्मः** पुरायातः पित्रा राज्ये न्यवेशयत् ॥२५२॥
समं **विष्णुकुमारेण** स्वयं **पद्मोत्तरो** नृपः ।
**सुव्रताचार्य**पादान्ते परिव्रज्य ययौ शिवम् ॥२५३॥
मुने**र्विष्णुकुमार**स्य षष्टिवर्षशतान्यथ ।
तपस्यतः समुत्पन्नाः लब्धयो वैक्रियादिकाः ॥२५४॥
चक्रवर्ती **महापद्मो**ऽ-र्हच्चैत्यैर्भूषितावनिः ।
मातुर्मनोरथापूर्त्यै रथयात्रोत्सवं व्यधुः ॥२५५॥
ययाचे **नमुची** राज्यं वरेणाथ करे कृतं ।
चक्री च तस्मै तद्दत्वा स्वयमन्तःपुरेऽविशत् ॥२५६॥
तदा श्री**सुव्रताचार्यो** वर्षासु **हस्तिनापुरे** ।
चतुर्मासाभिग्रहेण सुतस्थौ सपरिच्छदः ॥२५७॥
अन्यदा **नमुचिः** सूरीन् दृष्ट्वा वैरमनुस्मरन् ।
अवोचल् लिङ्गिनः सर्वे त्वद्वर्जं मामुपस्थिताः ॥२५८॥
स्थातव्यं तन्न मद्भूमौ सप्ताहोपरि साधुभिः ।
यः स्थाता तं हनिष्यामि सङ्घः पृष्टश्च सूरिभिः ॥२५९॥
प्रहित्य मुनिराहूतो **विष्णु**र्मेरुशिखास्थितः ।
**नमुचि**वर्जा राजानो **विष्णुं** वीक्ष्य ववन्दिरे ॥२६०॥
ऊचे **विष्णु**र्यान्ति पूर्णा-भिग्रहाः साधवः स्वयम् ।
तद्देहि कियतीं भूमिं ततो तस्मै त्रिपदीमदात् ॥२६१॥
लक्षयोजनदेहीऽभू-**द्विष्णु**र्वैक्रियलब्धितः ।
क्रमौ पूर्वापराम्बुध्योर्न्यस्य विश्वमकम्पयत् ॥२६२॥
क्रमं तृतीयं **नमुचेः** पृष्ठे निष्ठुरमादधे ।
क्षिप्तस्त्रिविक्रमेणेति रसातलं बली रिपुः ॥२६३॥

D:\chandan/new/kalp-1/pm5\3rd proof

इन्द्रप्रहितगन्धर्वैर्गीतोपशमरसान्वितम् ।
विष्णुं स्वभावसम्पन्नं चक्रवर्त्यादयोऽनमन् ॥२६४॥

**महापद्म**मुपालभ्य कृत्वा सङ्घप्रभावनाम् ।
प्रतिक्रम्य गुरोरन्ते ययौ **विष्णुः** शिवं क्रमात् ॥२६५॥[१]

तत्रोत्पाते प्रशान्तेऽथ पुनरुज्जीवितं जगत् ।
संभूय भोजनाच्छाद-विभूषाद्युत्सवं व्यधात् ॥२६६॥

प्रतिवर्षं तदाद्यत्र दिने प्रावर्त्ततोत्सवः ।
**दीपालीवीर**निर्वाणादिति **दीपोत्सव**स्थितिः ॥२६७॥

**चतुर्द्दश्याममावस्यां** षोडशः प्रहरावधिः ।
कोटीसहितमुपोष्य पूजयेच्छ्रुतमष्टधा ॥२६८॥

स्मृत्वा सहस्रपञ्चाशत्परिवारं हि **गौतमम्** ।
स्वर्णाम्भोजे ततोऽखण्डदीपो बोध्यः स तण्डुलः ॥२६९॥

इत्थं सहस्रपञ्चाशद् गुणं पुण्यमुपार्ज्यते ।
जैनधर्मरता भव्याः प्राप्नुवन्त्यक्षयं पदम् ॥२७०॥

श्रुत्वेति **सम्प्रति**नृपः प्रतिवर्षमेवं, **दीपोत्सवं** जनपदेष्वखिलेषु तेने ।
श्रीमत्**सुहस्ति**गुरुपादप्रसादनादादाप्तं च राज्यमशिषज्जिनधर्मरम्यम् ॥२७१॥

किञ्चिज्ज्ञात्वा श्रुताम्भोधेः किञ्चिद्बहुश्रुताननात् ।
कृतो **दीपालिकाकल्पः** शोध्यः सद्भिः प्रसद्य सः ॥२७२॥

समभावा**दमावास्या**मुपोष्य **प्रतिपद्दि**ने ।
गुरुभ्यः परमान्नेन पूर्णो देयः पतद्ग्रहः ॥२७३॥

लक्ष्याद्द्वादशधान्यानां ढौकनीया जिनाग्रतः ।
एवमाराधनीयः श्री**गौतम**गणभृत्तमः ॥२७४॥

शर ५ युग ४ शिखि ३ शशि १ वर्षे शिष्यः श्री**रत्नसिंहसूरीणाम्** ।
श्री**विनयचन्द्रसूरि**श्चक्रे **दीपालिकाकल्प**म् ॥२७५॥

---

१. प्रत्यन्तरेऽयं श्लोकः २६५ श्लोकतोऽग्रे अधिकोऽस्ति । ''योऽवज्ञाकृन्मुनीन्द्राणां मर्त्त्यरूपो मृगो हि स । इति लोकप्रबोधार्थं लोकोक्तिगो हि सोऽभवत्'' ॥

तथा वर्षैश्चतुष्षष्ट्या **जम्बू** मुक्तिं गमिष्यति ।
भावी दशानामर्थानां विच्छेदोऽत्र ततो यथा ॥९४॥

---

१. वृन्दार्हराजवत् ।

आहारक-मनोज्ञाने-पुलाकः-परमावधिः ।
क्षपको-पशमश्रेण्यौ-केवलं [१]संयमत्रिकम् ॥९५॥
सिद्धिगति-र्जिनकल्पो **जम्बू**नाम्ना समं तदा ।
सह विच्छेदमेष्यन्ति दुषमाद्धानुभावतः ॥९६॥ युग्मम् ॥
चतुर्दशपूर्वधारी तस्य पट्टे प्रभावकः ।
**जम्बू**प्रबोधितः शिष्यो भविता **प्रभव**प्रभुः ॥९७॥
**सय्यम्भवस्**तु तत्पट्टे भविता द्वादशाङ्गभृत् ।
**दशवैकालिको**द्धारी **यशोभद्र**श्च पूर्वभृत् ॥९८॥
**सम्भूतिर्भद्रबाहु**श्च तच्छिष्यौ सर्वपूर्विणौ ।
निर्वृतेर्मम सप्तत्याधिके वर्षशते १७० गते ॥९९॥
**भद्रबाहु**र्बहुग्रन्थ-कर्ता स्वर्गं गमिष्यति ।
**स्थूलभद्रो**ऽथ **सम्भूते**-र्विनेयः सर्वपूर्वभृत् ॥१००॥
मोक्षतो मे पञ्चदशा-धिके वर्षे शतद्वये २१५ ।
व्यतीते त्रिदिवं प्राप्ते **स्थूलभद्र**मुनीश्वरे ॥१०१॥
प्राक् संहननसंस्थाने पूर्वार्थकथनं तथा ।
ध्यानं सूक्ष्मं महाप्राणं यास्यन्ति युगपत् क्षयम् ॥१०२॥ युग्मम् ॥
वर्षैश्चतुरशीत्यभ्य-धिकैः पञ्चशतैर्गतैः ५८४ ।
व्युच्छेत्स्यन्ते गते **वज्रे** दशपूर्व्यर्द्धकीलिके ॥१०३॥
वर्षैष्षोडशभिर्युक्तैः षट्शतैः ६१६ **पुष्यमित्रकः** ।
सार्द्धाणि नवपूर्वाणि यास्यन्ति विलयं पुनः ॥१०४॥
षड्भिर्वर्षशतैर्विंश-त्यधिकैः ६२० र्मम मोक्षतः ।
ग्राममध्ये विधास्यन्ति वसतिं चाऽ**ऽर्यसूरयः** ॥१०५॥
नवोत्तरैः शतैः षड्भि-र्वत्सराणां ६०९ **दिगम्बराः** ।
पाखण्डिनो भविष्यन्ति **रथवीरपुरे** पुरे ॥१०६॥
दिनतो मम मोक्षस्य गते वर्षशतत्रये ३०० ।
**उज्जयिन्यां** महापुर्यां भावी **सम्प्रति**भूपतिः ॥१०७॥

---

१. सूक्ष्मसंपराय-यथाख्यात-परिहारविशुद्धयः ।

श्रीम**दार्य्यसुह**स्त्याह्व-सूरीणामुपदेशतः ।
जातिस्मरणमासाद्य जैनधर्मं विधास्यति ॥१०८॥
दोर्दण्डमण्डलाक्रान्त-त्रिखण्डक्षोणिमण्डलः ।
ज्ञाता-दाता-नयी-धर्मी-विनयी-सपराक्रमी ॥१०९॥
मुक्ताहारैरिव श्वेत-विहारैरर्हतां वरैः ।
महीं महीयसीमेतामखण्डां मण्डयिष्यति ॥११०॥ युग्मम् ॥
स नृपोऽनार्यदेशेषु लोकोपकारहेतवे ।
सम्यक्त्वोपासकाचार-शिक्षादक्षैर्विचक्षणैः ॥१११॥
जिनागमविचारज्ञै-रुपदेशविशारदैः ।
प्रहितैः सेवकैर्लोकान् श्रावकान् कारयिष्यति ॥११२॥ युग्मम् ॥
प्रतिबोधविधानार्थं नृणां तत्र पवित्रधीः ।
गीतार्थानां विहारं स गुरुभिः कारयिष्यति ॥११३॥
एवं जिनोदितं धर्मं सर्वदेशेषु शक्तितः ।
प्रवर्त्त्य दृढधर्माऽथ क्रमेण त्रिदिवं गमी ॥११४॥
मोक्षतो मम सप्तत्या युते वर्षचतुश्शते ४७० ।
व्यतीते **विक्रमादित्य उज्जयिन्यां** भविष्यति ॥११५॥
श्री**सिद्धसेन**सूरीणा-मुपदेशं निशम्य सः ।
सर्वज्ञशासने भक्त्या प्राप्तसम्यक्त्वनिश्चयः ॥११६॥
सत्त्वसि**द्धाग्निवेताल**-प्रमुखानेकदेवतः ।
विद्यासिद्धो मन्त्रसिद्धः सिद्धसौवर्णपूरुषः ॥११७॥
धैर्यादिगुणविख्यातः स्थाने स्थाने नरामरैः ।
परीक्षाकषपाषाण-निघृष्टसत्त्वकाञ्चनः ॥११८॥
ससन्मानैः श्रियां दानै-रनृणामखिलामिलाम् ।
कृत्वा संवत्सरं स्वस्य वर्तयिष्यति भूतले ॥११९॥ चतुर्भिः कलापकम् ॥
गीर्वाणगण[१]नुत्याध्वा ध्वजीभूतगुणव्रजः ।
पालयिता नयोपेतः प्रास्तपापरजाः प्रजाः ॥१२०॥

---

१. स्तुत्य ।

पञ्चत्रिंशद्युते तस्मा-द्वत्सराणां शते १३५ गते ।
वर्तयिष्यत्**युज्जयिन्यां शकः** संवत्सरं निजं ॥१२१॥ युग्मम् ॥
पञ्चाशीत्या समधिकै-र्वर्षाणां पञ्चभिः शतैः ५८५ ।
विक्रमानेहसः सूरि-**हरिभद्रो** भविष्यति ॥१२२॥
[1]मत्तोऽधिकैस्त्रिनवत्या नववर्षशतैर्गतैः ९९३ ।
सूरयः **कालिका**ह्वया भाविनः शक्रवन्दिताः ॥१२३॥
**ते श्रीपर्युषणापर्व चतुर्थ्यां पंचमीदिनात्** ।
**सर्वाचार्यानुमत्यैव समानेष्यन्ति हेतुतः ॥१२४॥**
द्वादशशतैर्वर्षाणां सप्ततौ १२७० मम मोक्षतः ।
**बप्पभट्टि**गुरुर्भावी सर्वविद्याविशारदः ॥१२५॥
तद्वाक्यादाऽऽ**मराजा** मे प्रतिमां [2]**गोप**पर्वते ।
कारयिष्यति [3]सार्द्ध-त्रिकोटिस्वर्णमयीं मुदा ॥१२६॥
त्रयोदशशतै १३०० र्वर्षैर्प्रयातैर्मम मोक्षतः ।
मतभेदा भविष्यन्ति बहवो मोहहेतवः ॥१२७॥
विक्रमानेहसो जाते-ष्वेकादशशतेष्वथ ११५९ ।
एकोनषष्ट्यधिकेषु **राकापक्षो** भविष्यति ॥१२८॥
वत्सरैर्द्वादशशतै-श्चतुर्भिरधिकैर्गतैः १२०४ ।
भावी विक्रमतो गच्छः ख्यातः **खरतरा**ख्यया ॥१२९॥
शरच्छतैर्द्वादशभि-र्गतैस्त्रयोदशोत्तरैः १२१३ ।
राकापक्षात् पृथग्भूतोऽ**ञ्चलपक्षो** भविष्यति ॥१३०॥
षट्त्रिंशदधिकैर्वर्षै-र्गतैर्द्वादशभिः शतैः १२३६ ।
[4]सार्द्धराकाभिधो गच्छो महाशयो भविष्यति ॥१३१॥
पञ्चाशताधिकैर्वर्षै-र्गतैर्द्वादशभिः शतैः १२५० ।
विक्रमानेहसो भावी गच्छ [5]**आगमसंज्ञकः** ॥१३२॥

---

१. मत्तो-मम निर्वाणात् (विरनिर्वाणात्) । २. ग्वालियरने विषे । ३. साडा त्रण क्रोड सुवर्ण खर्च थाय तेवी एक प्रतिमा । ४. दोढ पुनमीओ-पूर्णिमा अने चतुर्दशी संधी मान्य साढ पुनमीया नामे गच्छ थशे । ५. त्रिस्तुतिकः ।

नैकधामतभेदेन दुष्षमाद्धानुभावतः ।
[1]**चतुरशीति**संख्येया **गणभेदा** हि भाविनः ॥१३३॥
केचित्तपोगौरविताः केऽपि धर्मक्रियाश्लथाः ।
क्रियावन्तो भविष्यन्ति परस्परसमत्सराः ॥१३४॥
हुण्डायामवसर्पिण्या-मेतस्यामभवन् दश ।
तीर्थंकरोपसर्गादी-न्याश्चर्याणीह तद्यथा ॥१३५॥
"[1]**उवसग्ग-**[2]**गब्भहरणं-**[3]**इत्थीतित्थं-**[4]**अभाविया परिसा ।**
[5]**कण्हस्स अवरकंका अवयरणं** [6]**चंद्दसूराणं ॥१३६॥**
[7]**हरिवंसकुलुप्पत्ती** [8]**चमरुप्पाओ अ** [9]**अट्ठसयसिद्धा ।**
[10]**अस्संजयाण पूआ दसविहा णंतेण कालेण" ॥१३७॥**
कषायबहुला लोका दुष्षमायामतः परम् ।
भाविनस्त्यक्तमर्यादा नष्टधर्मधियो जडाः ॥१३८॥
कालेन हीयमानेन कुतीर्थ[2]मतिमोहिताः ।
परोपकारसत्यादि-वर्जिता भाविनो जनाः ॥१३९॥
पुराणि ग्रामरूपाणि ग्रामाः प्रेतवनोपमाः ।
यमदण्डसमा भूपा महेभ्या भृत्यसन्निभाः ॥१४०॥
न दृश्या भाविनो देवा न जातिस्मरणं नृणाम् ।
जना विगतमर्यादाः [3]क्षुद्रसत्त्वाकुलाच(श्च)लाः ॥१४१॥
परविघ्नेन संतुष्टाः पापारम्भे चतुर्भुजाः ।
निजार्थेन जनोऽन्येषां नखमध्ये प्रवेशकः ॥१४२॥
प्रमादी पुण्यकृत्येषु परतृप्तिषु तत्परः ।
वञ्चनाचतुरस्तुच्छः प्रचण्डो दीर्घरोषणः ॥१४३॥
लोभी मिथ्याभिमानी च [4]राजर्द्धौ पादमोचकः ।
पाखण्डिनो भविष्यन्ति बहवो विप्रतारकाः ॥१४४॥

---

१. चतुरशीति-१. नागेन्द्र, २. चन्द्र, ३. निर्वृत्ति, ४. विद्याधर आ नामनां चार आचार्य थाय, ते मध्ये एक एक आचार्यना एकवीश एकवीश गच्छ नीकळशे एवं ८४ गच्छ थाय । २. मति-मत । ३. क्षुद्रसत्ववडे करी आकुलचित्तना धणी । ४. राजद्वारसेवी ।

D:\chandan/new/kalp-1/pm5\3rd proof

धूर्त्ताः पापकरा मूर्त्ताः स्फुरिष्यन्ति पदे पदे ।
त्रपात्यक्ताऽपमर्यादा वेश्यावत् कुलयोषितः ॥१४५॥
भूपा भृत्याञ्जनान् भृत्या लोकास्तान् द्वितयानपि ।
ध्रोक्ष्यन्तीह महीपीठे मात्स्यधर्मः[१] प्रवर्त्स्यति ॥१४६॥
चौराश्चौर्यविधानेन करैर्भूमीश्वराः पुनः ।
जनं दरिद्रयिष्यन्ति वह्नयोऽपि प्रदीपनैः ॥१४७॥
वधो धेन्वादिजन्तूनां पातनं देवसद्मनां ।
मर्त्यमुण्डकरो दण्डो भाव्येवं दुःखितो जनः ॥१४८॥
दुर्भिक्षैर्डमरैर्दौःस्थ्यैरसौम्यैर्जनमारिभिः ।
भाविनी मेदिनी शून्या देशभङ्गादिविप्लवैः ॥१४९॥
प्रेतलोकसमाः श्रेण्यो[२] लञ्चालुब्धा नियोगिनः ।
अविवेकी जनो मूर्खो निष्कलो निर्द्धनो रुजी ॥१५०॥
दारिद्र्यवन्तो दातारः सधनाः कृपणाः पुनः ।
पापात्मानश्चिरायुष्काः कृतिनस्वल्पजीविनः ॥१५१॥
अकुलीना महीपालाः कुलीना नृपसेवकाः ।
दुःखिनो भाविनः सन्तो दुर्जनाः सुखिनः पुनः ॥१५२॥
एवं च दुष्षमाकाले स्वरूपं लौकिका अपि ।
व्याहरन्ति कलियुगे व्यपदेशेन तद्यथा ॥१५३॥
द्वापराख्ययुगे जज्ञे **युधिष्ठिर**महीपतिः ।
राजपाट्यान्यदा सोऽथ जगाम विपिने क्वचित् ॥१५४॥
तत्राऽधोभूय वत्सायाः स्तन्यपानं वितन्वतीम् ।
गां निरीक्ष्य द्विजाः पृष्टा राज्ञा किमिदमद्भुतम् ॥१५५॥
तैर्विज्ञायोदितं राज-न्नागामिनि कलौ युगे ।
हीनसत्त्वाः श्रिया दुःस्था मातरः पितरस्तथा ॥१५६॥

---

१. मच्छगलागलन्याय-बृहन्मच्छो लघोर्गिलति, लघुर्लघुतरस्य, लघुतरो लघुतमस्येत्यादि । २. कुटुंबीलोकनी श्रेणी ।

D:\chandan/new/kalp-1/pm5\3rd proof

कस्यापि धनिनः कन्यां दत्त्वा लात्वा ततो धनम् ।
स्त्रक्षन्ति निर्वाहमिदं [१]गोवत्सा[२]धीतिजं फलम् ॥१५७॥
ततोऽग्रतो गतेनाऽथ **युधिष्ठिर**महीभुजा ।
समश्रेणिस्थितं दृष्टं जलपूर्णसरस्त्रयम् ॥१५८॥
तटाकादेकतस्तत्रोत्प्लुत्य त्यक्त्वान्तरा सरः ।
दृष्टास्तृतीयकासारे पतन्तो भूभृतोर्मयः ॥१५९॥
तद्वीक्ष्य विस्मतः प्राह विप्रान् किमिदमद्भुतम् ।
ते विमृश्य जगुर्भाविस्वरूपं ज्ञापयत्यदः ॥१६०॥
यथासन्नं सरस्त्यक्त्वा तृतीयं वीचयः श्रिताः ।
निजांस्त्यक्त्वा तथाऽन्येषु लोकः प्रीतिं करिष्यति ॥१६१॥
नृपेणाऽग्रगतेनाऽथ जलार्द्रवालुकोत्करैः ।
मानवै रज्जवो व्यूता दृष्टा भग्नाः प्रभञ्जनैः ॥१६२॥
निरीक्ष्येदं द्विजाः पृष्टाः फलमाहुर्नरा धनम् ।
[३]कृष्यादिभिर्महाक्लेश-र्जिष्यन्ति कलौ युगे ॥१६३॥
तदग्नि-चोर-दायाद-राजदण्ड-करादिभिः ।
नरैर्यत्नेन संरक्ष्य-माणं क्षिप्रं विनङ्क्ष्यति ॥१६४॥
पुनरग्रे प्रयातेन धर्मपुत्रेण वीक्षितम् ।
प्रवाहोल्लुठितं नीरं निपतन् कूपकन्दरे ॥१६५॥
फलं तस्य द्विजैरूचे कृष्यादिक्लेशतो नराः ।
यदर्जिष्यन्ति तद् द्रव्यं ग्रहीष्यन्त्यखिलं नृपाः ॥१६६॥
[४]युगेष्वन्येषु राजानो धनं दत्त्वा निजं बहु ।
जगतीं प्रीणयामासु-र्जनतैकान्तवत्सलाः ॥१६७॥
राज्ञा पुनर्गतेनाऽग्रे सश्रीक**श्चम्पक**स्तरुः ।
**शमी**शाखी चैकदेशे वनमध्ये निरीक्षितौ ॥१६८॥

---

१. गाय पोतानी वाछरडीने । २. पानजं-धावीने जीवे तेनुं फल । ३. कृषि १, सेवा २, वाणिज्य ३, पशुपाल ४ । ४. कृतत्रेतायुगने विषे ।

D:\chandan/new/kalp-1/pm5\3rd proof

जनैः **शमी**तरोस्तत्र गन्धमाल्यविलेपनम् ।
मण्डनं गीतनृत्यादि-क्रियमाणं व्यलोक्यत ॥१६९॥
पत्रपुष्पफलाढ्यस्य छत्राकारस्य शाखिनः ।
[1]अन्यस्यैव न पूजादि-द्विजास्तत्फलमूचिरे ॥१७०॥
न श्रीः पूजा गुणवतां सज्जनानां महात्मनां ।
पापिष्ठानां खलानां च पूजालक्ष्म्यौ भविष्यतः ॥१७१॥
पुनः शिलैका वालाग्र-लम्बिता नभसि स्थिता ।
निरीक्षिता क्षितीशेनाऽऽ-चख्युस्तस्य फलं द्विजाः ॥१७२॥
पापं कलौ शिलाकल्पं स्वल्पधर्मेण भूपते ! ।
वालाऽवलम्बतुल्येन जनोऽयं निस्तरिष्यति ॥१७३॥
वालाग्रत्रुटिते धर्मे ब्रूडिष्यन्ति जनाः समे ।
फलार्थं तरुवधस्य तद्दृष्टस्य फलं त्विदम् ॥१७४॥
पितुर्वृक्षेण तुल्यस्य फलेन सदृशः सुतः ।
धनाद्यर्थं वधप्राय-मुद्वेगं जनयिष्यति ॥१७५॥
वर्यान्नपचनार्हायां क्षितीशेन समीक्षितः ।
लोहमय्यां कटह्यां च पाको मांसादि वस्तुनः ॥१७६॥
प्राहुस्तस्य फलं विप्राः स्वज्ञातिपरिहारतः ।
परवर्गे नरेशार्थ-दानं प्रीतिश्च भाविनि ॥१७७॥
सर्पसर्पद्विषोः पूजाऽ-पूजे वीक्ष्य फलं त्वदः ।
निर्दयेष्वप्यधर्मेषु सर्पतुल्येषु सत्कृतिः ॥१७८॥
सुपर्णाभेषु पूज्येषु सत्क्रियाधर्मशालिषु ।
गुणज्ञेष्वप्यसत्कारोऽ-नादरश्च भविष्यति ॥१७९॥
गजवाह्यं खरवाह्यं शकटं यत् समीक्षितम् ।
फलं तस्येदमुच्चेषु कुलेषु गजशालिषु ॥१८०॥
मर्यादास्यन्दनोद्वाह-योग्येषु कलहोऽनिशम् ।
नीतिलोपस्तथाऽन्योन्यं मत्सरश्च भविष्यति ॥१८१॥

---

१. चम्पकस्य ।

कुलेष्वन्येषु नीचेषु खरतुल्येषु भूपते ! ।
मर्यादानीतिधारित्वं स्नेहोऽन्योऽन्यं भविष्यति ॥१८२॥
स्नेहभावो वालुकासु त्वया भूप ! विलोकितः ।
कृषिसेवादिकारम्भा-त्तत्फलं भावि नो धनम् ॥१८३॥
अग्रे गतेन भूपेन काकं हंसैर्निषेवितम् ।
दृष्ट्वा पृष्टैर्द्विजैः प्रोचे तत्फलं भाविसूचकम् ॥१८४॥
काककल्पा महीपालाः प्रायो नीचकुलोद्भवाः ।
हंसतुल्यैर्जनैः शुद्धैः सेविष्यन्ते कलौ युगे ॥१८५॥
अन्यदा पाण्डवाः पञ्च वनवासस्थिताः क्रमात् ।
**युधिष्ठिरे**ण **भीमा**द्या निशि रक्षाकृतः कृताः ॥१८६॥
**भीम**स्य जाग्रतः पूर्व-यामे सुप्ते **युधिष्ठिरे** ।
बन्धुत्रययुतोऽभ्यगात् प्रेतरूपधरः **कलिः** ॥१८७॥
आगत्य तमुवाचाथ बन्धून् ते हन्मि पश्यतः ।
तदाऽऽकर्ण्य क्रुधा **भीम**-स्तद्वधायाभ्यधावत ॥१८८॥
विदधानो युधं **भीमः** क्रुधाऽरुणितलोचनः ।
लीलया प्रेतरूपेण कलिना बलिना जितः ॥१८९॥
युद्ध्यमानो जितस्तेन द्वितीयप्रहरे**ऽर्जुनः** ।
तृतीये **नकुल**स्तद्वत् **सहदेव**स्तुरीयके ॥१९०॥
ततः सुप्तेषु शेषेषु निशाशेषे युधिष्ठिरः ।
जजागार **कलि**स्तस्याऽ-प्यूचे प्रेतः समुत्थितः ॥१९१॥
हन्मि ते पश्यतो बन्धू-नित्याऽऽकर्ण्य सकर्णधीः ।
न चुकोप न चोवाच रुषा रूक्षाऽक्षरं वचः ॥१९२॥
सर्वाभ्युदयजननीं सर्वसत्त्वप्रियङ्करीम् ।
सारां समग्रधर्मस्य **क्षमा**मङ्गीचकार सः ॥१९३॥
तस्योपशममालोक्य **कलिः** शान्तमनास्ततः ।
प्रेतरूपं व्यपास्यास्य मुष्टिमध्ये समागतः ॥१९४॥
उत्थितानां स्वबन्धूनां प्रातस्तेन प्रदर्शितः ।
वशीभूतः **कलिः** प्रेतः **क्षमा**या अनुभावतः ॥१९५॥

D:\chandan/new/kalp-1/pm5\3rd proof

इत्याद्यष्टोत्तरशतै १०८-र्दृष्टान्तैर्लौकिका अपि ।
पुराणादिषु व्याख्यान्ति भावि[1]तुर्यस्थितियुगम् ॥१९६॥
सुखोपस्थग्रहो नैव न च लज्जा भविष्यति ।
नाऽकलङ्कं कुलं भाविसारवस्तुक्षतिः क्षितौ ॥१९७॥
सुते मृते पिता जीवी पितरौ विनयोज्झिताः ।
सुताः पराभविष्यन्ति श्वश्रूश्चाऽविनयाः स्नुषाः ॥१९८॥
विप्राः शस्त्रभृतो वेद-पाठषट्कर्मवर्जिताः ।
अपूज्या भाविनः पूज्या न पूज्याः पूजनोचिताः ॥१९९॥
गुरून्[2]आराधयिष्यन्ति विनेयास्तेषु ते पुनः ।
हिताचारोपदेशेन प्रदास्यन्ति कथञ्चन ॥२००॥
मन्त्र-तन्त्रौ-षध-ज्ञान-रत्न-विद्या-धना-युषाम् ।
फल-पुष्प-रसादीनां रूप-सौभाग्य-संपदाम् ॥२०१॥
सत्व-संहनन-स्थाम्नां यशः-कीर्ति-गुण-श्रियाम् ।
हानिः क्रमेण भावानां भाविनीपञ्चमारके ॥२०२॥ युग्मम् ॥
दान-शील-तपो-भाव-रूपधर्मस्य संक्षयः ।
कुटतुला कूटमानं शाठ्यं धर्मेऽपि भावी च ॥२०३॥
देवत्वं नैव देवेषु सतीत्वं न सतीष्वपि ।
निःसङ्गेषु न वैराग्यं निःस्पृहं न तपोऽपि हि ॥२०४॥
सत्यशौचतपःक्षान्त्यादीनां हानिर्दिने दिने ।
भूमिः स्वल्पफला मेघा कालेऽप्यल्पजलप्रदाः ॥२०५॥
स्वाम्याख्याति [3]सु**सौराष्ट्र-लाट-गुर्जर**सीमनि ।
क्रमेण नगरं भावि-नाम्ना**ऽणहिल्लपाटक**म् ॥२०६॥
अस्मिन्निर्वाणतो वर्ष-शतानि वत्स ! षोडश १६६९ ।
नवषष्टिश्च यास्यन्ति यदा तत्र पुरे तदा ॥२०७॥
**कुमारपाल**भूपाल**श्चौलुक्य**कुलचन्द्रमाः ।
भविष्यति महाबाहुः प्रचण्डाखण्डशासनः ॥२०८॥ युग्मम् ॥
पराक्रमेण-धर्मेण-दानेन-दययाऽऽ-ज्ञया ।
कीर्त्त्या-गुणानुरागेण-नयेन-विनयेन च ॥२०९॥

---

१. तुर्य-कलियुग । २. हिताचारोपदेशं न । ३. तु ।

D:\chandan/new/kalp-1/pm5\3rd proof

विज्ञानेन-विवेकेन-धैर्येण-राज्यलीलया ।
सोऽद्वितीयो नृपो भावी महासत्वोचितैर्गुणैः ॥२१०॥ युग्मम् ॥
[१]**कौबेरी**मा**तुरुष्कं** स [२]**प्राची**मा**त्रिदशापगाम्** ।
**याम्यामाविन्ध्यमा**वार्द्धि-**पश्चिमां** साधयिष्यति ॥२११॥
एकादशशता ११०० नीभा रथास्तस्यायुत १०००० प्रमाः ।
एकादशहया लक्षाः ११००००० पत्त्यष्टादशलक्षकाः १८०००००॥२१२॥
सोऽन्यदा **वज्र**शाखायां **मुनिचन्द्र**कुलोद्भवम् ।
श्री**हेमचन्द्र**माचार्यं वन्दिता मेदिनीपतिः ॥२१३॥
निशम्य रम्यश्रीधर्मो-पदेशं तन्मुखान्नृपः ।
श्राद्धव्रतानि सम्यक्त्व-सहितानि प्रपत्स्यते ॥२१४॥
अपूजितेषु देवेषु गुरुष्वप्रणतेषु च ।
न भोक्ष्यते स धर्मज्ञः प्रपन्नोपासकव्रतः ॥२१५॥
प्रतिद्रङ्गं प्रतिग्रामं प्रायेण स प्रभावकः ।
निर्मास्यति महीमेतां जिनप्रासादमण्डिताम् ॥२१६॥
सैकदा श्री**हेमसूरि**-मुखात्तीर्थकथाक्षणे जीवतः ।
स्वामिनो मूर्तेः सम्बन्धं निशमिष्यति ॥२१७॥
ततो [३]**वीतभय**स्थाने धूलिदुर्गं खनं खनम् ।
नरैराप्तैः प्रतिमां तां स प्रादुष्कारयिष्यति ॥२१८॥
प्रतिमां पत्तने नीत्वा प्रासादस्थां विधाय सः ।
मन्यते पुण्यधीर्धीरः साक्षा**द्वीर**जिनेश्वरम् ॥२१९॥
तदा तस्यै प्रतिमायै **यदुदायन**भूभुजा ।
ग्रामाणां शासनं दत्तं तदप्याविर्भविष्यति ॥२२०॥
शासनं तादृशं तस्यै सोऽपि भूपः प्रदास्यति ।
वन्दिष्यते च तां नित्यं महापूजापुरस्सरम् ॥२२१॥
सदा स्वदारासंतोषी त्रिधा वर्षासु शीलवान् ।
शीलस्य मनसा भङ्गे सोपवासं करिष्यति ॥२२२॥

---

१. उत्तरमां शीलारस उत्पत्तिस्थान सुधी । २. पूर्वमां गंगा नदी सुधी । ३. वर्तमान भेरा नामथी सिंधुसौवीरदेशमां ।

D:\chandan/new/kalp-1/pm5\3rd proof

[1]पुरा **भरत-नाभाक**-श्री**रामै**र्यदकारि न ।
तद्विधाता विपुत्राय धनलाभं कृपापरः ॥२२३॥
अष्टादशसु देशेषु मारिव्यसनवारकः ।
[2]सेनाभिषेणनत्यागं [3]वर्षासु च करिष्यति ॥२२४॥
प्राणित्राणप्रवीणानां **शान्ति-जीमूत-नेमीनां** ।
**कुमारपाल**भूपाल-स्तुरीयः पञ्चमारके ॥२२५॥
आर्हतः क्ष्मापतिः शुद्धः व्रतसम्यक्त्वपालकः ।
[4]**कुमार** इव भावी कः शासनस्य प्रभावकः ॥२२६॥
**कलहकरा [5]डमरकरा असमाहिकरा अनिव्वुइकरा य ।**
**होहिंति इत्थ समणा दससु वि खित्तेसु सयराहं ॥२२७॥**
**ववहारमंत्ततंत्ताइएसु निच्चुज्जुआण य मुणीणं ।**
**गलिहिंति आगमत्था अत्थलुद्धाण [6]तद्दिअहं ॥२२८॥**
**उवगरणवत्थपत्ताइ-आणवसहीण सड्ढयाणं च ।**
**जुज्जिस्संति कएणं जह नरवइणो कुडुंबीणं ॥२२९॥**
**बहवे मुण्डा अप्पे समणा होहिंति गुणसयाइन्ना ।**
**बलवंता मिच्छनिवा अप्पबला हिंदुअनरिंदा ॥२३०॥**
मन्निर्वृतेर्गतेष्वब्द-शतेष्वकोनविंशतौ ।
चतुर्दशसु १९१४ चाब्देषु चैत्रशुक्लाष्टमीदिने ॥२३१॥
[7]विष्टौ **म्लेच्छ**कुले **कल्की पाटलीपुत्र**पत्तने ।
रुद्रश्चतुर्मुखश्चेति धृतापराह्वयद्वयः ॥२३२॥

## अथ कल्की जन्मपत्रिका लिख्यते ।




१. पुरा **भरत-नाभेय-श्रीरामै**-र्यदकारि च, छाणीप्रते । २. सेनया शत्रोरभिमुखगमनम् । ३. स वर्षासु करिष्यति । ४. कुमारस्वामी कार्त्तिक इव बलिष्ठः । ५. मांहोमांहे विरोध करनारा । ६. पइदिअहं । ७. विष्टिकर्णे-भद्रायोगे ।

**यशो**गृहे **यशोदायाः** कुक्षौ स्थित्वा त्रयोदशान् ।
मासान् मधोः सिताष्टम्यां जयश्रीवासरे निशि ॥२३३॥
षष्ठे मकरलग्नांशे वहमाने [1]महीसुते ।
वारे कर्कस्थिते चन्द्रे चन्द्रयोगेऽशुभावहे ॥२३४॥
प्रथमे पादेऽश्लेषायाः **कल्कि**जन्म भविष्यति ।
त्रिहस्तोच्चः स कपिल-शीर्षकुन्तललोचनः ॥२३५॥ त्रिभिर्विशेषकम् ॥
तीक्ष्णस्वरोऽहृष्टपृष्ठ-लाञ्छनश्छद्मतत्परः ।
महाविद्योद्धुरो दीर्घ-हृदयो गुणवर्जितः ॥२३६॥
जन्मतः पञ्चमे वर्षे जठरापद्भविष्यति ।
सप्तमेऽग्न्यापदस्यैका-दशे द्रव्यस्य सम्भवः ॥२३७॥
तस्यैवाष्टादशे वर्षे कार्तिके मासि निर्मले ।
पक्षे च प्रतिपद् घस्रे शनौ चन्द्रे तुलास्थिते ॥२३८॥
स्वातौ नन्दिदिने सिद्ध-वेलायां करणे बवे ।
[2]मुहूर्त्ते रावणे राज्या-भिषेको हि भविष्यति ॥२३९॥ युग्मम् ॥
अदन्तस्तुरगस्तस्य कुन्तो दूर्वासकस्तथा ।
मृगाङ्कनाम किरीटं खड्गश्च दैत्यसूदनः ॥२४०॥
तस्यांह्विकटके चन्द्र-सूर्यौ त्रैलोक्यसुन्दरौ ।
[3]चारुसौधं तथा भावि-द्रव्यसंख्या न भाविनी ॥२४१॥
संवत्सरं **विक्रम**स्यो-त्थाप्य स्वर्णप्रदानतः ।
संवत्सरं स्वकीयं स स्थापयिष्यति भूतले ॥२४२॥
एकोनविंशवर्षेऽर्द्ध-भरतं विग्रहाकुलम् ।
दोर्दण्डमण्डलाक्रान्तं करिष्यति महाबलः ॥२४३॥
सार्द्धविंशत्तमे वर्षे-**ऽर्बुद**क्षितिभृतः सुतां ।
परिणीय बहू राज्ञी-र्विधाताज्ञां महीतले ॥२४४॥
भुञ्जानस्य महाभोगान् तस्य पौढपराक्रमाः ।
चत्वारो **दत्त-विजय-मुञ्जाऽ-पराजिताः** सुताः ॥२४५॥
**कल्किनः पाटलीपुत्रे** राजधानी भविष्यति ।
तस्य **कल्किपुरं** नाम द्वितीयं विस्तरिष्यति ॥२४६॥

---

१. मङ्गले । २. पूर्वाह्ने । ३. वाससौधम् ।

D:\chandan/new/kalp-1/pm5\3rd proof

**दत्तपुरं दत्त**राज-धानी **राजगृह**स्य तु ।
**विजय**स्य राजधान्य-**णहिल्लपाटक**स्य च ॥२४७॥
**विजयपुरा**भिधानं भावि-**मुञ्ज**स्य दास्यति ।
**अवन्तिदेशमपरा-जित**स्यापरमण्डलम् ॥२४८॥ युग्मम् ॥
**कल्किनो** राज्यसमये म्लेच्छक्षत्रियभूभुजाम् ।
रुधिरैर्विस्तृतैर्विष्वक् पृथ्वीस्नानं करिष्यति ॥२४९॥
तत्कोशे नवनवति-स्वर्णकोट्यश्चतुर्दशाः ।
सहस्रा गजा हस्तिन्यः सार्द्धचतुश्शतीमिताः ॥२५०॥
सप्ताशीतिलक्षा अश्वाः पञ्चकोटिपदातयः ।
दासकर्मकरादीनां तस्य संख्या न विद्यते ॥२५१॥
नभःखेलित्रिशूलास्त्रः पाषाणहयवाहनः ।
क्रूरात्माऽतिकषायोग्रः स्वभावेन भविष्यति ॥२५२॥
**मथुरायां** तदा **कृष्ण-सीरि**धाम्नी पतिष्यतः ।
भृशं डमर[१]दुर्भिक्ष-रोगैः पीडिष्यते जनः ॥२५३॥
ज्ञात्वा जनमुखात्तत्र **नन्द**भूपविनिर्मितान् ।
पञ्चैष कनकस्तूपान् खनित्वा हेम लास्यति ॥२५४॥
प्रनष्टाऽष्टादशाब्दानि **कल्की** भावी ततो नृपः ।
षट्त्रिंशद्वर्षवयस्क-स्त्रिखण्ड**भरता**धिपः ॥२५५॥
**कल्की** ततोऽतिलोभेन खानयित्वा निजं पुरम् ।
सर्वतोऽपि निधानानि ग्रहीष्यति धनाग्रही ॥२५६॥
जनानां खनतां तत्र निर्गमिष्यति भूमितः ।
धेनुर्लवणदेव्याह्वा सप्रभावा दृषन्मयी ॥२५७॥
भिक्षार्थमटतः साधून् स्थापिता सा चतुष्पथे ।
वीक्ष्य दिव्यानुभावेन शृङ्गैरुद्धट्टयिष्यति ॥२५८॥
गीतार्थानां विचारेणो-पसर्गं भाविनं जवात् ।
विज्ञाय विहरिष्यन्ति साधवः संयमर्थिनः ॥२५९॥

---

१. डमर-राजविग्रह ।

भक्तवस्त्रादिलुब्धास्तु गीतार्थानां तथोदितम् ।
अवमत्याविवेकेन तत्र स्थास्यन्ति केचन ॥२६०॥
सप्तदशाऽथाऽहोरात्रान् वर्षिष्यति पयोधरः ।
अतिवृष्ट्या तया **कल्कि**-नगरं प्लावयिष्यति ॥२६१॥
**कल्की** नंष्ट्वा पुनः क्वापि स्थास्यति स्थलमूर्द्धनि ।
गते जलोपसर्गेऽस्मिन् करिष्यति नवं पुरम् ॥२६२॥
नीरप्रसरतो हेम-गिरीन् **नन्द**विनिर्मितान् ।
निरीक्ष्य मूढधीरर्थलोलुपो भविता भृशम् ॥२६३॥
पुरा करमदातृणां करकर्ता महाकरम् ।
सकराणां करं नव्यं महाकरवतामपि ॥२६४॥
वृथैव दोषमुत्पाद्य लाता धनवतां धनम् ।
छलं वदति भूपानां हलं नेति नयं वदन् ॥२६५॥
लोकात्तथाऽग्रहीतार्थं यथा भाव्यधनो जनः ।
पृथ्व्यामूर्णायुचीर्णायां प्राप्यते न यतस्तृणम् ॥२६६॥
लोके तेन सुवर्णादि-नाणकं नाशयिष्यति ।
चर्मणो नाणकैस्तेन व्यवहारः प्रवर्त्स्यति ॥२६७॥
वेश्याः पाखण्डिनः सर्वे **कल्किना** याचितं करम् ।
तस्मै दास्यन्ति सारम्भाः सावद्याः सपरिग्रहाः ॥२६८॥
पर्णादौ भोजनं कुर्व-न्नाक्रोशांस्तस्य पश्यतः ।
जनो दास्यति निश्वासान् भयं भवति भाजने ॥२६९॥
भाविनि जिनसद्मानि विहरिष्यन्ति साधवः ।
वर्षिष्यन्ति च कालेऽब्दा द्रोणो द्रम्मेण लप्स्यते ॥२७०॥
**कल्की** त्यक्तधनान् साधू-नन्यदा राजवर्त्मनि ।
विलोक्य लोभतो भिक्षा-षष्ठांशमर्थयिष्यति ॥२७१॥
ततः साधुकृतोत्सर्गा[१]-हूता शासनदेवता ।
याचमानान् यतीन् भिक्षां **कल्किनं** वारयिष्यति ॥२७२॥

---

१. सामान्यविधान ।

ततः सर्वप्रकारेण धनं लास्यति लोकतः ।
त्याजयिष्यति लिङ्गानि लिङ्गिभिः स दुराशयः ॥२७३॥
वामजङ्घासव्यकुक्ष्योः सप्रहारौ भविष्यतः ।
पंचाशत्तमवर्षस्य तस्य दुष्कर्मयोगतः ॥२७४॥
अन्ते **कल्की** पुनः स्मृत्वा भिक्षाषष्ठांशहेतवे ।
गोवाटके **प्रातिपदा**-चार्यसाधून्निरोत्स्यते ॥२७५॥
तदा **प्रातिपदा**चार्य-मुख्यसङ्घोऽखिलोऽपि हि ।
शासनदेवतां स्मृत्वा कायोत्सर्गं विधास्यति ॥२७६॥
कायोत्सर्गेण सङ्घस्य प्राप्ताः शासनदेवताः ।
युक्तिभिर्बोधयिष्यन्ति यावत् **कल्की** न भोत्स्यते ॥२७७॥
तावदासनकम्पेन तत्रागन्ता समुत्सकः ।
वृद्धद्विजवपुः कृत्वा शक्रः शासनभक्तितः ॥२७८॥
तं च सिंहासनासीनं वदिष्यति दिवस्पतिः ।
निरागसः किमेतेऽत्र निरुद्धाः साधवस्त्वया ॥२७९॥
स प्राह जज्ञिरे सर्वे पाखण्डाः करदा मम ।
भिक्षांशं ददते नैते निरुद्धास्तेन वाटके ॥२८०॥
वदिष्यति ततः शक्र-स्तमेषां नास्ति किञ्चन ।
भिक्षांशमपि दास्यति न कस्य कथमप्यमी ॥२८१॥
याचमानस्तदेतेभ्यो भिक्षाशं लज्जसे न किम् ।
अमून् मुञ्चान्यथा भावी तवानर्थो महानिह ॥२८२॥
इत्युदित्वा स क्रमेण मम निर्वाणतो गते ।
वर्षसहस्रद्वितये भाद्रशुक्लाष्टमीदिने ॥२८३॥
ज्येष्ठर्क्षे रविवारे च चपेटाप्रहतो रुषा ।
षडशीति-समायुष्कः **कल्किराट्** नरकं गमी ॥२८४॥
शिक्षयित्वाऽऽर्हन्तं धर्मं **दत्तं** तस्याङ्गजं हरिः ।
राज्ये न्यस्य गुरून्नत्वा सङ्घे सौस्थ्ये गमी दिवम् ॥२८५॥
पितुः पापफलं ज्ञात्वा **दत्तः** पुण्यैकतत्परः ।
प्रत्यहं कारितैर्जैनै-श्चैत्यैर्मण्डयिता महीम् ॥२८६॥

एकोनविंशति वर्ष-सहस्राणि ततः परम् ।
भस्मोत्तरात् श्रितप्रौढि-र्जिनधर्मः प्रवर्त्स्यति ॥२८७॥

उक्तं च-"**जिणभत्तनिवा**[१] **इगारलक्खसोलसयसहस्सा होहिंति ।**
**इगकोडिमित्तसासण-पभावगा दुसमसमयम्मि ॥२८८॥**
**इह**[२] **सव्वोदयजुगपवर-सूरिणो चरणसंजुए वंदे ।**
**चउरुत्तरदुसहस्से २००४ दुप्पसहंते सुहम्माई ॥२८९॥**
**इह सुहम्म-जम्बू तब्भवसिद्धा एगावयारिणा सेसा २००२ ।**
**सड्ढदुजोअणमज्झे जयंतु दुब्भिक्खडमरहरा ॥२९०॥**
**जुगपवरसरिससूरी**[३] **दूरीकयभवियमोहतमपसरे ।**
**वंदामि सोलसुत्तर-इगदसलक्खे सहस्से य ॥२९१॥** युग्मम् ॥
**पंचमअरंमि पणपन्नलक्ख-पणपन्नसहस्सकोडिकोडीणं ।**
**पंचसयकोडिपण्णा नमामि सुचरणसयलसूरी**[४] **॥२९२॥**
**तित्तीसलक्खाओ चउरसहस्सा चउसयाइं च ।**
**इगनवई दुसमाए सूरिणं**[५] **मज्झिमगुणाणं ॥२९३॥**
**पंचावन्नाकोडी पंचावन्नाइं सयसहस्साइं ।**
**पंचावन्नं सहस्सं पंचसयं चेव पणपन्ना**[६] **॥२९४॥** एते अधर्माचार्याः ॥
**पंचावन्नाकोडि-लक्खाणं हुंति**[७] **तह सहस्साणं ।**
**चउवन्न-कोडिसया चउआलीसाउ कोडीओ ॥२९५॥**
एते उपाध्यायाः-वाचनाचार्याः
**सत्तरसकोडिलक्खा नवकोडिसहस्स-कोडिसयमेगं ।**
**इगवीसकोडि-इगलक्ख-सट्ठिसहस्सा सुसाहूणं**[८] **॥२९६॥**
[९] **समणीण कोडिसहस्सा दस नवसयकोडि-बार( स ) कोडीओ ।**
**छप्पन्नलक्ख-छत्तीससहस्स-एगुणदुन्निसया ॥२९७॥** एता आर्याः ॥

---

१. ११११६००० શાસનપ્રભાવક । २. सच्चोदय । ३. १११६००० યુગપ્રધાન સદંશ सूरी । ४. ૫૫ લાખ ક્રોડ, ૫૫ હજાર ક્રોડ, ૫૦૦ ક્રોડ બુદ્ધિમાન્ સુચારિત્રને ધારણ કરનારા-सूरयः । ૫. ૩૩૦૪૪૯૧-મધ્યમ ગુણવાળા-आचार्याः । ૬. ૫૫ ક્રોડ, ૫૫ લાખ, ૫૫ હજાર, ૫૫૫-एते अधर्माचार्याः । ૭. ૫૫ લાખ ક્રોડ, ૫૫ હજાર ક્રોડ, ૫૪ સો ક્રોડ, ૪૪ ક્રોડ-एते उपाध्यायाः-वाचनाचार्याः । ૮. ૧૭ લાખ ક્રોડ, ૯ હજાર ક્રોડ, ૧૦૦ ક્રોડ, ૨૧ ક્રોડ, ૧ લાખ ૬૦ હજાર-एते सुसाधवः । ૯. ૧૦ હજાર ક્રોડ, ૯૦૦ ક્રોડ, ૧૨ ક્રોડ, ૫૬ લાખ, ૩૬ હજાર, ૧૯૯ એટલી સાધ્વીઓની સંખ્યા થશે.

**तह सोलकोडिलक्खा तिकोडिसहस्सा य तिन्निकोडिसया ।**
**सत्तरसकोडि-चुलसीलक्खा सुस्सावगाणं[1] तु ॥२९८॥**
**पणवीसकोडिलक्खा सुसाविया[2] कोडिसहस्सबाणउई ।**
**पणकोडिसया बत्तीसकोडी तह बारसब्भहिया'' ॥२९९॥**

इति दुसमसमयसङ्घप्रमाणम् ॥

पञ्चमारकपर्यन्ते दीक्षा द्वादशवार्षिकः ।
**दुःप्रसहो** द्विहस्तांगो ग्रहीता शुद्धवासनः ॥३००॥
षोडशाब्दो महाचार्यो दशवैकालिकागमः ।
युगप्रधानो भवितो-त्कृष्टः षष्ठतपोऽन्वितः ॥३०१॥
व्रतं[3] समाः प्रपाल्याष्टौ विंशत्यब्दः कृताष्टमः ।
एकावतारः सौधर्मे देवो भाव्यब्धिजीवितः[4] ॥३०२॥
**फल्गुश्रीः** नामतः साध्वी **नागिलः** श्रावकस्तथा ।
**सत्यश्रीः** श्राविका सङ्घः पूर्वाह्णे क्षयमेष्यति ॥३०३॥
मध्याह्ने **सुमुखो** मन्त्री नृपो **विमलवाहनः** ।
विनङ्क्ष्यत्यपराह्णे तु वह्निर्विध्यास्यति[5] क्षितौ ॥३०४॥
**''वासाणवीससहस्सा नवसय-तिम्मास-पंचदिण[6] पहरा ।**
**इक्का घडिआ दोपल-अक्खर-अडयाल-जिणधम्मो'' ॥३०५॥**
वाताः क्षयाय वास्यन्ति परुषा बहुपांसवः ।
उग्रं शीतं विधातेन्दु-रुग्रं सूर्यो ज्वलिष्यति ॥३०६॥

---

१. १६ લાખ ક્રોડ, ૩ હજાર ક્રોડ, ૩૦૦ ક્રોડ, ૧૭ ક્રોડ ૮૪ લાખ એટલા સુશ્રાવકની સંખ્યા થશે. ૨. ૨૫ લાખ ક્રોડ, ૯૨ હજાર ક્રોડ, ૫૦૦ ક્રોડ, ૩૨ ક્રોડ, ૧૨ અધિક એટલી સુશ્રાવિકાની સંખ્યા થશે. ३. ''व्रतं समाः प्रपाल्यष्टौ विंशत्यब्दः कृताष्टमः । एकावतारः सौधर्मे पल्यायुर्भविता सुरः ॥ श्रीविनयचन्द्रसूरिविरचितदीपालिकाकल्पः-श्लो. १८०'' ॥ ४. શ્રાદ્ધદિનકૃત્યે-સાગરોપમનું આયુષ્ય કહેલ છે. સ્વર્ગથી ચ્યવેલા-૧૨ વર્ષ ગૃહસ્થપણે રહી, ૪ વર્ષ સામાન્ય સાધુ અને ૪ વર્ષ શ્રીઆચાર્ય યુગપ્રધાનપદ ધારી यतः-''एगो साहू एगा य साहुणी सड्ढओ य सड्ढी वा। आणाजुत्तो संघो सेसो पुण अट्ठिसंघो उ'' ॥ ५. अतिस्निग्धे अतिरूक्षे च काले वह्निरेषो न भवति। બાદર વહ્નિ ઉત્પન્ન થાય. ६. વીસ હજાર વર્ષ, અને નવસો વર્ષ ઉપર, ત્રણમાસ પાંચદીન પાંચપ્રહર એક ઘડી બે પલ અડતાલીસ અક્ષર સુધી જીનેશ્વરદેવનો ધર્મ રહેશે.

D:\chandan/new/kalp-1/pm5\3rd proof

अत्युग्रशीततापाभ्यां क्षयं लोको गमिष्यति ।
अंगारमर्मराभा भू-र्भस्मरूपा भविष्यति ॥३०७॥
**भस्माऽऽ-म्ल-मुर्मुर-क्षार-विषा-ग्न्य-शनि**-तोयदाः ।
वर्षिष्यन्ति सप्त-सप्त-दिवसानि पृथक् पृथक् ॥३०८॥
कास-कुष्ट-ज्वर-श्वासैः क्षयं लोकः प्रयास्यति ।
भविष्यति समं सर्वं गिरिगर्त्ताऽऽपगादिकम् ॥३०९॥
**वैताढ्य**मूले तस्यैव द्वासप्तति बिलेषु च ।
गङ्गा-सिन्धुबिलेष्वेवं स्थास्यन्ति पशु-मानवाः ॥३१०॥
रथाङ्गमध्यतुल्यौघ-गङ्गा-सिन्धुजलोद्भवैः ।
निशि कृष्टैः सूर्यपक्वै-स्तेषां मत्स्यादिभिर्घसिः ॥३११॥
निर्लज्जा वस्त्ररहिता-रत्निमाना[१] नराः स्त्रियः ।
नृणां विंशतिरब्दानि स्त्रीणां षोडशजीवितम् ॥३१२॥
गर्भं धास्यन्ति षड्वर्षाः स्त्रियो दुष्प्रसवास्तदा ।
द्रक्ष्यन्ति पुत्रपुत्रादीन् विंशत्यब्दायुषो नराः ॥३१३॥
कषायोग्राः पितृमातृ-विवेकविकला नराः ।
षष्ठारे भाविनो वर्ष-सहस्राण्येकविंशतिः ॥३१४॥
**भरतेष्वैरवते**षु दशसु[२] दुःषमाः समाः ।
उत्सर्पिण्यां प्रथमाऽर-एतत्तुल्यो भविष्यति ॥३१५॥
उत्सर्पिण्यां प्रथमाऽरे षष्ठतुल्ये गते सति ।
प्रशान्तोपप्लवावर्तो द्वितीयाऽरो लगिष्यति ॥३१६॥
लग्ने तत्राम्बुदाः पञ्च वर्षिष्यन्ति क्रमादमी ।
तेष्वाद्यः **पुष्करावर्तो** भूतापमपनेष्यति ॥३१७॥
**क्षीरोदः** सस्यनिर्माता स्नेहकर्त्ता **घृतोदकः** ।
**शुद्धोद** औषधीहेतू-**रसोदो** रसकृत् क्षितौ ॥३१८॥
पञ्चत्रिंशद्दिनान्यब्द-वृष्टिरेवं भविष्यति ।
द्रुमौ-षधी-लता-वल्ली-सस्य उत्पत्स्यते स्वयम् ॥३१९॥

---

१. बद्धमुष्टिरसौ रत्निः । २. पञ्चभरत-पञ्चैरवतयोः मिलित्वा दशक्षेत्रेषु ।

D:\chandan/new/kalp-1/pm5\3rd proof

तद्वीक्ष्य निस्सरिष्यन्ति बिलेभ्यो बिलवासिनः ।
वर्द्धमान-वपू-रूप-बल-जीवितसम्पदः ॥३२०॥
पुष्प-धान्य-फला-हारा-स्त्यक्ष्यन्त्यभक्ष्यभक्षणम् ।
गतरोगा भविष्यन्ति सुखा-वाता-जलर्तवः ॥३२१॥
द्वितीयारकपर्यन्ते मध्यदेशेऽवनीतले ।
भविष्यन्ति **कुलकराः** सप्तामी क्रमतो यथा ॥३२२॥
**विमलवाहना**ह्वानः **सुदामा सङ्गम**स्तथा ।
**सुपार्श्वो दत्त-सुमुखौ सम्मुचि**श्चेति नामतः ॥३२३॥
जातजातिस्मृतिस्तेषु राजा **विमलवाहनः** ।
राज्यस्थितिकृते ग्राम-पुरादीन् स्थापयिष्यति ॥३२४॥
गजाश्वरथपत्त्यादीन् ग्राहयिष्यति सेवकैः ।
अन्नपाकविधिं वह्ना-वुत्पन्ने सोपदेक्ष्यति ॥३२५॥
व्यवहारप्रवृत्त्यर्थं द्वासप्ततिकला लिपीः ।
शतशिल्पानि लोकानां स भूप उपदेक्ष्यति ॥३२६॥
सैकोननवतिपक्षेऽथोत्सर्पिण्यरयुगे गते ।
**शतद्वारपुरे** रम्ये **सम्मुचे**रवनीपतेः ॥३२७॥
**भद्रादेव्या**श्चतुर्दश-स्वप्नसूचितः सुतः ।
कृतजन्मोत्सवो देवैः **पद्मनाभा**ऽभिधो जनः ॥३२८॥
सप्तहस्ततनुः स्वर्ण-दीधितिः सिंहलाञ्छनः ।
द्वासप्ततिसमायुष्कः **श्रेणिका**त्मा भविष्यति ॥३२९॥ त्रिभिर्विशेषकम् ॥
**पद्मनाभ**जिनाधीशा-दनन्तरजिनेश्वरः ।
**सूरदेवा**भिधः ख्यातः [१]**सुपार्श्वा**ऽत्मा निरञ्जनः ॥३३०॥
[२]**उदायि**जीवस्तृतीयः **सुपार्श्वो**ऽथ जिनेश्वरः ।
भविता **पोट्टिलो** जीव-स्तुर्यः **स्वयंप्रभो** जिनः ॥३३१॥
जीवो **दृढायुषो** भावी **सर्वानुभूतिः** पञ्चमः ।
**कीर्ति**जीवो जिनः षष्ठ-स्तथा **देवश्रुता**ह्वयः ॥३३२॥

---

१. महावीर प्रभुना काका । २. श्रेणिक पुत्र ।

D:\chandan/new/kalp-1/pm5\3rd proof

सप्तमः **शङ्ख**जीवस्तु तथा नाम्**नोदयो** जिनः ।
**आनन्दा**त्मा जिनो भावी **पेढाल**संज्ञितोऽष्टमः ॥३३३॥
भावी **सुनन्द**जीवस्तु नवमः **पोट्टिला**ह्वयः ।
**शतका**त्मा दशमस्तु **शतकीर्त्ति**जिनाधिपः ॥३३४॥
**देवक्या** भविता चात्मै-कादशो **मुनिसुव्रतः** ।
जीवस्तु **वासुदेव**स्य तीर्थकृद् द्वादशो**ऽममः** ॥३३५॥
**सत्यके**र्भवितात्मार्हन् **निष्कषाय**स्त्रयोदशः ।
जीवस्तु **बलदेव**स्य **निष्पुलाक**श्चतुर्दशः ॥३३६॥
पञ्चदशो जिनो भावी **सुलसा**त्माऽथ **निर्ममः** ।
तीर्थकृ**द्रोहिणी** जीवः षोडश**श्चित्रगुप्तकः** ॥३३७॥
**रेवत्या**त्मा **समाधि**स्तु भावी सप्तदशो जिनः ।
जिनः **शतालिनो** जीवोऽष्टादशः **संवरा**ह्वयः ॥३३८॥
**द्वीपायन**स्य जीवश्चैकोनविंशो **यशोधरः** ।
**कर्णजीवो** जिनो विंशो **विजया**ख्यो भविष्यति ॥३३९॥
**नारदा**त्मा पुन**र्मल्ल** एकविंशो जिनोत्तमः ।
**अम्बडा**त्मा जिनो भावी द्वाविंशो **देव**नामतः ॥३४०॥
**अमरा**त्मा त्रयोविंशो**ऽनन्तवीर्या**भिधो जिनः ।
**स्वातिबुद्ध**जीवो **भद्र**श्चतुर्विंशो भविष्यति ॥३४१॥
आयुः-प्रमाण-कल्याणा-न्तर-लाञ्छन-वर्णकाः ।
एते पश्चानुपूर्व्या स्युर्वर्त्तमानजिनैः समाः ३४२॥
[1]दीर्घदन्तो [2]गूढदन्तः [3]**शुद्धदन्तस्**तृतीयकः ।
[1][4]**श्रीचन्द्र**नामः [5]**श्रीभूतिः** [6]**श्रीसोमः** [7]**पद्म**संज्ञितः ॥३४३॥
[8]**महापद्मो** [9]**दर्शनाख्यो** [10]**विमलो**[11]**ऽमलवाहनः** ।
**भरतेऽ**[12]**रिष्ट**नामा च भाविनश्चक्रवर्तिनः ॥३४४॥
[1]**नन्दिश्च** [2]**नन्दिमित्रा**ख्यो नाम्ना [3]**सुन्दरबाहुकः** ।
[4]**महाबाहू** [5]**रतिबलो** [6]**महाबलो** [7]**बल**स्तथा ॥३४५॥

---

१. श्रीदन्तः-भावलोकप्रकाशे ।

[८]**द्विपृष्ठश्च** [९]**त्रिपृष्ठ**श्च विष्णवो भाविनो नव ।<br>
[१]**तिलको** [२]**लोहजङ्घश्च**-[३]**वज्रजङ्घश्च**-[४]**केशरी** ॥३४६॥

[५]**बलि**-[६]**पह्लाद**नामाना-[७]**वपराजित**-[८]**भीमकौ** ।<br>
[९]**सुग्रीव**श्च [१]प्रतिकृष्णाः स्वचक्रेण हता नव ॥३४७॥

[१]**जयन्तो** [२]**व्याजितो**-[३]**धर्मः**-[४]**सुप्रभाह्वः**-[५]**सुदर्शनः** ।<br>
[६]**आनन्दो**-[७]**नन्दनः**-[८]**पद्मः** [९]**सङ्कर्षणो** बला नव ॥३४८॥

एकषष्टिस्तृतीयाऽरे शलाकापुरुषास्तथा ।<br>
उत्सर्पिण्यास्तुरीये तु जिनश्चक्री च भाविनौ ॥३४९॥

कल्पद्रुमे समुत्पन्ने युग्मिनो भाविनस्ततः ।<br>
अष्टादशकोटिकोटी[२]रेतराणि निरन्तरम् ॥३५०॥

उत्सर्पिण्यवसर्पिण्यौ कालचक्रं निगद्यते ।<br>
तान्यतीतान्यनन्तानि पुनर्भाविनि भा(भ)रते ॥३५१॥

इत्यादिश्य प्रबोधार्थं प्राहिणोत् **देवशर्मणः** ।<br>
**गौतमं** निकटग्रामे प्रेमबन्धच्छिदे जिनः ॥३५२॥

समस्तपूर्ववेत्तृणां स्वामिस्त्रिशती ३०० तदा ।<br>
अवधिज्ञानिनश्चासं-स्त्रयोदशशतीमिताः १३०० ॥३५३॥

सप्तशती ७०० वैक्रियाणां तथा केवलिनामभूत् ७०० ।<br>
विपुलानां पंचशती ५०० वादीनां च चतुश्शती ४०० ॥३५४॥

अनुत्तरोपपातिना-मष्टशत्यभवत्तथा ८०० ।<br>
एवं समस्तसाध्वादि-युतः षष्ठतपाः प्रभुः ॥३५५॥

त्रिंशत्समा गृहे चास्थात् सार्द्धद्वादशसंयतः[३] ।<br>
ज्ञानी त्रिंशत्तमोऽर्द्धोनाः द्वासप्ततिशरद्वयाः[४] ॥३५६॥

**कार्तिक**स्य तिथौ **दर्शे** द्वितीये **चन्द्र**वत्सरे ।<br>
**प्रीतिवर्द्धन**सन्मासे पक्षे तु **नन्दिवर्द्धने** ॥३५७॥

दिने **चोपशमा**ह्वाने **देवानन्दा**ह्वया निशि ।<br>
[५]**सर्वार्थसिद्ध**-मौहूर्त्ते **नागे** च करणे तथा ॥३५८॥

---

१. प्रतिवासुदेवाः । २. सागराणि । ३. छद्मस्थः । ४. अवस्था । ५. हंमेशां चार घडी बाकी होय त्यारे ज शरु थाय छे.

निशापश्चिमयामार्द्धे नक्षत्रे **स्वाति**नामनि ।
पर्यङ्कासनमासीनः स्वामी शक्रेण भाषितः ॥३५९॥
क्षणं नाथ ! प्रतीक्षस्व जन्मभं ते यतोऽधुना ।
द्विसहस्रसमास्थायी सङ्क्रान्तो भस्मकग्रहः ॥३६०॥
तीर्थपूजाप्रभाहर्ता नाथ ! शासनपीडकः ।
तव दृष्टिप्रभावेण भविता निष्फलोदयः ॥३६१॥
प्रभुरूचे न शक्रायुः-सन्धौ जिना अपि क्षमाः ।
अभाव्यं न भवेन्न स्या-न्नाशो भावस्य भाविनः ॥३६२॥
कल्याणफलपाकानि तथा पापफलानि च ।
पञ्चपञ्चाशतं **वीरो**ऽ-ध्ययनानि निगद्य च ॥३६३॥
षट्त्रिंशत्तमथाऽऽख्यायाऽ-पृष्टव्याकरणानि च ।
शैलेशीकरणं कृत्वा **प्रधाना**ऽध्ययनं स्मरन् ॥३६४॥
पञ्चह्रस्वाक्षरोच्चार-प्रमिताऽनेहसा जिनः ।
कृतयोगनिरोधः सन् सिद्धिसौधमुपागतः ॥३६५॥
समुत्पन्नेषु भूयस्सु तदाऽनुद्धारकुन्थुषु ।
दुष्पालं संयमं मत्वाऽ-नशनं साधवो व्यधुः ॥३६६॥
नव **मल्लकि**ज्ञातीया **लेच्छकि**ज्ञातयो नव ।
दशाष्टौ गणराजानः **काशी-कोशल**भूभृतः ॥३६७॥
अमावास्यादिने कृत्वा ह्युपवासं [१]सपौषधम् ।
भावोद्योते गते द्रव्यो-द्योतदीपान्निशि व्यधुः ॥३६८॥
गच्छद्भिर्देवदेवीना-मागच्छद्भिर्गणैस्तथा ।
ज्योतिर्मयी निशा साऽभू-**न्मेराइयर**वाकुला ॥३६९॥
इतो देवमुखात् ज्ञात्वा मोक्षं **वीरस्य गौतमः** ।
निर्मोहतामयं स्वस्य चिन्तयामास चेतसि ॥३७०॥
भावयतो विमोहत्वं **गौतम**स्य गणेशितुः ।
क्षीणमोहस्य सञ्जज्ञे केवलज्ञानमुज्ज्वलम् ॥३७१॥

---

१. आहारत्यागरूप अन्यथा तेओने दीप करवानुं संभवतु नथी.

ततःप्रभृति लोकेषु पर्व**दीपोत्सवा**भिधम् ।
सर्वतो दीपनिर्माणात् प्रावर्त्तत महीतले ॥३७२॥
मर्त्यामर्त्यगवादीनां चक्रे नीराजना जनैः ।
**भस्मक**प्रतिघाताय **मेराइयम**भूत्ततः ॥३७३॥
**वीर**मोक्षमहिमानं कृत्वा **श्रीगौतम**प्रभोः ।
पूर्णज्ञानोत्सवं चक्रे शक्रः प्रतिपदः प्रगे ॥३७४॥
श्री**गौतमो**क्त-श्रीसूरि-मन्त्राराधकसूरयः ।
अक्षार्चनां विनिर्मान्ति दिनेऽस्मिन् चन्दनादिभिः ॥३७५॥
नि**र्वीरां** क्षितिमाऽऽप्य मोहचरटो लुण्टन्नलं सर्वतो,
दृष्टः श्रीगणनायकेन वदता मे राज्यमेतन्न किम् ? ।
जानासि त्वमहो मुमूर्षुरधुनाऽयासीति दूरे किय-
न्नष्टो दीपकरैर्नरैर्निजगृहात् सूर्पच्छलात् त्रास्यते ॥३७६॥
श्री**वीरे** निर्वृते राजाऽ-भुञ्जानो **नन्दिवर्द्ध**नः ।
द्वितीयायां **सुदर्शना**-भगिन्या भोजितो बलात् ॥३७७॥
ततो **भ्रातृ-द्वितीया**ऽभूद्विश्रुता जगतीतले ।
**सम्प्रते** ! भूपते ! तेन ख्याता **दीपालिका** जने ॥३७८॥
राजा पुनर्जगादा**ऽऽर्य-सुहस्त्या**चार्यपुङ्गवान् ।
प्रभो ! पुनः समस्त्येष संशयो मम मानसे ॥३७९॥
वस्त्रान्नफलपात्रादे-र्भोगो गेहादिमण्डनम् ।
अन्योऽन्यं जनो **जोत्काराः** कस्मादस्मिन् दिने विभो ! ॥३८०॥
अवोचन् वाचनाचार्याः शृणु हेतुं महीपते ! ।
**उज्जयिन्यां** नृपो **धर्मो नमुचि**स्तस्य धीसखः ॥३८१॥
विहरन्तोऽन्यदा तत्र सूरयः समवासरन् ।
**मुनिसुव्रत**तीर्थेश-शिष्याः श्री**सुव्रता**ह्वयाः ॥३८२॥
वन्दनार्थं गतस्तेषां श्री**धर्मः** सपरिच्छदः ।
**नमुचिः** सचिवस्तस्य वदन् क्षुल्लेन निर्जितः ॥३८३॥
कोपाटोपवशः सोऽथ मुनीन् हन्तुमना निशि ।
निष्कृपः कृष्टनिस्त्रिंशः साध्वासन्नमुपागतः ॥३८४॥

जैनदेवतया तावत् स्तम्भितः पथि संस्थितः ।
प्रभातं च ततो जात-मुद्गतस्तपनातपः ॥३८५॥
श्री**धर्मः** भूपतिः प्राप्तो गुरून्नन्तुं निरीक्षितः ।
स्तम्भितो **नमुचि**स्तेन क्षमयित्वाऽथ मोचितः ॥३८६॥
नराधिपेन लोकेन धिक्कृतो लज्जितस्ततः ।
निर्गत्य नगराद् भ्राम्यन् **हस्तिनागपुरं** गतः ॥३८७॥
तत्र **पद्मोत्तरो** राजा **ज्वालादेव्य**स्ति तत्प्रिया ।
सम्यक्त्वशीललावण्यगुणालङ्कारमण्डिता ॥३८८॥
तयोस्ते **विष्णुकुमार-महापद्मौ** तनूरुहौ ।
भुवनानन्दनौ शूरौ दानकल्पद्रुमोपमौ ॥३८९॥
यौवराजपदं **विष्णुकुमारे** त्वनभीप्सति ।
पिता प्रमुदितस्वान्तो **महापद्म**स्य दत्तवान् ॥३९०॥
**महापद्म**कुमारस्य **नमुचि**र्मिलितोऽन्यदा ।
स्थापितः सचिवस्तेन मानसन्मानपूर्वकः ॥३९१॥
सोऽन्यदा सिंहशौण्डीरं जिग्ये **सिंहरथं** नृपम् ।
ददौ **पद्मो** वरं तुष्टः स च न्यासीचकार तम् ॥३९२॥
**ज्वालादेव्या**ऽन्यदा मोदा-द्रथयात्राचिकीर्षया ।
रथो निर्मापितो जैनः स्वर्णरत्नैरलङ्कृतः ॥३९३॥
सपत्न्याऽथ तदा तस्या मोहमिथ्यात्वमूढया ।
**लक्ष्म्या**पि स्पर्द्धया प्रौढः कारितो [१]ब्राह्मणो रथः ॥३९४॥
रथाकृष्टिनिमित्तेन वादे जाते द्वयोस्तयोः ।
कलहनिवृत्त्यै राजा रथौ द्वावप्यवारयत् ॥३९५॥
**महापद्म**स्तदा मातु-रपमानं तथा कृतम् ।
समीक्ष्य दुःखितस्वान्तो गतो देशान्तरं प्रति ॥३९६॥
स शक्रविक्रमाक्रान्त-षट्खण्डक्षोणिमण्डलः ।
ऊढा **मदनावलीकः** प्राप्तचक्रिपदोऽभवत् ॥३९७॥

---

१. ब्रह्माणो ।

D:\chandan/new/kalp-1/pm5\3rd proof

तादृश्याऽसमया ऋद्ध्या **पद्मः** प्राप्तो निजे पुरे ।
पित्रा प्रवेशितोऽतुच्छ-घनोत्सवपुरस्सरम् ॥३९८॥
ततो **भरत**साम्राज्या-भिषेकं सन्महोत्सवम् ।
**महापद्मस्य** राजानश्चक्रुः **पद्मोत्तरा**दयः ॥३९९॥
[१]साकं **विष्णुकुमारेण** नृपः **पद्मोत्तर**स्ततः ।
**सुव्रताचार्य**पादान्ते प्रव्रज्य त्रिदिवं ययौ ॥४००॥
षष्टिशतानि ६००० वर्षाणि तपस्तीव्रं वितन्वतः ।
जाता **विष्णुकुमार**स्य लब्धयो वैक्रियादिकाः ॥४०१॥
**महापद्म**नरेन्द्रेण तुङ्गशृङ्गैर्गतप्रमैः ।
प्रतिद्रङ्गं प्रतिग्रामं प्रासादैर्भूषिता मही ॥४०२॥
प्रौढप्रभावनापूर्व-स्वर्णरत्नमयै रथैः ।
जनन्याः पूरितस्तेन रथयात्रामनोरथः ॥४०३॥
वरेण **नमुची** राज्यं [२]क्रतुहेतोरयाचत ।
चक्री दत्वा तदेतस्य स्वयमन्तःपुरे स्थितः ॥४०४॥
तदा वर्षाचतुर्मासाभिग्रहा **हस्तिनापुरे** ।
परिवारयुतास्तस्थुः श्रीमत्**सुव्रतसूरयः** ॥४०५॥
निरीक्ष्य **नमुचिः** सूरीन् स्मरन् वैरं तदाऽवदत् ।
त्वां मुक्त्वा भक्तितः सर्वे लिङ्गिनो मामुपस्थिताः ॥४०६॥
स्थेयं न साधुभिस्तन्मे भूमौ सप्तदिनोपरि ।
स्थाता यस्तमहं हन्ता देयं मम न दूषणम् ॥४०७॥
प्रधानैः सचिवैः सोऽथ सङ्घेन च [३]बहूक्तिभिः ।
स्थित्यर्थं तत्र साधूनां मानितोऽपि न मन्यते ॥४०८॥
सङ्घस्यानुज्ञया पेष्य साधू **सुव्रतसूरयः** ।
मेरुशृङ्गस्थितं **विष्णुकुमारं** मुनिमाह्वयन् ॥४०९॥

---

१. समं **विष्णुकुमारेण** स्वयं **पद्मोत्तरो** नृपः । **सुव्रताचार्य**पादान्ते परिव्रज्य ययौ शिवम् ॥ इतिदीपालिकाकल्पः, श्लो०-२५३ । २. यज्ञने माटे कार्तिकपूर्णिमा सुधी । ३. चटूक्तिभिः ।

गुर्वादेशेन स प्राप्तो ववन्दे स्वगुरून् मुदा ।
आकारणनिमित्तं तै-स्तस्याऽकथि यथातथम् ॥४१०॥
ततो **विष्णुकुमारो**ऽगा-त्तदानीं नृपसंसदि ।
स नेमे **नमुचिं** मुक्त्वा निःशेषैरपि राजभिः ॥४११॥
उवाच **नमुचिं विष्णुः** [१]पूरिताभिग्रहा नृप ! ।
यास्यन्ति साधवः स्थित्यै कियन्तीं देहि तन्महीम् ॥४१२॥
ततस्तस्य नृपः पृथ्वीं त्रिपदीप्रमितामदात् ।
तन्निशम्य वचस्तस्य च कोपाटोपवानभूत् ॥४१३॥
लक्षयोजनमानाङ्गो **विष्णु**र्वैक्रियलब्धितः ।
क्रमौ पूर्वापरोदध्योर्न्यस्य विश्वमकम्पयत् ॥४१४॥
तृतीयं **नमुचेः** पृष्टेऽ-निष्टं क्रममतिष्ठितम् ।
क्षिप्त**स्त्रिविक्रमे**णेति रसातलं बली रिपुः ॥४१५॥
[२]चलाचलाचला जज्ञे पर्वताश्च चकम्पिरे ।
समुद्रा मुक्तमर्यादा भयग्रस्ता ग्रहास्तदा ॥४१६॥
इदं किमिति संभ्रान्ता-अभूवंस्त्रिदशा अपि ।
जातशङ्कोऽस्तशङ्कोऽपि शक्रस्तत्र क्षणेऽजनि ॥४१७॥
अवधिज्ञानतो ज्ञात्वा निमित्तं तत्र वासवः ।
गन्धर्वान् प्राहिणोद् **विष्णुकुमार**स्योपशान्तये ॥४१८॥
शक्रनिर्दिष्टगन्धर्व-गीतैः शाम्यशमाऽमृतैः ।
**विष्णुः** प्रशान्तकोपाग्नि-र्जज्ञेऽसीमशमोदधिः ॥४१९॥
स्वभावस्थं तदा साधुं **महापद्मो**ऽनमत् मुदा ।
तमुपालभ्य सूराणां पादान्ते मुनिरागतः ॥४२०॥
आलोचितः प्रतिक्रान्तः पापं सङ्घप्रभावनाम् ।
कृत्वा विशुद्धचारित्र-युक्तो **विष्णुः** शिवं गतः ॥४२१॥

---

१. हजु चोमासानो अभिग्रह पूर्ण थयो नथी । २. ते वेला अचल एवी पृथ्वी पण चलायमान थई ।

उपशान्ते तदोत्पाते पुनरुज्जीवितो जनः ।
संभूय भोजनाच्छादाऽ-लङ्काराद्युत्सवान् व्यधात् ॥४२२॥
प्रतिवर्षं ततो लोकः करोति प्रतिपद्दिने ।
वस्त्रान्नपान[१]जोत्कार-गेहभूषादिकोत्सवान् ॥४२३॥
यो मुनीनामवज्ञाकृ-न्नररूपो मृगो हि सः ।
इति ख्यातीकृते राज्ञा कारितो [२]गोहिसोऽभवत् ॥४२४॥
**श्रीवर्धमान**निर्वाण-कल्याणकदिने नृपैः ।
दीपानां करणाल्लोके जज्ञे **दीपोत्सव**स्थितिः ॥४२५॥
चतुर्द्दश्याममावास्यां षोडशप्रहरावधिः ।
उपोष्य कोटिसहितं पूजयेत् [३]श्रुतमष्टधा ॥४२६॥
पञ्चाशतं सहस्राणि परिवारं स**गौतमम्** ।
स्मृत्वा स्वर्णाम्बुजेऽखण्ड-दीपो बोध्यः सतण्डुलः ॥४२७॥
इत्थं सहस्रपञ्चाश-द् गुणं पुण्यमुपार्ज्यते ।
जैनधर्मरता भव्याः प्राप्नुवन्त्यक्षयं सुखम् ॥४२८॥
यथा वृक्षेषु **कल्पद्रुः** सुरेषु **त्रिदशाधिपः** ।
**चक्रवर्त्ती** नरेन्द्रेषु नक्षत्रेषु **हिमद्युतिः** ॥४२९॥
तेजस्विषु **दिवानाथः सुवर्णं** सर्वधातुषु ।
तथा **दीपालिकापर्व** प्रधानं सर्वपर्वसु ॥४३०॥
**वीरतीर्थपति**राप निर्वृतिं यत्र केवलरमां च **गौतमः** ।
राजभिर्व्यरचि **दीपकोत्सव**स्तत्रतोऽतिगुरुपर्वभूतले ॥४३१॥
जयश्रियं यच्छतु वः स एष **दीपोत्सवा**ख्यो दिनचक्रवर्त्ती ।
समस्तविश्वत्रितयप्रदत्तराज्योत्सवैर्निमितसर्वसिद्धिः ॥४३२॥
एवं निशम्याऽऽ**र्यसुहस्तिसूरे**र्**दीपालिकापर्व**समस्तदेशे ।
प्रावीवृतत् **सम्प्रति**भूमिभर्त्ता राज्यं वितन्वन् प्रतिवर्षमत्र ॥४३३॥

---

१. जुहारसा । २. गोहिसो-छाणनो गोह, जे साधुओनी निंदा करे छे, ते मनुष्य छतां पशुसमान ज छे, तेवुं सर्व स्थाने प्रसिद्धिमां लाववा माटे अने जणाववा माटे राजाए घेर घेर गोहिसो (गोवर्द्धन) घरनी बाहेर कराव्यो, हजु पण मारवाड वगेरेमां छाणनो गोहिसो करवामां आवे छे. ३. अष्टधा-चन्दन-धूप-दीप-नैवेद्य-वस्त्र-कर्पूर-कुसुम-नाणकादि ।

अन्यकर्तृक**दीपालिकल्पा**दिषु विलोकितः ।
अर्थो न्यबन्धि कल्पेऽत्र स्वान्योपकृतिहेतवे ॥४३४॥
यदवद्यं भवेदत्र मन्दबुद्धित्वहेतुना ।
तदुदारकृपावद्भिः शोधनीयं मनीषिभिः ॥४३५॥
संवत्सरेऽग्नि-३ द्विप-८ विश्व-१४ (१४८३) सम्मिते **दीपालिकाकल्प**ममुं विनिर्ममे ।
तपागणाधीश्वर**सोमसुन्दर**श्रीसूरिशिष्यो **जिनसुन्दरा**ह्वयः ॥४३६॥
**दीपालिकापर्व**कल्पोऽयं वाच्यमानः सुधीजनैः ।
जीयाज्जयश्रियो हेतु-राचन्द्रार्कजगत्त्रये ॥४३७॥
इति श्रीतपागच्छाधिराज**श्रीसोमसुन्दरसूरेः** ।
शिष्यभट्टारकप्रभो**र्जिनसुन्दरसूरेः** कृतिरेषा विनिर्मिता ॥४३८॥

**श्रीयुगप्रधानावतार-तपागच्छाधिपति-श्रीजगच्चन्द्रसूरीश्वरशिष्य-**
**श्रीदेवसुन्दरसूरीश्वरशिष्य-श्रीसोमसुन्दरसूरीश्वरशिष्य-**
**श्रीजिनसुन्दरसूरीश्वरविरचितः**
**श्रीदीपालिकाकल्पः समाप्तः ॥**

● ● ●

D:\chandan/new/kalp-1/pm5\3rd proof

श्रीअज्ञातकर्तृकः

# दीपालिकाकल्पः ॥

उप्पायविगमधुवमयमसेसभावप्पयासओ भयवं ।
तिहुयणपणमियचरणो सिरि**वीरजिणेसरो** जयइ ॥१॥
वुच्छं संखेवेणं चरियं तस्सेव भुवणअच्छरियं ।
जायं जमियसिद्धं **दीवालिय**नाम वरपव्वं ॥२॥
श्री**वर्द्धमान**मानम्य वक्ष्ये **दीपालिको**त्सवम् ।
राजाऽभूत् **सम्प्रति**र्नाम्ना त्रिखण्डभरताधिपः ॥३॥
जीवतः स्वामिनो बिम्बं वन्दनायाऽन्यदा ययुः ।
**उज्जयिन्यां** श्रीम**दार्यसुहस्त्या**चार्यकुञ्जराः ॥४॥
अन्यदा रथयात्रायां दृष्ट्वा [१]तान् **सम्प्रति**र्नृपः ।
सञ्जातजातिस्मरणो नमस्कृत्य सोऽजिज्ञपत् ॥५॥
मया द्रमकमात्रेण प्रसादाद्भवतामिदं ।
राज्यं प्राप्तं तद् गृहणीत त्वमनुगृह्णीत मां प्रभो ! ॥६॥
सूरिराह–राज्यं न कल्पतेऽस्माकं निस्पृहाणां वपुष्यपि ।
त्वं मोक्षवृक्षबीजाभे सम्यक्त्वे निश्चलो भव ॥७॥
संपूज्याः श्रीमदर्हन्तः पर्युपास्याः सुसाधवः ।
दयादानादिको धर्म्मः कर्तव्यः सर्वपर्वसु ॥८॥
पर्वाणि वार्षिकादीनि जैना एवं वदन्ति तत् ।
ख्यातं **दीपालिकापर्व** लोके लोकोत्तरे कुतः ॥९॥

---

१. आर्यसुहस्त्याचार्यान् १) श्रेणिक २) कोणिक ३) ...नन्द ४) चन्द्रगुप्त ५) बिन्दुसार ६) अशोक ७) कुणाल ८) सम्प्रति ।

**D:\chandan/new/kalp-1/pm5\3rd proof**

सूरिराह–**पाणय**कप्पाउ चुओ **आसाढे सुक्कपक्खछट्ठि**दिणे ।
**खत्तियकुंड**ग्गामे **हत्थुत्तर**रिक्खयोगेण ॥१०॥
**सिद्धत्थ**पत्थिवपिया **तिसला**देवीए उयरि उप्पण्णो ।
अह सा वि रयणसेसे पासइ चउद्दस महासुमिणे ॥११॥
**चित्तस्ससुद्धतेरसिं** रत्तिं जाउ पहू कणयवण्णो ।
तत्तो से सूईकम्मं विहियं छप्पन्नकुमरीहिं ॥१२॥
णाणेण मुणिय जम्मणं अभिसेओ पवरतित्थनीरेहिं ।
सुरगिरिसिहरम्मि तहिं विहिओ चउसट्ठिइंदेहिं ॥१३॥
वमइ नायकुलंतो विहियं नामं च **वद्धमाणो** त्ति ।
अणहियकलाइ कुसलो जुव्वणसमयं तओ पत्तो ॥१४॥
भोगे परम्मुहेण वि कम्मं नाऊण भोगफलबद्धं ।
ते पहुणा परिणीया **जसोमई** रायवरकन्ना ॥१५॥
तिहिं णाणेहिं समग्गो तीसं वासाइं वसइ गिहवासे ।
लोगंतियदेवेहिं दिक्खासमए तओ कहिओ ॥१६॥
संवच्छरियं दाणं दाऊं **चंदप्पहा**ए सिवियाए ।
पव्वइओ सिरि**वीरो मग्गसिरे कसिणदसमि** दिणे ॥१७॥
छउमत्थो **वीर**जिणो पक्खाहियसड्ढबारिवरसेसु ।
सुरनरतिरिउवसग्ग यऽभग्गचित्तो सहइ सम्मं ॥१८॥
**उज्जुवालि**नइतीरे **सामाय**कुडंबिखित्तपासंमि ।
**साल**रुक्खस्स हिट्ठा उकूडआसणनिसण्णस्स ॥१९॥
**वइसाहसुद्धदसमी**दिवसे छट्ठतवं कुणंतस्स ।
**वीर**जिणस्सऽभग्गो उप्पण्णं केवलं नाणं ॥२०॥
देवो देवेहिं कए सालत्तयसोहिए समोसरणे ।
तित्थयणामं काउं कहेइ धम्मं सयं नाहो ॥२१॥
चउतीसअइसयजुओ अट्ठमहापाडिहेरकयसोहो ।
भव्वाण बोहणत्थं विहरइ भूमंडले तत्तो ॥२२॥

D:\chandan/new/kalp-1/pm5\3rd proof

[1]इक्कारसओ गणहरा समणो चउद्दससहस्स समणीओ ।
छत्तीसं च सहस्सा सड्ढा गुणसट्ठीसहस्सइगलक्खं ॥२३॥
तियलक्खअट्ठारसहस्सा सड्ढीओ जिणवरस्स **वीर**स्स ।
अह संत्तो सामी **मज्झिमपावा**ए नयरीए ॥२४॥
तत्थं[2]ऽतिमचउमासं नाउं निव्वाणगमणसमयं च ।
धम्मं कहेइ सययं सोलसपहरे सयं नाहो ॥२५॥
अह **पुण्णपाल**राया नमिऊण जिणं च विण्णवइ एवं ।
सामी सुमिणा दिट्ठा अट्ठमए अज्ज निसिसेसे ॥२६॥
[3]गय १ कवि २ खीरद्दुम ३ काग ४ सींह ५ कमलाणि ६ बीअं ७ ।
कुंभो य तोएआणं ८ साहसु फलं जओ ताह भीओ मि ॥२७॥
अह भणइ जिणो नरवर ! आओ वरं गयसमा वि होऊणं ।
अप्पसुहेसु गिहेसु लुद्धा होऊंति सड्ढजणा ॥२८॥
न गिहस्संति पव्वज्जं दलिद्ददुब्भिक्खदुक्खतत्ता वि ।
पालिस्संति कहिं चिय विमला पुण संजमं विउलं ॥२९॥
मुणिमो वि कविसमाणा चंचलपरिणामहीणगुत्ता य ।
गच्छरहिया वि पायं पमायबहुला भविस्संति ॥३०॥
धम्मट्ठिआण इयराण तो ते काहिंति मइविवज्जासं ।
दाहिंति जे असिक्खं ताणं वि हु ते हसिस्संति ॥३१॥

---

१. [इंदभूति १, अग्निभूति २, वायुभूति ३, व्यक्त ४, सुधर्म ५, मंडित ६, मौर्यपुत्र ७, अकंपित ८, अचलभ्राता ९, मेतार्य १०, प्रभास ११, गणधर हुए]

२. [अस्थिग्राम-१, चंपानगरी-३, वाणिज्यग्रामविशालानगरी-१२, राजगृहीनगरीना नालंदानामे मोहलाने विषे-१४, मिथिलागामे-६, भद्रिकानगरीमे-२, आलंभकानगरी-१ अनार्यक्षेत्र-१, सावत्थीनयरी-१, अपापानगरीमे-१, सर्व ४२ चोमास हुए-६]

३. [जीर्णमकानमे हस्ती (१) वानरने चपलाई करता देख्या (२) क्षीरवृक्ष कांटा से वीट्यो देख्यो (३) काक सरोवर जल छोडके स्तोक जलमें क्रीडा करता देख्या (४) मृतक सिंह के कलेवरकुं अन्य जीव पराभव न करे (५) कमल कजोडा में उगा देख्या (६) उखरक्षेत्रमें बीज वाया सो उगा देख्या (७) कंचन कलश मलीन देख्या (८) ए आठ स्वप्ना दीठा]

D:\chandan/new/kalp-1/pm5\3rd proof

खीरदुमसमा सड्ढा सत्तसु खित्तेसु चत्तववणाओ ।
बबूलेहिं व चूआ वेड्ढिस्संति अकुलिंगिहिं ॥३२॥
धम्मत्थिणो वि मुणिणो वासं गच्छंमि नो करिस्संति ।
कुस्संगेहिं विनट्ठा जह कामा पुष्करिणिनीरे ॥३३॥
जुत्ताजुत्तवियारं मूढा चित्ते वि नो करिस्संति ।
छड्डिय कुलाभिमाणा पए पए परिभविस्संति ॥३४॥
सिंहसमं जिणधम्मं मयं व नाऊण कालदोसेण ।
कुतित्थियतिरिया पुण कयावि नो अभिभविस्संति ॥३५॥
किं पुण मज्झुप्पण्णा किमितुल्ला लिंगिणो करिस्संति ।
असारं जिणधम्मं फलमेयं सीअसुमिणस्स ॥३६॥
कमलायरे सुगंधो जह कमलाणं वियंभए नेय ।
तह सुकुले उप्पण्णा धम्मपरा नो भविस्संति ॥३७॥
हीणकुलुप्पण्णाणं धम्मपराणं विसुद्धबुद्धीणं ।
गद्दहकमलाणं पिव मूढा हीलं करिस्संति ॥३८॥
जह मूढमणा पुरिसा बीयं वावंति ऊसरे खित्ते ।
वाविस्संति कुपत्ते तह धणबीयं तियं सड्ढा ॥३९॥
सुचरित्तनीरभरिया निम्मलगुणकमलमालकयसोहा ।
पुण्णकलस व थोवा इत्तो मुणिणो भविस्संति ॥४०॥
जे मंतरु(तं)तओसहपडिबद्धा लिंगजीविणो जे य ।
भुंभलघडु व्व बहुआ घरे घरे ते भविस्संति ॥४१॥
वड्ढिस्संति सुविहिया सरिसा होऊण लिंगिणो मज्झे ।
नियचारित्तकए जह अगहिल्लगहिल्लओ राया[१] ॥४२॥

---

१. तथाहि **पृथिवीपुर्य्यां पूर्णो** नाम महीपतिः ।
**सुबुद्धि**स्तस्य चामात्यो निधानं बुद्धिसम्पदः ॥१॥
कालं तेनागमिष्यन्तं पृष्टोऽन्येद्युः सुबुद्धिना ।
**लोकदेव** इति ख्यातो नैमित्तिकवरोऽवदत् ॥२॥
मासादनन्तरं मेघा वर्षिता तज्जलं जनः ।
यः पास्यति स सर्वोऽपि ग्रहग्रस्तो भविष्यति ॥३॥

D:\chandan/new/kalp-1/pm5\3rd proof

इअ सुणिउणं राया सुमिणफलं पत्तपरमसंवेगो ।
गहिऊणं सामन्नं सासयसुक्खं गओ मुक्खं ॥४३॥

---

कियत्यपि गते काले सुवृष्टिर्भाविनी पुनः ।
सद्यः सज्जीभविष्यन्ति तत्पयःपानतो जनाः ॥४॥
राज्ञो मन्त्री तदाचख्यौ भेरीताडनपूर्वकम् ।
जनानां भूपतिर्वारि-संग्रहार्थमथादिशत् ॥५॥
जनः सर्वस्तथा चक्रे ववर्षोक्तदिनेऽम्बुदः ।
कियत्यपि गते काले संगृहीताम्बु निष्ठितम् ॥६॥
अक्षीणसंगृहीताम्बु-राजामात्यौ विना परे ।
सामन्ताद्याः पपुर्नव्यं वारि वैकल्यकारकम् ॥७॥
तत् पीत्वा ग्रथिलाः सर्वे ननृतुर्जहसुर्जगुः ।
स्वैरं विचेष्टिरे मुग्धा विना तौ राजमन्त्रिणौ ॥८॥
राजामात्यौ विसदृशौ सामन्ताद्या निरीक्ष्य ते ।
मन्त्रयाञ्चक्रिरे नूनं ग्रथिलौ राजमन्त्रिणौ ॥९॥
अस्मद्विलक्षणाऽऽचारा-विमकावपसार्य तत् ।
अपरौ स्थापयिष्यामः स्वोचितौ राजमन्त्रिणौ ॥१०॥
मन्त्री ज्ञात्वेति तन्मन्त्रं नृपायाख्यज्जगाद सः ।
आत्मरक्षा कथं कार्या तेभ्यो वृन्दं हि राजवत् ॥११॥
मन्त्र्यूचे ग्रथिलीभूय स्थातव्यं ग्रहिलैः सह ।
प्राणोपायो न कोऽप्यन्य इदं हि समयोचितम् ॥१२॥
कृत्रिमं ग्रहिलीभूय ततस्तौ राजमन्त्रिणौ ।
तेषां मध्ये ववृताते रक्षन्तौ निजसम्पदौ ॥१३॥
ततः सुसमये जाते शुभवृष्टौ नवोदके ।
पीते सर्वेऽभवन् स्वस्था मूलप्रकृतिधारिणः ॥१४॥
एवं च दुष्षमाकाले गीतार्था लिङ्गिभिः सह ।
सदृशीभूय वर्त्स्यन्ति भाविसुसमयेच्छवः ॥१५॥
एवं स्वप्नफलं श्रुत्वा गृहवासे विरागवान् ।
स्वाम्यन्ते व्रतमादाय **पुण्यपालो** गतो दिवम् ॥१६॥

''अथ **तंदुलवेयालिय**पयन्नो''-

श्री**भद्रबाहु**स्वामिना **चन्द्रगुप्त**नृपाग्रे षोडशस्वप्नविचारः कथितः स चायं– ''तेणं कालेणं तेणं समयेणं पाडलिपुरे नामं नयरे होत्था । जहा णं चंपा तहा भाणियव्वा तत्थ णं पाडलिपुरे नयरे पाडलनामं वणसंडे होत्था । तत्थ णं पाडलिपुरे चंदगुत्ते नामं राया होत्था । महया हिमवंतवण्णओ तस्स णं चंदगुत्तस्स पियदंसणा नामं भारिया होत्था । वण्णओ तेणं कालेणं तेणं समयेणं चंदगुत्ते नामं राया समणोवासए अभिगयजीवाजीवे जाव अट्ठमिं जाव वयणरागरत्ते । अह अण्णया कयाइ परिकयं पोसहं सम्मं पडिजागरमाणस्स सुहपत्तसुओ ओहीरमाणे ओहीरमाणे सोलस सुविणा दिट्ठा । पसित्ता चिंता समुप्पन्ना अहक्कमेण दिवायरे उदिए पोसहं पारइ । तेणं कालेणं तेणं समयेणं संभूइविजयसीसे भद्दबाहुनामं गणहरे जुगप्पहाणे गामाणुगामं दूइज्जमाणे पंचसमणसयपरिवरिया पाडलिपुरे पाडलिवडंसे समो-सरिए । राया निग्गओ जहा कोणिए पंचविहेणं अभिगमेणं वंदणेणं....। धम्मो कहिओ । सोलस-सुमिणाणं अत्थं पुच्छइ । भयवं अज्ज रयणीए मम धम्मचिंताए वट्टमाणस्स पच्छिमसमए सोलस सुमिणा दिट्ठा । तत्थ पढमे सुमिणे कप्परुक्खस्स साहा भग्गा १ बीए काले सूरो अत्थमिओ २ तइए चंदो सयछिद्दभूओ ३ चउत्थे भूया नच्चंति ४ पंचमे दुवालसफणो कण्हसप्पो दिट्ठो ५ छट्ठे आगयं विमाणं पडिनियट्टियं ६ सत्तमे असुइठाणे कमलं संजायं ७ अट्ठमे खज्जोओ उज्जोअं करेइ ८ नवमे महासरोवरं सुक्कं दखिणदिसाओ थोवजलं लंभति ९ दशमे सुणहे सुवण्णपत्ते पायसं भक्खे १० इग्गारसमे हत्थिआरूढो वानरो दिट्ठो ११ दुवालसमे सायरं मज्जायं मुंचइ १२ तेरसमे महारहे वच्छा जुत्ता दिट्ठा १३ चउद्दसमे महग्घरयणं तेअहीणं दिट्ठं १४ पण्णरसमे रायकुमारो वसहारूढो दिट्ठो १५ सोलसमे गयकलहजुयला जुज्झंता दिट्ठा १६ एएण सुमिणाणुसारेण सासणे किं किं भविस्सइ चंदगुत्तस्स रायस्स वयणं सुच्चा भद्दबाहुगणहरो जुगप्पहाणो भवोदहितारगो चंदगुत्तस्स संघसमक्खं भणणइ- चंदगुत्ता सुमिणाणुसारेण अत्थं कहेमि । तम्-पढमं कप्परुक्खस्स साहा भग्गा तस्स फलं अज्जप्पभिइ को वि राया संजमं न गिण्हिस्सइ १ बीए सूरत्थमणं अकाले तेण केवलणाणं वोच्छिज्जस्सइ २ तइए चंदो सयछिद्दभूओ तेणं एगे धम्मे अणेगं मग्गे भविस्सइ ३ चउत्थे भूआ णच्चंता दिट्ठा तस्स फलं कुमइजणा भूया इव णच्चिस्संति

४ पंचमे दुवालसफणो सप्पो दिट्ठो तेण दुवालसवरिसाइं दुब्भिक्खे भविस्सइ तेण कालियसुयप्पमुहाइं सुआइं वोच्छिज्जंति चेइअदव्वहारिणो तत्थ जे साधुधम्मकंखिणो ते सव्वे दाहिणं दिसं वलभीए गमिस्संति तेण वणीअग्ग( मगा ) अणेगा य ५ छट्ठे सुमिणे विमाणं चलिअं दिट्ठं तस्स फलं चारणा भरहेरवए न आगमिस्संति ६ सत्तमे सुविणे कमलं उक्करिडिआए उग्गयं दिट्ठं तेण धम्मो चत्तारि वण्णाणं मज्झे वेसवंसमज्झे भविस्सइ तेण वणीअ( म )गा अणेगे गाहिस्संति सुत्तरुई अप्पजणाणं भविस्सइ ७ अट्ठमए खज्जुओ उज्जोअं करेइ तेण जिणधम्मे उदयपूआसक्कारो न भविस्सई । बहुजणा मिच्छत्तरागिणो भविस्संति ८ नवमे सुक्कं सरोवरं दिट्ठं तेण जत्थ जत्थ पंच जिणकल्लाणा तत्थ तत्थ देसे धम्महाणी भविस्संति, दाहिणदिसाओ जुगप्पहाणा जिणमग्गं पणविस्संति ९ दसमे सुमिणे सुणहो सुवण्णपत्ते पायसं भक्खेइ, तस्स फलं उत्तम लच्छी मज्झिमघरे गमिस्सइ १० एगारसमे सुमिणे गयआरूढो वानरो दिट्ठो तेण सुहिया रिद्धिसमणा दुज्जण दुहिआ अवमाणपइट्ठिआ, इक्खागवरं पमुहाण कुलजाण हाणी भविस्सइ ११ बारसमे सुमिणे सायरो मज्जायं मुंचइ, तेण रायाणो अमग्गचारिणो खत्तिआ अण्णायं करिस्संति १२ तेरसमे सुमिणे महारहे वच्छा जुत्ता दिट्ठा, वुड्ढवए चारित्तं न गिण्हिस्संति, जे वेरग्गभावेण चारित्तं गिण्हिस्संति ते पमाइणो भविस्संति, १३ चउद्दसमे सुमिणे महग्घरयणं ते अहीणं दिट्ठं तेणं भरहेरवए कलहकरा डमरकरा असमाहिकरा अविन( ण )यकरा साहवो भविस्संति, थोवा समणा भविस्संति १४ पन्नरसमे सुमिणे रायकुमारो वसहआरूढो दिट्ठो तेण खत्तिआ मिच्छत्तवासिणो भविस्संति १५ सोलसमे सुमिणे गयकलहजुअला जुज्झं कुव्वंता दिट्ठा तेण अप्पणेहा अकालवसणा सीसा मुणिवरा अहोनिस जुज्झकरा भविस्संति, गुरुअम्मापिअसुस्सूसकरा न भविस्संति १६ एवं सुच्चा चंदगुत्तो राया अणसणं गिण्हित्ता । धम्मज्झाणेण दिवं गच्छति'' ॥ इति षोडशस्वप्नविचारकथितः ॥

अह सिरि**वीरं** नमिउं पुच्छइ सिरि**गोयमो** य गणहरी ।
किं किं होही भयवं अओ परं **भारहे** वासे ॥४४॥

अह भणइ जिणो **गोयम** ! मह निव्वाणाउ बारवरिसेहिं ।
होही तुह निव्वाणं **सुहम्म**स्स य वीसवरिसेहिं ॥४५॥

चउसट्ठी य वरिसेहिं होही मुक्खं च **जंबुसामि**स्स ।
तुट्टिस्संति तहिं चिय दसट्ठाणा **भारहे** वासे ॥४६॥
[१]खव[२]गुवसमसेढीओ [३]पुलाय[४]आहारलद्धि [५]जिणकप्पो ।
प[६]रमोही [७]मण-[८]केवलणाणं [९]सिवमग्गं [१०]चरण-तिगं ॥४७॥

**जंबू**सीसो **पभवो** होही **सिज्जंभवो** य तस्सीसो ।
सो काही **दसवेयालिय**गंथं अडनवइवरिसेहिं ॥४८॥

होही सिरि**जसभद्दो** सिरि**संभूओ** अ **भद्दबाहु** अ ।
सत्तरिसएहिंतो चिय तुट्टिस्सइ पुव्वचउअत्थो ॥४९॥

तुट्टिस्सइ **थूलिभद्दे** दोसयपनरेहिं (२१५) पुव्वअणुओगो ।
सुहुममहापाणाणि अ अंतिमपुव्वाइं चत्तारि ॥५०॥

**महागिरि-सुहत्थि**सूरी दसपुव्वधरा य ताण वयणेण ।
कारिस्सइ जिणधम्मं **संपइ**राया उ **भरहद्धे** ॥५१॥

अह मह निव्वाणा दोपविसिस्सइ (६१६) **पूसमित्ति( त्त )**नामेणं ।[१]
**गोयम** ! पंचमअरओ तिवरिससड्ढट्ठमासेहिं ॥५२॥

सुण्णमुणिवेअकाले होही सिरि**वुड्ढवाइ**सूरिवरो ।
तस्सीसो गुणनिलओ दिवायरो **सिद्धसेणु** त्ति ॥५३॥

तस्सुवएसेण तओ [२]**विक्कम**राया सुवण्णदाणेणं ।
काऊणं रिणहीणं वसुहं संवच्छरं काही ॥५४॥

पणचुलसीए (५८४) होही दसपुव्वधरो य **वयर**सामि त्ति ।
तस्सीसो सिरि**वैरो** तत्तो साहाउ चत्तारि ॥५५॥

**नागिंदचंदनिव्वुइविज्जाहरिया** पुरम्मि **सोपारे** ।
छम्माससएनवेहि य (६०९) होही [३]**खमणा**णउप्पत्ती ॥५६॥

---

१. [६२० वर्ष जायगा जब साधु पोसाल थापे] । २. [गौतम मम निर्वाणात् ४७० वर्षे **उज्जयिनी**में **विक्रम** होंगे] । ३. दिगंबर ।

D:\chandan/new/kalp-1/pm5\3rd proof

थक्किस्संति छ सोला (६१६) सिरि**दुब्बलिए** असड्ढनवपुव्वा ।
छेइस्सइ **गद्दहिल्लं कालिअ**सूरी पाणंतिवणे (?) ॥५७॥
तेणउअनवसएहिं **सीमंधरसामि**वण्णिअगुणोहो ।
पज्जौसवण चउत्थी **कालिय**सूरी तओ ठविही ॥५८॥
तेणउअनवसएहिं (९९३) सुत्तं पुत्थेसु तह लिहिस्संति ।
वुच्छिजिस्सइ सुत्तं वाससहस्सेहिं पुव्वगयं ॥५९॥
दससयपणपन्नेहिं (१०५५) होही **हरिभद्द**सूरिगुणजलही ।
सत्तरियबारसए (१२७०) जुगपवरो **बप्पभट्ट**मुणी ॥६०॥
तस्सुवएसेण तओ सड्ढतिकोडीसुवण्णनिप्फन्नं ।
कारविही महबिंबं **आम**निवो **गोवगिरि**सिहरे ॥६१॥
तेरससएहिं (१३००) **गोयम** ! होहंति अणेगहा मइविभेया ।
बंधंति जेहिं जिया बहुअकंखाइमोहणीयं ॥६२॥
सोलससएहिं गुणहत्तरिवरिसेहिं (१६६९) **हेमसूरि**वयणाओ ।
कारविही **कुमर**निवो जिणभवणविभूसियं च सुहं ॥६३॥
चउदसहियगुणवीससएहिं (१९१४) वरिसाण **पाडलिपुरम्मि** ।
चित्तस्स कसिणअट्ठमि विट्ठिदिणे धम्मपडिकुलो ॥६४॥




[१]होही चंडालकुले **कक्की रुद्दो चउम्मुह** ति नामो ।
दुभिक्खरायतक्करभयं भविस्सइ तया निच्चं ॥६५॥

---

१. यशोगृहे **यशोदायाः** कुक्षौ स्थित्वा त्रयोदशान् ।
मासान् मधोः सिताष्टम्यां जयश्रीवासरे निशि ॥१॥
षष्ठे मकरलग्नांशे वहमाने महीसुते ।
वारे कर्कस्थिते चन्द्रे चन्द्रयोगे शुभावहे ॥२॥

D:\chandan/new/kalp-1/pm5\3rd proof

अट्ठारसवरिसाइं कुमारवासे सो परिशमि(वसि)ही ताइं ।
दिसि विजए वि अ तत्तो य भविस्सइ राया ॥६६॥
अह तत्थ पुरे **नंद**स्स थूभाइ सो अ दट्ठूणं ।
मज्जट्ठसुवण्णाइं खणिस्सइ लोहगहगहिलो ॥६७॥
नामेण **लवणदेवी** निसरिस्सइ सो जमकगावी ।
सा दट्ठूण य साहू धाविस्सइ तिक्खसिंगेहिं ॥६८॥
तेण य जलोवसग्गं भविस्सयं मुणिवरा सुणिस्संति ।
विहरिस्संति तओ ते साहू विहारेण अन्नत्थ ॥६९॥
तत्तो य निरंतरिया होही जलवुट्ठी सत्तऽहोरत्ते ।
पलविस्सइ तस्स पुरं महया **गंग**प्पवाहेणं ॥७०॥
विरहे जलोवसग्गे थूभसुवण्णेण पुण नवं काही ।
**पाडलिपुत्तं** नयरं **कक्की**राया पहाणतरं ॥७१॥

---

प्रथमे पादेऽश्लेषायाः **कल्कि**जन्म भविष्यति ।
त्रिहस्तोच्चः स कपिल-शीर्षकुन्तललोचनः ॥३॥ त्रिभिर्विशेषकम् ॥
तीक्ष्णस्वरोऽदृष्टपृष्ठ-लाञ्छनश्छद्मतत्परः ।
महाविद्योद्धुरो दीर्घ-हृदयो गुणवर्जितः ॥४॥
जन्मतः पञ्चमे वर्षे जठरापद्भविष्यति ।
सप्तमेऽग्न्यापदस्यैक-दशे द्रव्यस्य सम्भवः ॥५॥
तस्यैवाष्टादशे वर्षे कार्तिके मासि निर्मले ।
पक्षे च प्रतिपद् घस्रे शनौ चन्द्रे तुलास्थिते ॥६॥
स्वातौ नन्दिदिने सिद्ध-वेलायां करणे बवे ।
मुहूर्त्ते रावणे राज्या-भिषेको हि भविष्यति ॥७॥ युग्मम् ॥
अदन्तस्तुरगस्तस्य कुन्तो दूर्वासकस्तथा ।
मृगाङ्कनाम किरीटं खड्गश्च दैत्यसूदनः ॥८॥
तस्यांह्रिकटके चन्द्र-सूर्यौ त्रैलोक्यसुन्दरौ ।
चारुसौधं तथा भावि-द्रव्यसंख्या न भाविनी ॥९॥
संवत्सरं **विक्रम**स्यो-त्थाप्य स्वर्णप्रदानतः ।
संवत्सरं स्वकीयं स स्थापयिष्यति भूतले ॥१०॥

हहो साहुविहारो **धम्मपुरो** पुरजणो तओ ।
तत्थ रज्जं **कक्की** काही सुहेण पन्नासवरिसाइं ॥७२॥
आसन्नमरणकाले पासंडाणं तओ अलिंगाइ ।
मेल्लाविस्सइ पुट्ठो मग्गिस्सइ तेसि रायकरं ॥७३॥
गोवाडे खेविऊणं साहू मग्गेइ भिक्खछब्भागं ।
ते विकहिस्संति तओ अम्हे नरनाह ! निग्गंथा ॥७४॥
तह वि न सो मुच्चिस्सइ मुणिणो वाडाउ दुट्ठपरिणामो ।
तत्तो काउस्सग्गस्स संघो काहीअ थिरचित्तो ॥७५॥
संघस्स काउस्सग्गाऽणुभावं च जियासणो य देविंदो ।
बंभणरुवेण तओ एहि साहूण रक्खट्ठा ॥७६॥
सो दाही उवएसं मुणिणो वाडाओ मुंच नरनाहं ।
दिंति न कस्स वि कहमवि नियभिक्खं संजया एए ॥७७॥
इयवयणेणं कुविओ **कक्की** जंपिस्सई नियपुरिसे ।
झत्ति गिहिऊण कंठे निस्सारह भो इमं विप्पं ॥७८॥
इय सुणिऊण कोविओ सक्को दाही चवेडसंघायं ।
तेणं विहुरिय गत्तो भविस्सइ भासरासी सो ॥७९॥
छासी वरिसाउं सो संपूरिय रुद्दझाणगयचत्तो ।
पावं काऊण तओ गमिस्सइ सो य निरयंमि ॥८०॥
अभिसिंचिऊण **दत्तं** पुत्तं तस्सेव वासवो रज्जे ।
अणुसिट्ठिं दाऊणं घुअसगो(?) वच्चही सग्गो ॥८१॥
पिउणो पावफलं सो समरंतो वासवस्स सिक्खं ।
पइदिणकयजिणमंदिर-विभूसियं भूतलं काही ॥८२॥
तत्तो जाईसरणं उदीण्णाणं कला य विण्णाणं ।
आरोगं सुभिक्खं सच्चं सोयं दया दाणं ॥८३॥
रायाणो जिणभत्ता नयमग्गपरा य सच्चसंधा य ।
धणधण्णकणयमुत्ति य रयणसमिद्धो जणो होही ॥८४॥

जा **दुप्पसहो** सूरी होहंति जुगप्पहाणआयरिया ।
**अज्जसुहम्म**प्पभिईओ चउअहिया दुण्णि य सहस्सा (२००४) ॥८५॥
इह **सुहम्म-जंबू** सिद्धा **पभवा**इ एगभवतारिणो सेसा ।
सड्ढदुजोअणसेसा [1]डमरदुब्भिक्खरोगहरा ॥८६॥
जुगप्पहाणसमाणा एगारसलक्खा सोलससहस्सा ।
सूरिओ हुंति अरए पंचमए जाव **दुप्पसहो** ॥८७॥
होहंतिओ पणपन्नलक्खा पणपन्नसहस्सकोडीओ ।
पंचसयकोडिपण्णा **गोयम** ! सुचरणसयलसूरी ॥८८॥
पंचावण्णाकोडी पंचावण्णाइ सयसहस्साइं ।
पंचावण्णसहस्सा पंचसया पंच अहिअयरा ॥८९॥ एते जघन्यगुणधारिणः सूरयः ॥
तह सित्तरकोडीलक्खा नवकोडिसहस्सकोडीसयमेगं ।
इगवीसकोडिइगलक्खसड्ढिसहस्स सुसाहुणं ॥९०॥
समणीण कोडिसहस्स दस नवकोडिसयबारकोडीओ ।
छप्पनलक्खछत्तीससहस्सएगूणदुन्निसया ॥९१॥
जिणमयभत्तिनिवाओ एगारसलक्खसोलससहस्सा ।
होहंति अहियबारसइगवीससएहिं जा विमलो ॥९२॥
तह सोलकोडिलक्खा तिअकोडिसहस्स तिण्णिकोडिसया ।
सत्तरसकोडिचुलसीलक्खा सुसावयाणं तु ॥९३॥
पणवीसकोडिलक्खा सुसाविया कोडिसहस्स बाणवइ ।
पणकोडिसया बत्तीसकोडि तह बारसऽब्भहिआ ॥९४॥
तो सग्गा चुओ सूरी [2]**दुप्पसहो** साहुणी य **फग्गुसिरी** ।
**नाइल**सड्ढो सड्ढी **सच्चसिरी** अंतिमो संघो ॥९५॥

भणियं च-

**''एगो साहू एगा य साहूणी सावओ वि सड्ढी वा ।**
**आणाजुत्तो संघो सेसो पुण अट्ठिसंघाओ''** ॥९६॥

---

१. परचक्र । २. २८ वर्षायुः-१२ गृह० । १६ वर्षे आचार्यपद-एवं २८ ।

D:\chandan/new/kalp-1/pm5\3rd proof

**दसवेआलिअ-जिअकप्प-आवस्सणुओगदारनंदि**धरो ।
सययं इंदाईनओ छट्ठग्गतवो दुहत्थतणू ॥९७॥

गिहिवयगुरुत्त बारस चउरवरिसो कयट्ठमो अंते ।
**सोहम्मि** सागराऊ होही तओ सिज्झही **भरहे** ॥९८॥

सूअसूरिसंघधम्मो पुव्वह्ने छिज्जइ अगणि सायं ।
निव**विमलवाहणो सुमुह**मंतिनयधम्म मज्झण्हे ॥९९॥

वासाणवीससहस्सा नवसयतिम्मासपंचदिणपहरा ।
एका घडी अ दोपल अक्खरइगयाल(४१) जिणधम्मो ॥१००॥

इत्थ दूसमकालो होही इगवीससहसवरिसेहिं ।
दूसमकालो एअप्पमाणो वि णायव्वो ॥१०१॥

तह खारग्गिविसंबिल-विज्जुअणा सगदिणा पि हु कुवाया ।
वरिसिय बहुरोगजलं काहिंति समं सरजलाई ॥१०२॥

इंगारछारमुम्मुर हाहाभूआतणाइरइअमही ।
होहंति बीअनिमित्तं वेअअट्ठारसुखगइ वि ॥१०३॥

छट्ठ अरे दुकरुच्चा वीसवरिसाऊ मच्छआहार(रा) ।
बिलवासी कुगइगमा कुवण्णवाया नरा कूरा ॥१०४॥

निल्लज्ज निव्वसणा खरवयणा पिअसुआइठिइरहिया ।
छवरिसगब्भा इत्थी सुदुक्खपसवा बहुसुहा य ॥१०५॥

बहुमच्छचक्कवह**गंगसिंधु**पासेसु नव नव बिलाइं ।
**वेयड्ढो**भयपासे बिसयरि बहुरोगनरठाणा ॥१०६॥

अह अवसप्पिणितुल्ला छअरा ओसप्पिणीए विवरीया ।
तहिं इगहत्थया मणुआ सोलस वरिसाउआ पढमे ॥१०७॥

पुण खीरघयामयरसमेहा वरिसंति पढमअरयंते ।
भूसीयलनेहोसहीरसहेऊ पिहुअसत्तदिणे ॥१०८॥

होहंति बीअरह जाइसरणो [१]**विमलवाहण** [२]**सुदामो** ।
[३]**संगम**[४]**सुपास**[५]**दत्ते** *[६]**सुधम्मो** [७]**सुमई** कुलगर त्ति ॥१०९॥

तं दट्ठुं नरतिरिया नीहरिस्संति मुत्तुं बिलवासं ।
वड्ढिस्सइ तेसिं तओ आउं सोहग्गमारुग्गं ॥११०॥

घरपुरनयरनिवेसं गयतुरयाईणसंगहं सव्वं ।
लोए ववहारनीइं काही पढमो कुलगरो य ॥१११॥

तईआईसु जिणचक्की बलदेवा वासुदेवपडिहारिणो ।
होहंति चउत्थाइसु अरेसु जुअलो य जा नट्ठो ॥११२॥

**सयदार**पुरे **सुमई**राया **भद्दा**पियाए कुक्खिम्मि ।
**सेणिय**जीवो होही पढमजिणो **पउमनाहो** १ य ॥११३॥

तत्तो य **सूरदेवो** २ **सुपास** ३ **सयंपभ** ४ **सव्वभूई**ए ५ ।
**देवसुअ** ६ **उदय** ७ **पेढाल** ८ **पोट्टिल** ९ **सयकित्ति** १० **सुव्वया** ११ ॥११४॥

**अममो** १२ **निक्कसाय** १३ **निप्पुलाया** १४,
**निम्मम** १५ **चित्तगुत्त** १६ **समाहि** १७ **संवरया** १८ ।
**जसोहर** १९ **विजओ** २० **मल्ल** २१ **देवो** २२,
**अणंतविरिअ** २३ **भद्दकरो** २४ य ॥११५॥

चक्किओ **दीहदंतो** १ अ **गूढदंतो** अ २ **सुद्धदंतो** य ३ ।
**सिरिदंतो** ४ **सिरिभूई** ५ **सोमो** ६ **पउमो** य ७ **महापउमो** ८ ॥११६॥

**कुसुमो** य ९ **विमलराया** १० भविस्सइ **विमलवाहण** ११ ।
**अरिट्ठो** १२ छखंड **भरह**राया चउद्दसरयणाहिवा एए ॥११७॥

**बल** १ **वेजयंत** २ **अजिया** ३ **धम्मो** ४ **सुप्पह** ५ **सुदंसणा** ६ **नंदा** ७ ।
**नंदण** ८ **पउमो** ९ य तहा बलदेवा भाविणो एए ॥११८॥

**नंदी** १ य **नंदिमित्तो** २ **सुंदरबाहु** ३ **सुबाहु** ४ **अइबलओ** ५ य ।
**महबल** ६ **बलो** ७ **दुविट्ठ** ८ **तिविट्ठ** ९ य भावि नव विण्हुणो ॥११९॥

---

* प्रत्यन्तरे सुमुहो षष्ठः, समुचि सप्तमः कुलगरोऽस्ति ।

D:\chandan/new/kalp-1/pm5\3rd proof

भाविपडिविण्हुणो **तिलय** १ **लोहजंघो** य २ **वयरजंघो** ३ ।
**केसरि** ४ **बलि** ५ **पह्लाओ** ६ **अपराइय** ७ **भीम** ८ **सुग्गीवा** ९ ॥१२०॥

एवं कहिऊण जिणेसरो समोसरणे ।
संपत्तो **पावा**ए नरवइणो **हत्थिपाल**स्स ॥१२१॥

तत्तो **कत्तिअमावसि**निसि नाऊणं जिणेसनिव्वाणं ।
संसारदुक्खकारणमोहमहापासछेअत्थं ॥१२२॥

पेसइ समीवगामे **गोयम**सामिं च **देवसम्म**स्स ।
धम्मपडिबोअणत्थं लाहं नाऊण तस्स तहिं ॥१२३॥

अह पच्छिमंमि जामे भुवणगुरू पुण्णफलविवागाइं ।
पणपण्णसयाइं पावस्स वि तत्तिआइं पुणो ॥१२४॥

तह छत्तीसं अपुट्ठवागरणाइं च सामि(मी) कहिऊणं ।
अज्झयणं च **पहाणं** भावेमाणे सूरिंदेणं ॥१२५॥

नमिऊण विण्णत्तो एवं जह तुम्ह जम्मनक्खत्ते ।
संकंतो भसमगहो उट्ठो दोवाससहस्सठिई ॥१२६॥

सो संताणे पीडं काहीत्ता तुम्ह होइ जइ एकं ।
अहिययरं च दुन्नि घडी तो पीडा तस्स न हु हुज्जा ॥१२७॥

अह भणइ जिणो एयं न भवइ न भविस्सइ ।
तो भूयं जं आउं संधाणं सक्कइ केणावि काउं जे ॥१२८॥

जाणंतो तं एअं तित्थमोहाओ कहसि देविंद ।
तित्थस्स पुणो पीडा भविस्सइ कालदोसेणं ॥१२९॥

तह पणअक्खरउच्चरणकालमाणेण ।
तुरियज्झाणेण बंधविरहेण तत्तो सामी एरंडबीयं च ॥१३०॥

उड्ढगई इक्केण समएणं अट्ठकम्मनिम्मुक्को ।
सिद्धो णंतचउक्को मुक्खं पत्तो जिणो **वीरो** ॥१३१॥

D:\chandan/new/kalp-1/pm5\3rd proof

मुक्खं गए जिणं(णिं)दे नाणपईवे तओ नरिंदेहिं ।
निव्वाणउज्जोअकए देवेहिं दीविया विहिया ॥१३२॥
लोए वि तओ विक्खायं जायं देवुच्छवं महापव्वं ।
निसि तम्मि सव्वओ वि य घरे घरे दीवकरणं तु ॥१३३॥
चउविहसुरो वि **मेरुं** गओ वयणं समंतओ भणियं ।
उज्जोविया य रयणी दीवेहिं रयणदीवेहिं ॥१३४॥
तत्तो पहुनिवाणं सोऊणं तुडियमोहपासस्स ।
सिरि**गोयम**स्स जायं केवलणाणं जगप्पहाणं ॥१३५॥
तंमि समयंमि तस्स वि केवल-महिमं ।
करि तुट्ठमणा सट्ठाणे सट्ठाणे संपत्ता सुरवरा सव्वे ॥१३६॥
इय **दीवालीकप्पो** लिहिओ रुद्दाओ सुयसमुद्दाओ ।
गुरु-गुरुपारंपरओ सोहेयव्वो सुअधरेहिं ॥१३७॥

**इति श्रीदीपोत्सवः कल्पः समाप्तः ॥**

**सं. १८१३ चै०व०८ ॥**

●●●

D:\chandan/new/kalp-1/pm5\3rd proof

**श्रीलक्ष्मीसूरिविरचितं**

# दीपावलिकापर्वव्याख्यानम् ॥

अथ दीपोत्सवदिनस्वरूपमाह –

विश्वे **दीपालिकापर्व,** विख्यातं केन हेतुना ।
पृष्टं **सम्प्रति**भूपे**नार्यसुहस्ति**गुरुर्जगौ ॥१॥

स्पष्टः । **उज्जयिन्यां सम्प्रति**भूपेन महासङ्घपरिवृता **आर्यसुहस्त्या**चार्या राजपथे व्रजन्तो दृष्टाः । तत्र नृप आगत्य गुरुं नत्वा व्यजिज्ञपत्–''हे पूज्याः ! यूयं मां जानीथ न वा'' ? गुरुः प्राह–''हे **सम्प्रते** ! कस्त्वां न वेत्ति ? जनपदस्वामित्वात्'' । नृपः प्राह–''न हि न हि, स्वामिन् ! अनेनाल्पहेतुना नोपलक्षणं पृच्छामि, अन्यप्रकारेण मामुपलक्षयथ'' ? दशपूर्वधरो गुरुः श्रुतेन तत्पूर्वभवस्वरूपं ज्ञात्वोवाच–''भूप ! त्वं पूर्वभवेऽस्माकं शिष्योऽभूः, एकदिनात्तसंयममहिम्ना त्वमत्र भूधववरोऽभूः'' । गुरूक्तं सत्यं मत्त्वाऽऽह–''युष्मत्प्रभावतो लब्धमिदं राज्यं युष्माभिर्ग्राह्यं, इदं गृहीत्वा विभो ! मामनुग्रहाण, मामनृणं कुरु'' इति पादयोः पतित्वा पुनः पुनर्व्यजिज्ञपत् । तं प्रति गुरुराह–''संयमसाम्राज्यतुल्यं राज्यं नाञ्चति, अतो हे नृप ! त्वया धर्मयोगेन प्राप्तं राज्यं ततो धर्मोद्यमे तत्परो भव'' ।

एवं गुरुणोदिते जातसंशयो नृपः पप्रच्छ–''हे पूज्य ! जैनागमे षडष्टाह्निकादि-पर्वाणि विख्यातानि । परं लोके लोकोत्तरे च कुतो **दीपालिकापर्व** विख्यातम् ? अत्र दिने जनो विविधवस्त्राणि परिधत्ते, पशु-गृह-हट्टश्रेणि-वृक्षादयो विभूष्यन्ते'' ।

''हे नृप ! शृणु-श्री**वीरस्य** दशमस्वर्गतश्च्युत्वा**ऽऽषाढसितषष्ठ्यां** च्यवन-कल्याणकमभूत् , **चैत्रसितत्रयोदश्यां** मध्यरात्रौ जन्मकल्याणकमजनि, तदनु

त्रिंशद्वर्षाणि गृह उषित्वा कृतषष्ठतपा **मार्गशीर्षबहुलदशम्यां** संयमं जग्राह, तदैव मनःपर्यवज्ञानं जातम् । ततो दुस्तपं तपः कुर्वतः श्री**वीर**स्य **वैशाखशुक्लदशम्यां** घातिकर्माभावे सति केवलमुत्पन्नम् । किञ्चिदूनत्रिंशद्वर्षाणि यावत् केवलज्ञान-पर्यायान्वितः श्री**वीरः** स्वायुरल्पं विदन्न**पापापुर्यां हस्तिपाल**नरेशस्य राज्यसंसदि अन्तिमचतुर्मासकमकरोत् ।

तदवसरे स्वामी अनेकेषां भव्यानां संशयान्निवार्य भाविभावस्वरूपमुक्त्वा षोडशप्रहरान् लोकानुकम्पया धर्मदेशनां जगौ । तदा श्री**वीर** आदिमगणभृतं **देवशर्मा**ह्वद्विजप्रबोधार्थं प्राहिणोत्, स्वामिप्रेमबन्धविच्छेदाय च ।

अथ **कार्तिकामावास्यादिने** षष्ठतपाः प्रभुः पर्यङ्कासनमासीनश्च निशापश्चिम-यामार्धे **स्वाति**नक्षत्रे च शक्रेण स्वामीति भाषितः-''हे भगवन् ! यूयं क्षणमेक-मायुर्वृद्धिं कुरु, प्रतीक्षस्व, युष्मज्जन्मदिने संक्रान्तो भस्मग्रहः द्विसहस्रवर्षस्थिति-कोऽधुना स्थास्यति, तेन तीर्थोन्नतिर्न स्यात्, तव दृष्टिप्रभावेण तु तस्य निष्फलोदयो भविता'' इति । प्रभुराह-''हे इन्द्र ! आयुष्कर्मपुद्गलाः पूर्वभवे बद्धास्तेषां न्यूनाधि-कत्वं जिना अपि कर्तुमक्षमाः, अपरं चाभाव्यं न भवेद्भाविनो भावस्य च नाशो न स्यात्'' इति ।

तदा पञ्चपञ्चाशदध्ययनानि शुभफलविपाकानि पञ्चपञ्चाशदध्ययनानि चाशुभ-फलविपाकानि जगत्प्रभुर्निजगाद, षट्त्रिंशदपृष्टव्याकरणानि चोक्तानि गणधरसाधु-श्रावकादिभिरपृष्टेनापि स्वयमेव लोकानुकम्पया प्रोक्तानि । अथ प्रभुः कृतयोग-निरोधः शैलेशीकरणं विधाय सिद्धिसौधमुपागतः । तदा सूक्ष्मानुद्धरकुन्थुषु भूयस्सु समुत्पन्नेषु दुष्पालं संयमं मत्वा साधवोऽनशनं व्यधुः । तदा सर्वसङ्घः साश्रुनेत्र इति व्यलपत् । तथाहि –

**जगद्बन्धुः कृपासिन्धुः, स्वामिन् ख्यातोऽसि किं ततः ।**
**दत्त्वाऽस्मभ्यं महादुःखं, महानन्दं श्रितः स्वयम् ॥१॥**

**हहा महाधमतमा, विश्वतारक ! नारकाः ।**
**प्रमोदं कलयामासुर्ये, ननु त्यजति त्वयि ॥२॥**

**विश्वत्रयाधार कृपानिधे त्वं, विज्ञप्तिमेकां शृणु सङ्घनाथ ! ।**
**सङ्घस्य रागो विविधानुभावो, विघ्नस्य कर्ता किमु नात्र जातः ॥३॥**

**वीरेति वीरेत्यभिधानमुक्त्वा, कस्याभिमुख्यं च विधाय पृच्छाम् ।**
**निःसंशयाः स्याम कथं च मुग्धा-नाश्वास्य मुक्तिं गतवान् स्वयं यत् ॥४॥**

**त्वत्सदृशो नास्त्यधुना जगत्यां, यः सङ्घसारां कुरुते निरीह ! ।**
**भावाक्षिसद्दायक ! जीवनेत-रमोघ ! कस्त्वामभिधास्यते च ॥५॥**

**त्राताऽसि धातः किमुपेक्षसेऽस्मान् , ज्ञात्वापि चित्तस्य गतिं जनानाम् ।**
**मूर्तेन ज्ञानेन भवत्स्वरूपं, तूर्णं ग्रहीष्यामि विभोः कथं हा ॥६॥**

तदा कस्मैचित् कार्याय एकीभूताः **काशी-कौशल**भूभृत**श्चेटक**नृपाज्ञाकारिणश्च नव **मल्लकी**ज्ञातीया नव च **लच्छकी**ज्ञातीया अष्टादश राजानोऽमावास्यादिने सपौषधमुपवासं कृत्वा जिनवाणीं शृण्वन्ति स्म । तदा श्रीजिनस्य निर्वाणकल्याणके जाते समस्तनृपाः पाश्चात्यनिशायां श्री**वीरे** भावोद्योते गते द्विधाऽन्धकारसहनेऽक्षमा द्रव्योद्योताय दीपान् व्यधुः । तथा गच्छद्भिरागच्छद्भिर्देवदेवीभिर्ज्योतिर्मयी निशाऽभूत् । देवगणास्तमोहररत्नानि करे कृत्वाऽऽगच्छन्त ऊचुः-"जिनं प्रति मत्कृतमिदमारात्रिकोत्तारणम्" अनेन हेतुना सर्वत्र "**मेराइय मेराइय**" इतिशब्दः प्रसृतः । लोका अपि दीपावलिं करे धृत्वा "मे आरात्रिकमिदं" इति वदन्तस्तत्राययुः । इत्थं परस्परं सर्वत्र दीपान् व्यधुः उद्योतार्थं । ततः प्रभृति महीतले दीपोत्सवाभिधं पर्व प्रावर्तत दीपश्रेणिकरणात् । अन्यच्च **वीर**शासने निरङ्कुशा मिथ्यात्विदेवा भस्मग्रहश्च दुष्टत्वं कुर्वन्ति, तत्कृतदुष्टफलहननार्थं मेराइयमभूत् **वीर**सङ्घस्यार्तिः-पीडा च दूरीभवत्विति कृत्वा परं रूढ्या पर्व जातम् । अथ प्रभाते द्विजं प्रबोध्य **वीर**वन्दनायागच्छता गणभृता निरुत्साहान्निरानन्दान् देवान् नरान्नारीश्च दृष्ट्वोचे-"यूयं कथं सर्वेऽद्य निरुत्साहाः" ? देवैः प्रोक्तं "श्री**वीर**परमात्मा स्वधाम प्राप्तः, किं कुर्महे" ? । इति श्रुत्वा स्तिमितनेत्रो मनसि दध्यौ-"अहो ! जगच्चक्षुः ! मादृशां भिक्षूणामिक्षुरसादिसमया वाण्याऽधुना कः प्रतिबोधयिष्यति ? ईदृशे समये स्वाश्रितोपजीविनां दूरीकरणं नार्हं, मामन्तराले मुक्त्वा शिवं गतः । किमहं भवद्वस्त्राञ्चलं गृहीत्वा बालचेष्टितमकरिष्यम् ? मोहादिमहायोधेभ्यस्त्वं न भीतः, परं मत्तः शिशुतः कथं भीतः ? मदवगाहनया मोक्षमार्गः मुक्तिस्थलं

च किं संकीर्णमभविष्यत् ? तत्र त्वनन्ताः स्वस्वधर्मयुक्ता अनन्तगुणपर्यायान्विताः परस्परबाधासंघट्टनाद्यभावेन स्थिताः सन्ति स्थास्यन्ति चेत्यादि सिद्धिवर्णनं त्वयैवादिष्टं । सहसाऽत्र वियोगः कथं विहितः ? ।

**वीतराग ! तव दर्शनमुक्तौ[1], भ्रान्तवान्निखिलयोनिनिकाये ।**
**भूरिशोऽहमथ तद्यदि लब्धं, तेन माऽस्तु सहसाऽत्र वियोगः ॥१॥**

**वीतराग ! सफलः स वासरः, स क्षणः स पलः सुलक्षणः ।**
**याम एव स तु सर्वकामदो, यत्र वन्दनमहस्तवाभवत् ॥२॥**

**मां प्रलोभ्य गमनं तव नार्हं, बालकं प्रतिदिनं कृतमिष्टम् ।**
**गोयमेति वचनैः श्रुतिमध्ये, को वदिष्यति तवागमसारम् ॥३॥**

**देहि देहि जिननाथ ! दर्शनं, लङ्घनस्य समयो न शोभते ।**
**मुञ्च मुञ्च भगवन्निजाग्रहं, तारकेति कथमन्यथा प्रथा ॥४॥**

**कस्य पादकमलानि( लं च ) वन्द्यते, जीवितं त्वयि विधायितं मया ।**
**युक्तितश्च विविधात्मनिश्चयात् , स्वीकृतोऽसि जिनदेव ! पाहि माम् ॥५॥**

इत्यादि प्रशस्तरागरञ्जितचेताः क्षयोपशमरत्नत्रयीधारको गणभृत् किञ्चिदुपालभ्य वीतरागशब्दस्यार्थं चिन्तयन् क्षपकश्रेण्यारूढः केवलज्ञानं प्राप । पूर्वं केवलज्ञानकृतेऽनेक उपायाः कृतास्तथापीदृशो भावोऽनन्तानन्तकालं परिभ्रमता तस्मिन्नेव क्षेत्रे काले भावे च तदैव प्राप्तः । अथ शक्रः श्री**वीर**स्य मोक्षमहिमानं कृत्वा प्रतिपदः प्रगे श्री**गौतम**प्रभोः पूर्णज्ञानोत्सवं चक्रे । यतः-

**स्वर्णाष्टाग्रसहस्रपत्रकमले, पद्मासनस्थं मुनिं ।**
**स्फूर्जल्लब्धिविभूषितं गणधरं, श्रीगौतमस्वामिनम् ॥**

श्री**गौतमो**क्तसूरिमन्त्राराधकसूरयोऽत्र दिनेऽक्षार्चनां चन्दनादिभिः कुर्वन्ति । अथ श्री**वीर**प्रभुरहितां पृथ्वीं वीक्ष्य मोहरूपमहाचरटः सर्वत्र धर्मधनं लुण्टति स्म । तं चौरं प्रति प्राप्तज्ञानेन गणभृतेत्युक्तं-''हे मोह ! यद्यपि श्री**वीर**प्रभुर्मोक्षं प्राप्तस्तथापि तत्स्थापितधर्मराज्येऽहं स्थितोऽस्मि, किं न जानासि ? अहो पापैकनिष्ठ ! अधुना

१. राहित्ये ।

D:\chandan/new/kalp-2/pm5\3rd proof

मुमूर्षुः क्व यासि ? कियद् दूरं प्रणष्टः सन् यास्यासि" ? तन्मिषं कृत्वाऽधुना लोका दीपं करे कृत्वा स्वगृहात् शूर्पच्छलात्तं चरटं वित्रास्य मन्दिरान्निष्कासयन्त्येव किमु ? मोहाविरतिरूपामलक्ष्मीं निर्वासयन्ति गौतमज्ञानोत्पत्तिरूपां महालक्ष्मीं स्वात्ममन्दिरे स्थापयन्तीति भावार्थः ।

अथैषु दिनेषु मध्ये एकोपवासेन सहस्रगुणं पुण्यं स्यात्, अष्टमतपसा कोटिगुणं पुण्यं स्यात्, यतो यत्र दिनेषु सर्वे जनाः पञ्चेन्द्रियसुखाभिलाषिणो जायन्ते, महान्ति कर्मबन्धकारणानि रचयन्ति, भोगोत्सुका भवन्ति च, अतस्तत्त्यागिनां परमार्थज्ञानां महान् लाभो भवत्येव । अथवा चतुर्दश्याममावास्यायां च षोडशप्रहरानुपवासौ विधाय चन्दनाक्षतपूजाभिः कोटिपुष्पसहिताभिः श्री**वीरादि**जिनान् पञ्चचत्वारिंशत्सिद्धान्तांश्च पूजयेत्, "**श्रीवीरस्वामिसर्वज्ञाय नमः**" इत्यस्य जपो विधेयः । अमावास्यायां चरमयामार्धे "**श्रीवीरं पारङ्गताय नमः**" इति प्रतिपत्प्रगे तु "**श्रीगौतमस्वामिकेवलज्ञानाय नमः**" । सहस्रसुवर्णपत्रकमले निषण्णं पद्मासनस्थं पञ्चाशत्सहस्रसाधुसाध्वीस्वदीक्षितपरिषत्परिकलितं च चित्ते संस्मृत्य जिनाग्रे तथा **गौतम**स्वाम्यग्रेऽखण्डाक्षतैः पञ्चाशत्सहस्रसङ्ख्यैः स्वस्तिकं कृत्वाऽखण्डयत्नतो दीपं विधाय **गौतम**प्रभुं ध्यायेत्, महत्फलं स्यात् । इत्युपदेशः **सुहस्ति**सूरिणा **सम्प्रत्य**ग्रे प्रोक्तः । सोऽपि तत्पर्वाराधने तत्परो जातः ॥

**वर्धमानजिन आप निर्वृत्तिं, यत्र केवलरमां च गौतमः ।**
**राजभिर्व्यरचि दीपमालिका, तत्ततोऽस्ति न हि पर्व भूतले ॥१॥**

**इत्यब्ददिनपरिमितहितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थस्य वृत्तौ चतुर्दशस्तम्भे व्याख्यानम् ॥२१०॥**

अथ ज्योत्कारोऽद्भूतोऽभवत् तत्स्वरूपमाह–

**अन्योऽन्यं जनज्योत्कारा, भवन्ति प्रतिपत्प्रगे ।**
**तत्स्वरूपं तदा पृष्टे, पुनर्जगाद साधुपः ॥१॥**

स्पष्टः । हे नृप ! **सम्प्रते** ! एकस्त्वयं हेतुरस्ति–**गौतम**स्य केवलमुत्पन्नं नवीनराज्येशमिव सर्वैरागत्य गणभृद्वन्दितः, तेन प्रणामविधिर्जातः । अन्यं हेतुं शृणु–

पुराऽ**वन्त्यां** धर्मभूपः । तस्य **नमुचि**नामा धीसखो बभूव । एकदा तत्र **मुनिसुव्रत**-स्वामिशिष्याः श्री**सुव्रत**सूरय आजग्मुः । तेषां वन्दनार्थं श्री**धर्म**भूपो **नमुचि**ना सह समागात् । देशनायां स धीसखो वादममुं चकार-''स्वप्नोपमं वै सकलं, भूते नष्टे सर्वं नष्टं, न परलोकेऽयं गतिं प्राप्नोति'' इत्यादि स्थापयन् सूरिशिष्येण निर्जितः । तदनु क्रोधवशो रात्रौ करवालं करे कृत्वा हन्तुमना निष्कृपः साधुसमीपमुपागतः, जैनदेवतया तथैव स्तम्भितः, चित्रलिखित इव प्रभाते भूपादिभिर्दृष्टः, देवतां गुरुं च क्षमयित्वा मोचितः, पौरैर्धिक्कृतश्च लज्जितो पुरान्निर्गत्य भ्रमन् **हस्तिनाग**पुरं गतः । तत्र **पद्मोत्तरो** राजा । तस्य प्रिया सम्यक्त्वशीलालङ्कृता **ज्वालादेव्य**स्ति । तयोः सुतौ **विष्णु-कुमारमहापद्मा**ह्वौ । राज्ञा **विष्णुकुमार**स्य राज्यपदं दत्तं, तस्यानुजस्य यौवनराज्यं च । अन्यदा स **नमुचिः** स्वकलाकौशलं युवराजायादर्शयत् , तेन हृष्टस्तं सचिवपदं ददौ । सोऽन्यदा **नमुचि**र्महायोधं **सिंहरथं** जिगाय । ततस्तुष्टो युवराजो वरं ददौ । स च तं वरं कोशे न्यासीचकार । एकदा **ज्वालादेव्या** मुदा रथयात्राचिकीर्षया स्वर्णरत्नैरलङ्कृतो जैनरथो निर्मापितः । तदा तस्याः सपत्नीभिर्ब्रह्मरथः स्पर्धया कारितः । अथ तौ रथौ चतुष्पथे परस्परमभिमुखौ मिलितौ । तयोर्द्वयोर्वादे जाते एकस्या अपि रथं मार्गं दत्त्वा नाग्र आकर्षयन्ति आकृष्टिकरा नराः । तदा कलहनिवृत्त्यर्थं राजा द्वावपि रथा अवारयत् । तदनु **महापद्म**स्तथा कृतं मातुरपमानं वीक्ष्य स्वान्ते दुःखितो देशान्तर-मगच्छत् । क्रमेण चक्रियोग्यां संपदमुपार्ज्य जन्मभूमावागतः । पित्रा महामहसा पुरे प्रवेशितः ततो **महापद्म**स्य द्वात्रिंशत्सहस्रनृपादयो राज्याभिषेकं द्वादश वर्षाणि यावच्चक्रुः । तदनु पिता **विष्णुकुमारेण** सह **सुव्रता**चार्यसमीपे दीक्षां लात्वा त्रिदिवं प्राप । **विष्णुकुमार**स्य तु षष्टिशतानि वर्षाणि तीव्रं तपः कुर्वतो वैक्रियादिलब्धयो जाताः अथ **महापद्म**श्चक्री मातू रथयात्रामनोरथं प्रौढोत्सवपूर्वंपूर्णीचकार । ततः स्वपापत्यागार्थं मातृवाक्येन जिनचैत्यभूषितां महीं चकार । अथ ते **सुव्रत**सूरयो **हस्तिनागपुरे** बहुसाधुयुताश्चतुर्मासाभिग्रहास्तस्थुः । तदा स्मृतपूर्ववैरो **नमुचि**श्चक्रिपार्श्वे स्ववरं ययाचे-''हे नृपेन्द्र ! कार्तिकराकां यावन्मे षट्खण्डराज्यं देहि'' । श्रुत्वा नृपस्तस्मै सर्वं राज्य दत्त्वा स्वयमन्तःपुरमलञ्चकार । अथ **नमुचिः** षट्खण्डराज्य-मपालयत् निरङ्कुशः सर्वधर्मद्वेषी । सञ्ज्ञातनूतनसर्वपृथ्वीपतित्वात् सर्वे नृपादय

उपायनानि दत्त्वाऽऽज्ञामङ्गीचक्रुः । **नमुचि**ना जीवहिंसात्मको यज्ञः प्रारब्धः । द्विजादयः सर्व आशिषं दत्त्वा तत्कृत्यं प्रशशंसुः । तदा तान् सूरीनाकार्य प्राह–''भवतो मुण्डान् मुक्त्वाऽन्ये सर्वेऽपि लिङ्गिनो द्विजाश्च मां सार्वभौमं यज्ञधर्मकृत्यं च ज्ञात्वा नमन्ति स्तुवन्ति च । यूयं किं मत्तोऽधिकाः स्थ ? तस्मान्मे भूमौ साधुभिर्न स्थेयं सप्तवासराधिकं, यदि मद्भूमौ स्थास्यन्ति तेषामहं हन्ता, अत्र दूषणं मम न देयं'' । ततः पौरैः सामवचोभिः शिक्षितोऽपि, स्वाभिनिवेशं नामुञ्चत् । ततः सूरयो दध्युः– ''सर्वत्रास्य राज्यं, वयं चतुर्मास्यां सप्तदिनमध्ये क्व गच्छामः'' ? इति विचिन्त्य साधून् पप्रच्छुः–''एतेषु मध्ये गगनमार्गलब्धिमान् कोऽप्यस्ति ? यो मेरुशृङ्गस्थं **विष्णु**तपस्विनमत्राह्वयति'' ? ततः एक शिष्यो गुर्वाज्ञां प्राप्य तत्र गतः । **विष्णु**-मुनिरपि चतुर्मासकेऽतर्कितं तस्यागमनहेतुं पप्रच्छ । तेन यथातथं प्रोक्तं । ततो **विष्णु**मुनिस्तेन साधुना सह **नमुचि**राजसंसदि इयाय । **नमुचिं** विना शेषै राजादि-भिर्वन्दितः, **नमुचिं** प्राह–''हे भूप ! धृताभिग्रहा मुनयोऽधुना क्व यास्यन्ति, तस्मात् स्थित्यर्थं कियतीं भूमिं देहि'' । **नमुचि**ना त्रिपदीमिता पृथ्वी दत्ता । तन्निशम्य कोपाटोपवान् **विष्णु**र्वैक्रियलब्ध्या कृतलक्षयोजनमिताङ्ग एकं क्रमं पूर्वदिश्यन्यं चापरदिशि विन्यस्योवाच–''अरे पापिन् ! तृतीयचरणस्थापनभूमिं क्व ददासि'' ? स भयविह्वलो मौनेन स्थितः । तदा तृतीयक्रमो **नमुचेः** पृष्ठे निहितः, तेन द्विधापि रसातलं, गतवान् यथा त्रिविक्रमेण बलिरिपू रसातलं क्षिप्तः । तदाऽचला अपि चला जज्ञिरे, ग्रहा भयभ्रान्ता जाताः, इन्द्रादयोऽपि ''इदं किं'' ? इति सम्भ्रान्ता अवधिज्ञानात् तन्निमित्तं ज्ञात्वा वासवो **विष्णु**मुनेः क्रोधोपशान्तये गन्धर्वान् गीतज्ञान् प्राहिणोत् । तैर्मुनिकर्णसमीपे शमामृतमयं गीतनृत्यं प्रारब्धं, तेन प्रशान्तकोपाग्निर्जज्ञे, ततो मूलरूपं चकार । सार्वभौमोऽपि लज्जान्वितो नमन् **विष्णुनो**पालम्भितः– ''त्वयि राज्ञि सति ईदृशी शासनहीलना पीडा च भवेत् तर्ह्यन्येषां क्षुद्रभूपानां राज्ये को दोषः'' ? इत्यादिशिक्षां चक्रपतेर्दत्त्वाऽऽचार्यान्तिकमागत्यालोचितं यथास्थितकथनेन प्रतिक्रान्तं प्रायश्चित्तग्रहणेनेति । अत्र शासनभक्त्यर्थं विहितं, तेन न कश्चिद्दोषः, तथापि किञ्चित्स्वाध्यायध्यानादिभ्यो(षु) भ्रष्टत्वं विभावप्रसङ्गत्वं च जातं तद्गुरुसमक्ष-मीर्यापथिकादिनाऽऽलोचितं । ततः शिवगतिमवाप । अथ तदुत्पात उपशान्ते पुनर्जन्म

चैतन्यं च लब्धमिव जनाः प्रतिवर्षं प्रतिपद्दिने वस्त्रा-न्न-पान-ज्योत्कार-गेहभूषादि-महोत्सवाः कुर्वन्ति । अथ यः साधूनां निन्दादिकारकः स नररूपोऽपि मृग एव-पशुरेवेति सर्वत्र ख्यातिकृते ज्ञापनार्थं च गृहे गृहे राज्ञा गोहिसः कारितः, अद्यापि मरुदेशादौ छगणस्य कुर्वन्तीति ॥

**ज्योत्कारघस्त्रे प्रथमो गणेशः, कैवल्यलक्ष्मीं जिनतीर्थराज्यम् ।**
**विस्तारयामास गुणौघशक्तिं, श्रीवीतरागार्थविभावनातः ॥१॥**

**इत्यब्ददिनपरिमितोपदेशसंग्रहाख्यायामुपदेशप्रासादग्रन्थवृत्तौ**
**पञ्चदशस्तम्भे २११ व्याख्यानम् ॥**

● ● ●

D:\chandan/new/kalp-2/pm5\3rd proof

## पाठकश्रीउमेदचन्द्रविरचितं

# दीपमालिकाव्याख्यानम् ॥

श्री**नेमीशं** जिनं नत्वाऽ**जिमगञ्ज**पुरे स्थितम् ।
**दीपोत्सव**स्य व्याख्यानं, लिख्यते देवभाषया ॥१॥

अस्मिन् **जम्बू**द्वीपे **भरत**क्षेत्रस्य मध्यखण्डे **मालव**देशे अलकातुल्या **उज्जयिनी** नाम नगरी बभूव । तस्यां सूर्यवत् तेजस्वी भूपगुणसमन्वितः सम्प्रतिनामा राजा राज्यं करोति स्म । अथैकदा **उज्जयिन्यां सुस्थित**सूरिनामा आचार्यः षट्त्रिंशद्गुणैर्विभ्राजमानो ग्रामानुग्रामं विहरन् जीवितस्वामिश्री**महावीर**प्रतिमावन्दनार्थं गतः, एतस्मिन् प्रस्तावे **सम्प्रति** राजा राजमार्गे गच्छन् **सुस्थित**सूरिं दृष्ट्वा जातिस्मरणभाग् बभूव । ततः राजा समीपे आगत्य बहुभक्तिपूर्वकं श्रीगुरुं ननाम । करद्वयं संयोज्य राजा गुरुं प्रति वक्ति स्म–'हे स्वामिन् ! मां जानीथ' इति पृष्टे गुरुराह–हे राजन् ! भवन्तं को नाम न जानाति ?; ततो राजा पुनरुवाच–हे ज्ञानसमुद्र ! ज्ञानविशेषेण भवताऽहमुपलक्षितो न वा ? इति मया पृच्छ्यते, तदा सूरिश्चमत्कारं प्राप्य श्रुतज्ञानोपयोगं दत्त्वा उवाच भो राजन् ! त्वं पूर्वभवे संवेगवानस्माकं शिष्यो बभूव, उत्तमदीक्षाप्रभावतो भवान् राजा जातः, एषा च सम्पत् प्राप्ता । एतादृशं गुरोर्वचनं श्रुत्वा आचार्ये प्रीतिमान् राजा वक्ति–हे स्वामिन् ! मया बुभुक्षितेन रङ्केन इदं राज्यं प्राप्तं तत् सर्वं युष्माकं प्रसादफलं इतरथा मम राज्यं कुतः ? तस्मादिदं राज्यं भवद्भिर्ग्राह्यं यथाऽहमनृणी स्याम् , एतादृशं राज्ञो वाक्यं श्रुत्वा गुरुरुवाच–हे निर्मलबुद्धे राजेन्द्र ! अस्माकं राज्यस्य वाञ्छा नास्ति, वयं तु शरीरेऽपि निःस्पृहाः किं पुनः राज्ये, तस्माद् हे राजेन्द्र ! अस्माकं राज्येन सह किमपि प्रयोजनं नास्ति, इदं राज्यं भवद्भिः पुण्यात् प्राप्तं ततो हे राजेन्द्र ! पुनः पुण्ये उद्यमः कर्तव्यः, निर्मलं सम्यक्त्वं च पालनीयम्। श्रीजिनेश्वरजगन्नाथस्य निरन्तरं पूजां कुरु । पुनः सुसाधूनां निर्ग्रन्थानां पञ्चसमितिसमितत्रिगुप्तिगुप्तानां सप्तदशभेदसंयमपालकानां द्विचत्वारिंशदाहारदूषणवर्जितानां

भव्यजीवोपकारिकाणां सेवां कुरु, दानादिचतुर्विधस्य धर्मस्याराधने उद्यमं कुरुष्व, एष धर्मो विशेषेण पर्वसु आराधनीयः, एतादृशं गुरुवाक्यं श्रुत्वा राजा उवाच-हे स्वामिन्! संवत्सरादि समस्तपर्व जिनशासने प्रसिद्धं वर्तते, तस्य पर्वणो महिमा श्रावकैः बहुतरो मन्यते परं लोकोत्तरं **दीपावलि**पर्व कुतः प्रवृत्तं ?, अस्मिन् पर्वणि चारुवस्त्र-भूषणादीनि मनुष्या धारयन्ति, पुनः वृषभादिशृङ्गरञ्जनक्रियां गृहाङ्गणप्रमुख-संस्कारादीनि च कुर्वन्ति, तस्य किं कारणम् ? इति राज्ञा पृष्टे सति गुरुर्वक्ति स्म-हे राजन् ! एतस्य सम्बन्धं त्वमेकाग्रचित्ततया शृणु । श्री**वर्धमान**स्वामी **प्राणत**-नामदशमदेवलोकस्य **पुष्पोत्तर**विमानाच्च्युतः, **आषाढशुक्लषष्ठी**दिने **उत्तरा-फाल्गुनी**नक्षत्रे चन्द्रयोगे आगते सति **क्षत्रियकुण्ड**ग्रामनगराधिपतिश्री**सिद्धार्थ**राज्ञो भार्यायाः **त्रिशला**याः कुक्षावुत्पन्नः । यस्यां रात्रौ भगवानुत्पन्नः तस्यां रात्रौ गर्भप्रभावात् **त्रिशला**राज्ञ्या चतुर्दश स्वप्ना दृष्टाः, तानाह-सिंहः, गजः, वृषभः, लक्ष्मीः, पुष्पमाला, चन्द्रः, सूर्यः, ध्वजः, पूर्णकलशः, पद्मसरः, समुद्रः, देवविमानम् , रत्नराशिः, निर्धूमाग्निश्च । एवमेते स्वप्नाः क्रमेण दृष्टाः *ततः **चैत्रशुक्ल-त्रयोदश्या**मर्धरात्रे श्री**वीर**प्रभोः जन्म जातम् , तस्मिन् समये षट्पञ्चाशद्दि-क्कुमारीणामासनानि चकम्पिरे, अवधिना प्रभोर्जन्म ज्ञात्वा अत्यन्तप्रमुदिताः सन्त आगत्य जन्मकार्यं कुर्वन्ति । तदनन्तरं चतुष्षष्टिसुरेन्द्राणामासनानि चकम्पिरे, ततस्तेऽपि अवधिना विज्ञाय अत्यन्तप्रमुदिताः सन्त आगत्य त्रिः प्रदक्षणीकृत्य जिनाम्बां जिनं च नत्वा मातरमवस्वापिनीं निद्रां दत्त्वा प्रभुं गृहीत्वा **मेरु**पर्वतोपरि गत्वा स्नात्रमहोत्सवमहम्पूर्विकया चक्रुः । पश्चाद् मातुः समीपे स्थापयित्वा मातुरवस्वापिनीं निद्रां संहृत्य नमस्कृत्य स्वस्थानं जग्मुः । अथ यस्माद् दिनात् प्रभुर्गर्भे आगतस्तस्माद् दिनाद् राजा धनधान्यैर्वृद्धिमाप, स्वर्णरत्नादीनां च वृद्धिः सञ्जाता । ततो गुणनिष्पन्नं सर्वस्वजनसमक्षं माता-पितृभ्यां द्वादशे दिने **वर्धमान**कुमार इति नाम प्रदत्तम् , देवैश्च अनन्तसत्त्वमनन्तधैर्यं दृष्ट्वा **महावीर** इति नाम विदधे । अथ भोगसमर्थं ज्ञात्वा पित्रा परं प्रमोदतो **यशोमती**नाम्न्या राजकन्यया सह पाणिग्रहणं कारितम् । अथ प्रभोः **सुपार्श्व**नामा पितृव्यः, **नन्दिवर्धन**नामा ज्येष्ठो भ्राता,

---

* अत्र सामान्येन नाममात्रेण संक्षिप्तं श्री**वीर**चरित्रं दर्शितम् , अत एव देवलोकात् च्युत्वा **आषाढशुक्लषष्ठ्यां देवानन्दा**गर्भागमनं तथैव द्व्यशीतिदिनव्यतीते इन्द्रेण **त्रिशला**गर्भे अवतारितः, (गर्भापहारः कारितः, इत्यर्थः) एष च विशेषार्थो न दर्शितः ।

D:\chandan/new/kalp-2/pm5\3rd proof

**सुदर्शना**नाम्नी भगिनी, **यशोमती** पत्नी, **प्रियदर्शना**नाम्नी च पुत्री आसीद् । श्री**वीर**प्रभुः अष्टाविंशतिवर्षाणि यावद् गृहावासे तस्थौ । भगवता पूर्वं गर्भे एवाभिग्रहः कृतोऽभूद्यत् जीवतोः सतोः मातापित्रो मया दीक्षा न गृहीतव्या इति । अथ मातापितृभ्यां देवलोके प्राप्ते अभिग्रहं पूर्णं सञ्जातं ज्ञात्वा प्रभुर्दीक्षां ग्रहीतुं तत्परोऽभूत्, तदा **नन्दिवर्धन**राज्ञ आग्रहात् पुनरपि वर्षद्वयं गृहस्थावासे तस्थौ, तत्र सांवत्सरिकं दानं दत्तम् । अथ **लोकान्तिक**देवा आगत्य जानन्तमपि प्रभुं दीक्षावसरं ज्ञापयन्ति-'अहो स्वामिन् ! धर्मतीर्थप्रवृत्तिं कुरु' इति देववचनं श्रुत्वा प्रभुः षष्ठतपसा संयुतः **चन्द्रप्रभा**नाम्नीं शिबिकामारुह्य देवमनुष्यपरिकरेण युतः **क्षत्रियकुण्ड**नगरतो निःसृत्य ज्ञातवनखण्डे आगत्य शिबिकातः उत्तीर्य **मार्गशीर्षकृष्णदशम्याम**पराह्णे एकाकी एकदेवदूष्येण वस्त्रेण सहितः दीक्षां जग्राह । तस्मिन् समये चतुर्थं मनः-पर्यवज्ञानमुत्पन्नम् ।

अथ दीक्षां गृहीत्वा प्रभुरन्यत्र विजहार। प्रव्रज्यादिनाद् द्वितीये दिने **कोल्लाक**-ग्रामे आगतः, तत्र **बहुलवि**प्रगृहे परमान्नस्य पारणं चक्रे, तत्र पञ्च दिव्यानि प्रादुर्भूतानि। तत्र च सार्धद्वादशस्वर्णकोटीनां देवैर्वर्षा कृता। अनन्तरं क्रमेण विहरतः श्री**वीर**प्रभोः गोपालक-चण्डकौशिकसर्प-शूलपाणियक्ष-सङ्गमदेव-कटपूतना-व्यन्तरीप्रमुखैः बहव उपसर्गाः कृताः, तथापि प्रभुर्ध्यानात् किञ्चिन्मात्रमपि न चचाल मेरुवन्निष्प्रकम्प आसीत्, श्री**वीर**प्रभोः चातुर्मासी-षण्मासी-द्विमास्यादि प्रचण्डतपः क्रियायामुद्यतस्य पक्षाधिकसार्धद्वादशवर्षाणि अतिक्रान्तानि । तस्मिन् समये **जृम्भिक**ग्रामे **ऋजुवालुका**नदीतीरे **श्यामाक**कुटुम्बिनः क्षेत्रस्य समीपे **शाल**वृक्षस्याधोभागे गोदोहासनेन स्थितस्य षष्ठतपोयुक्तस्य **वैशाखशुक्लदशम्यां** तृतीयप्रहरे शुक्लध्याने वर्तमानस्य श्री**वीर**प्रभोश्चतुर्णां घातिकर्मणां क्षये सति केवल-ज्ञानं केवलदर्शनं च समुत्पन्नम् । तत एकादश्यां **मध्यमपापायां महासेनवने** तीर्थं प्रवर्तितम्, शक्रादिदेवैरेकत्रीभूय समवसरणं रचितम्, पश्चाद् **इन्द्रभूत्या**द्येकादश गणधराः श्री**वीरे**ण स्थापिताः ! अथ प्रभोः चतुर्दशसहस्रमिताः साधवः सञ्जाताः, **चन्दनबाला**दिषट्त्रिंशत्सहस्रमिताश्च साध्व्योऽभूवन्, **शङ्ख-शतका**दि एकोनषष्टि-सहस्राधिकलक्षप्रमाणाः श्राद्धाः, **सुलसा-रेवती**प्रमुखाष्टादशसहस्राधिकत्रिलक्षण-प्रमाणाः श्राविकाश्च सञ्जाताः ।

अथ प्रभोश्चतुर्मासीनां सङ्ख्या कथ्यते-दीक्षाऽनन्तरं प्रथमचतुर्मासी **अस्थिग्रामे**

D:\chandan/new/kalp-2/pm5\3rd proof

**शूलपाणि**यक्षगृहे कृता, त्रिचतुर्मासी **चम्पा**नगर्याम्, **विशालायां-वाणीय**ग्रामे द्वादश चतुर्मास्यः कृताः, **राजगृह**नगर्यां **नालन्द**पाटके चतुर्दश चतुर्मास्यः, षट् चतुर्मास्यः **मिथिला**नगर्यां भगवता कृताः, द्वे चतुर्मास्यौ **भद्रिका**नगर्यां कृते, एका चतुर्मासी **आलम्भिका**नगर्यां कृता, एका चतुर्मासी म्लेच्छभूमिकायां कृता, एका चतुर्मासी **श्रावस्ती**नगर्यां कृता, एका च **मध्यमपापायां हस्तिपाल**राज्ञः सभाया-मान्तिमा कृता, तत्र अन्तिमचातुर्मास्यां श्री**वीर**प्रभुः स्वस्यायुषोऽन्तं ज्ञात्वा भव्य-लोकोपकारार्थं षोडश प्रहरान् यावद् देशनां दत्तवान्, तस्मिन्नवसरे **पुण्यपाल**राजा प्रभोर्वन्दनार्थमागतः, श्री**वीर**प्रभोर्वन्दनां कृत्वा हस्तद्वयं सम्पुटीकृत्य इति वक्ष्यमाणं पृष्टवान्-हे स्वामिन् ! अद्य रात्रौ मया अष्टौ स्वप्ना दृष्टाः, ताननुक्रमेण भवतामग्रे कथयामि-जीर्णशालायां स्थितो **हस्ती** दृष्टः १, **कपि**श्चपलतां कुर्वन् दृष्टः २, **क्षीरवृक्षः** कण्टकैर्व्याप्तो दृष्टः ३, चतुर्थे च स्वप्ने **काको** दृष्टः ४, पञ्चमे मृतः **सिंहो** भयं कुर्वन् दृष्टः ५, षष्ठे स्वप्नेऽशुचिभूमिकायामुत्पन्न**मरविन्दं** दृष्टम् ६, सप्तमे स्वप्ने ऊषरक्षेत्रे **बीज**मुप्तं दृष्टम् ७, अष्टमे स्वप्ने **स्वर्णकलशो** म्लानो दृष्टः ८ इति राज्ञा उक्ते एतेषां च फले पृष्टे प्रभुर्वक्ति-हे राजन् ! एषां फलमेकाग्रचित्तेन श्रृणु-अस्मिन् पञ्चमारके दुःख-दारिद्र्य-रोग-शोक-भयैर्व्याप्तो गृहस्थाश्रमो जीर्णशालासदृशो भविष्यति यस्मिन् गृहस्थरूपो हस्ती रक्तः सन् स्थास्यति दुःखं च सुखं कृत्वा मानयिष्यति परमुत्तमसुखदात्रीं व्रतशालां नाङ्गीकरिष्यति, इति प्रथमस्वप्नफलम् । पुनः पञ्चमकाले कपिवत् चपला अल्पसत्त्वा जीवा ज्ञानक्रियायामादरभाजो न भविष्यन्ति, साधवश्च शिथिलाचारा भविष्यन्ति, ये पुनः दृढव्रतधारका धर्मकार्ये शिक्षां दास्यन्ति तेषां हास्यं च करिष्यन्ति, यथा ग्रामीणलोका नगरस्थलोकानां हास्यं कुर्वन्ति, तथा करिष्यन्ति, इति द्वितीयस्वप्नफलम् । तथा ज्ञाने क्रियायां च भक्तिमन्तो जिनशासनोन्नतिकारकाः सप्तक्षेत्रीवित्तव्ययविधायकाः शुभगुणवन्तश्चारित्ररागिणः क्षीरवृक्षतुल्या ये श्रावकास्तान् वेषमात्रधारिणोऽहङ्कारवन्तो गुणवत्साधुद्वेषिणः सुसाधुपूजामसहमाना लिङ्गिनः कण्टकतुल्याः रोधयिष्यन्ति, इति तृतीयस्वप्नफलम् । यथा अतिस्व-च्छजलभृतां वापीं दृष्ट्वा काको न तत्र रागं करोति, एवं ज्ञानक्रियायुक्तान् अपि साधून् स्वगच्छे दृष्ट्वाऽपि रागं न साधवः प्राप्स्यन्ति, यथा काकस्य रागं न वापी प्राप्नोति तथा साधवोऽपि गच्छस्य रागं न करिष्यन्ति इत्यर्थः । परन्तु यत्र गच्छे मन्दाऽऽचाराः साधवः तत्र सुन्दरं स्वगच्छं त्यक्त्वा यास्यन्ति आत्मनः पण्डितं

मन्यमाना:, इति चतुर्थस्वप्नफलम् । जातिस्मृत्यादिरहितं मृतसिंहतुल्यं जिनदर्शनं न परतीर्थिकात् पराभवं प्राप्स्यति परं परदर्शनानां भयं करिष्यन्ति, इति पञ्चमस्वप्नफलम्। पद्महदे कमलोत्पत्तिर्युक्ता, न अशुचिभूमौ, एवं धर्मोत्पत्तिरपि उत्तमकुले युक्ता, नाधमकुले, परन्तु धर्मोत्पत्ति: कालप्रभावतो नोत्तमकुले भविष्यति, इति षष्ठस्वप्नफलम् । यथा कश्चिद् मन्दबुद्धि: कृषिकारो धान्यबीजमूषरक्षेत्रे वपति तथा मूर्खबुद्धिमन्त: पुमांस: पात्रापात्रमनालोक्य पात्रबुद्ध्या कुपात्रे दानं दास्यन्ति, इति सप्तमस्वप्नफलम् । अष्टमस्वप्नफलम्-स्वर्णकलशसदृशा ज्ञानादिगुणयुक्ता: साधव: स्तोका भविष्यन्ति न च तेषां पूजाप्रभावनामपि कोऽपि करिष्यति, परन्तु ये बाह्याऽऽडम्बरवन्तो ज्ञानक्रियारहिता: साध्वाभासा: तान् लोका: पूजयिष्यन्ति, गीतार्था अपि साधवो हीनाचारिभि: सह मिलिता: चलिष्यन्ति, यथा बहून् ग्रथिलान् लोकान् दृष्ट्वा सज्जनलोका अपि तेषां मध्ये मिलिता: सन्त: जानन्तोऽपि स्वयमात्मजीवितरक्षार्थं ग्रथिला भविष्यन्ति तथा ।

अथ तत्कथा-**पृथिवीपुरे** नगरे **पूर्णभद्र**नामा राजा आसीद्, तस्य महाबुद्धिनिधान: चतुर: सकलकार्यकुशल: **सुबुद्धि**नामा मन्त्रीश्वरोऽभूद्, अथैकदा प्रस्तावे राजसभामध्ये **लोकदेव**नामा नैमित्तिक: समागत: तदा अमात्येन पृष्टं, हे नैमित्तिकचूडामणे ! आगामिकालस्य शुभाशुभवार्तां काञ्चित् प्रकाशयतु, तदा नैमित्तिकेन निजनिमित्तशास्त्रं सम्यक् पर्यालोच्य स्वज्ञानबलात् कथितम्-हे मन्त्रीश्वर ! अतो दिनाद् एकस्मिन् मासे मेघवृष्टिर्भविष्यति, तज्जलपानं च ये करिष्यन्ति ते सर्वे मनुष्या ग्रथिला: भविष्यन्ति, तत: पश्चात् कियति दिवसे शुभा वृष्टिर्भविष्यति, तज्जलपानाच्च पुन: सर्वे सावधाना भविष्यन्ति, एतादृशं नैमित्तिकस्य वचनं श्रुत्वा राजामात्याभ्यां नगरमध्ये घोषणा कारिता । यत् सर्वै: लोकै: पानीयस्य संग्रह: कर्तव्य:, तदनन्तरं सर्वैरपि राजवचनं श्रुत्वा पानीयस्य संग्रह: कृत: । अथ नैमित्तिककथनानुसारेण वर्षा जाता, तदा सर्वैरपि लोकै: वर्षापानीयस्य पानं न विहितम्, कियति दिवसे गते पूर्वसंगृहीतं जलं यदा सम्पूर्णं जातं तदा राजाऽमात्याभ्यां विना सर्वै: सामन्तादिभिरपि वर्षापानीयं पीतम्, तेन च सर्वग्रामो ग्रथिल: जात:, अथ सर्वे लोका एकत्रीभूय नग्ना: सन्त: नृत्यन्ति हसन्ति अन्याश्च कुचेष्टा: कुर्वन्ति, राजामात्याभ्यां विना सर्वे तादृशं कुर्वन्त: राजानम् अमात्यं च तथाविधचेष्टारहितं ज्ञात्वा ते ग्रथिला: सर्वे विचारयन्ति-राजाऽमात्यौ ग्रथिलौ जातौ अत एव अस्माकं कार्यं न कुर्वन्ति, अत

एतौ उत्थाप्य अन्यौ राजामात्यौ करिष्यामः, एतादृशं ग्रथिललोकानां विचारं श्रुत्वा अमात्यो राजानं वक्ति स्म, एते सर्वेऽपि लोका आवामुत्थाप्य अन्यौ राजामात्यौ स्थापयिष्यन्ति तदा कमपि उपायं कृत्वा आवयोः रक्षा कार्या, तदा राजा अमात्यं कथयति स्म भवता कश्चिदुपायो विधेयो येनाऽऽवयोः रक्षा स्याद्, तदा विचार्य अमात्यो वदति स्म-हे राजन् ! अन्यः कश्चिदुपायो नास्ति अत आवामपि ग्रथिलौ भवावः तदा इदं राज्यं स्थास्यति इति विचार्य राजामात्यौ जानन्तौ अपि ग्रथिलौ भूत्वा, एभिः सार्धम् आत्मराज्यरक्षार्थं मिलितौ, ततः कियति दिने गते सति पुनः सुवृष्टिर्जाता तदा नवीनोदकस्य पाने सति सर्वे लोकाः सावधाना जाताः। एवं दुःषमकाले क्रियावन्तो गीतार्था अपि हीनाचारिभिः सार्धं सदृशीभूय विचरिष्यन्ति। एतादृशं स्वप्नफलविचारं श्रुत्वा गृहस्थावासतः उद्विग्नीभूय श्री**वर्धमान**स्वामिसमीपे व्रतमङ्गीकृत्य **पुण्यपालो** मोक्षसुखभाग् बभूव ।

अत्र केचिद् श्री**भद्रबाहुस्वामि**ना उक्तान् अपि स्वप्नान् व्याख्यायन्ति । तथाहि- **''तेणं कालेणं, तेणं समएणं पाडलिपुरे नाम नयरे होत्था, जहा णं चंपा तहा भणियव्वा, तत्थ णं पाडलिपुरे नयरे पाडलनामवणसंडे होत्था, तत्थ णं पाडलिपुरे चंदगुत्ते नाम राया होत्था, तेणं कालेणं तेणं समएणं चंदगुत्तनामराया समणोवासगो अभिगयजीवाजीवो जाव अट्ठिमिज्जापवयणरागरत्तो, अह अण्णया कयावि पक्खिय-पोसहम्मि पडिजागरमाणस्स सुइपत्तेसु ओहीरमाणे ओहीरमाणे सोलससुविणा दिट्ठा, पासिता, चिंता समुपन्ना अहक्कमेण दिवायरे उट्ठिए पोसहं पारेइ । तेणं कालेणं, तेणं समएणं संभूयविजयसीस्से भद्दबाहुनाम गणहरे जुगप्पहाणे गामाणुगामं विहरमाणे पंचसय-समणपरिवरिया पाडलिपुरे पाडलिवणसंडे समोसरिए, राया आगओ जहा कोणिए पंचविहेणं अभिगमेणं वंदणेणं सोलससुमिणाणं अत्थं पुच्छइ-भयवं ! अज्ज रयणीए मम धम्मचिंताए वट्टमाणस्स पच्छिमे समये सोलससुमिणा दिट्ठा-तत्थ पढमे सुमिणे कप्परुक्खस्स साहा भग्गा १, बीए अकाले सूरो अत्थमिओ २, तइए चंदो सयच्छिद्दीभूओ ३, चउत्थे भूया नच्चन्ति ४, पञ्चमे दुवालसफणो कण्हसप्पो दिट्ठो ५, छट्ठे आगयं विमाणं पडियं दिट्ठं ६, सत्तमे असुइठाणे कमलं संजायं ७, अट्ठमे खज्जोओ उज्जोअं करेइ ८, नवमे महासरोयरं सुक्कं दक्षिणदिसाओ थोवजलं लभन्ति ९, दसमे सुनहो सुवण्णपत्ते पायसं भक्खेइ १०, इक्कारसमे हत्थिआरूढो वनचरो दिट्ठो ११, दुवालसमे सायरं मंजायं मुंचइ १२, तेरसमे महारहे वच्छा जुत्ता दिट्ठा १३, चउदसमे**

**महग्घं रयणं तेअहीणं दिट्ठं १४, पनरसमे रायकुमारो वसहारूढो दिट्ठो १५, सोलसमे गयकलहजुयला जुज्जंता दिट्ठा १६, एएण सुमिणाणुसारेण सासणे किं किं भविस्सइ ? इइ चंदगुत्तस्स रायस्स वयणं सुच्चा भद्दबाहुगणहरो युगप्पहाणो भवोदहितारगो चंदगुत्तस्य संघसमक्खं भणइ-चंदगुत्ता ! सुमिणाणुसारेण अत्थं कहेमि''** ॥ तं जहा-प्रश्नसूत्रं सुगममत उत्तरसूत्रं व्याख्यायते-

षोडशस्वप्नानां मध्ये प्रथमं तावत् चन्द्रगुप्तेन राज्ञा कल्पवृक्षस्य शाखा भग्ना दृष्टा, तस्य फलम्-अतः पश्चात् कोऽपि राजा संयमं न ग्रहीष्यति १, द्वितीयस्वप्ने सूर्यस्याकाले एवास्तत्वं दृष्टं तेन केवलज्ञानं विच्छेदं यास्यति २, तृतीये चन्द्रः शतच्छिद्रो दृष्टस्तेन एकस्मिन् धर्मेऽनेके मार्गा भविष्यन्ति ३, चतुर्थे भूता नृत्यन्तो दृष्टास्तेन कुमतिजना भूता इव नर्त्स्यन्ति ४, पञ्चमे द्वादशफणः कृष्णसर्पो दृष्टस्तेन द्वादश वर्षाणि यावद् दुर्भिक्षं भविष्यति, कालिकसूत्रप्रमुखाणि श्रुतानि विच्छेदं यास्यन्ति, चैत्यद्रव्यधारिणो भिक्षुकाश्च तत्र ये साधुधर्मकाङ्क्षिणः ते सर्वे दक्षिणस्यां दिशि वलभ्यां गमिष्यन्ति ५, षष्ठे विमानं पतितं दृष्टं तेन जङ्घाचारणा विद्याचारणाश्च साधवो भरते ऐरावते च नाऽऽगमिष्यन्ति ६, सप्तमे कचवरधरित्र्यां कमलमुद्गतं दृष्टं तेन धर्मश्चतुर्णां वर्णानां मध्ये वैश्यवंशमध्ये भविष्यति, सूत्ररुचिश्चाल्पजनानां भविष्यति ७, अष्टमे खद्योत उद्योतं करोति, तेन जिनधर्मे उदयपूजासत्कारो न भविष्यति परन्तु कुदर्शनस्य पूजादि भविष्यति ८, नवमे शुष्कं सरोवरं दृष्टं तेन यत्र यत्र देशे जिनानां कल्याणकानि तत्र तत्र धर्महानिर्भविष्यति ९, दशमे सुवर्णपात्रे क्षीरं भक्षयन् श्वा दृष्टस्तेन उत्तमा लक्ष्मीरधमगृहे गमिष्यति १०, एकादशे गजारूढो वानरो वनचरो दृष्टः तेन सुखारूढा दुर्जना भविष्यन्ति इक्ष्वाकुवंशीयानां यादवप्रमुखाणां च हानिर्भविष्यति ११, द्वादशे समुद्रो मर्यादां मुञ्चन् दृष्टः, तेन राजानो ऽन्यायकर्तारो भविष्यन्ति, क्षत्रियाश्च कुमार्गगामिनो भविष्यन्ति १२, त्रयोदशे महारथे वत्सा युक्ता दृष्टाः, तेन वृद्धावस्थायां चारित्रं जना न ग्रहीष्यन्ति, परं वत्सतुल्या लघुवयसः साधवो भविष्यन्ति, ये च वैराग्यभावेन चारित्रं ग्रहीष्यन्ति ते च प्रमादिनो भविष्यन्ति १३, चतुर्दशे महार्घ्यं रत्नं तेजोहीनं दृष्टम् । तेन भरते ऐरवते च साधवोऽसमाधिकराः कलहकरा उपद्रवकराश्च भविष्यन्ति तथा श्रमणा अपि स्तोका भविष्यन्ति १४, पञ्चदशे राज्ञः कुमारो वृषभारूढो दृष्टः, तेन क्षत्रिया मिथ्यात्ववासिनो भविष्यन्ति १५, षोडशे गजकलभयुगलं युद्धं कुर्वद् दृष्टम् तेन मुनिवरा अल्पस्नेहा अकालव्यसनिनोऽहर्निशं

युद्धकराश्च भविष्यन्ति गुरुशुश्रुषाकरा न भविष्यन्ति १६, एवं श्रुत्वा **चन्द्रगुप्तो** नाम राजाऽनशनं गृहीत्वा धर्मध्यानेन स्वर्गं गतः । इति षोडश-स्वप्नविचारः कथितः ।

एतादृशं प्रभोर्वाक्यं श्रुत्वा **गौतम**स्वामी चित्ते विस्मयं विधाय प्रभोर्वन्दनां कृत्वा भाविस्वरूपं पप्रच्छ-अहो स्वामिन् ! लोकालोकप्रकाशक ! पञ्चम-षष्ठारकयोः स्वरूपं कथय, प्रभुर्वक्ति स्म-हे गौतम ! त्वं सावधानीभूय श्रृणु-मम निर्वाणात् त्रिवर्षसार्धाष्टमासे व्यतिक्रान्ते चतुर्थारक उत्तरिष्यति, अग्रे च पञ्चमारक आयास्यति, ततो मम निर्वाणाद् द्वादशवर्षे व्यतिक्रान्ते तव मोक्षो भविष्यति, ततोऽस्मन्निर्वाणाद् विंशतिवर्षे गत **सुधर्मस्वामि**नो मोक्षो भविष्यति, ततोऽस्मन्निर्वाणाच्चतुष्षष्टिवर्षे गते **जम्बू**र्मुक्तिं यास्यति, ततो **जम्बू**स्वामितो दश वस्तूनि विच्छेदं यास्यन्ति, तान्याह आहारकशीरं १, मनःपर्यवज्ञानम् २, पुलाकलब्धिः ३, परमावधिज्ञानं ४, क्षपकश्रेणिः ५, उपशमश्रेणिः ६, केवलज्ञानम् ७, परिहारविशुद्धिसूक्ष्मसंपराय-यथाख्यातचारित्राणि ८, सिद्धिगतिः ९, जिनकल्पकः १०, एतानि दश वस्तूनि **जम्बूस्वामि**तो विच्छेदं यास्यन्ति, ततो दुःषमकालप्रभावतश्चतुर्दशपूवधारी **जम्बू-स्वामि** प्रतिबोधकः निजपट्टप्रभावकः श्री**प्रभवस्वामी** भविष्यति । तत्पट्टे चतुर्दश-पूर्वधरः **दशवैकालिक**कर्ता **मनक**पिता श्री**शय्यम्भवसूरिः** भविष्यति, तत्पट्टे चतुर्दशपूर्वधारी **यशोभद्रसूरि**र्भविष्यति, तच्छिष्यौ **सम्भूतिविजय-भद्रबाहु**नामानौ चतुर्दशपूर्वधरौ भविष्यतः, ततो मम निर्वाणात् सप्तत्यधिकशतवर्षे (१७०) अनेकशास्त्रकर्ता **भद्रबाहुः** स्वर्गं यास्यति, ततो मम निर्वाणात् पञ्चदशाधिक-द्विशतवर्षे (२१५) चतुर्दशपूर्वधारी **सम्भूतिविजय**शिष्यः श्री**स्थूलभद्रो** देवलोकं यास्यति, ततः प्रथमं संहननं वज्रऋषभनाराचाख्यं विच्छेदं यास्यति, ततोऽर्थतः चतुष्पूर्व-सूक्ष्मसंपराय-महाप्राणायामध्यानाख्यानि एतानि विच्छेदं यास्यन्ति, ततः मन्निर्वाणाद् त्रिशतवर्षे (३००) **उज्जयिन्यां** नगर्यां **सम्प्रति** राजा भविष्यति, स च **आर्यसुहस्तिसूरि**णामुपदेशाद् जातिस्मरणज्ञानमवाप्य जैनधर्ममङ्गीकरिष्यति, स्वभुज-बलात् त्रिखण्डभोक्ता भविष्यति, ज्ञानवान् दानवान् न्यायी धर्मज्ञो विनयवान् पराक्रमी च भविष्यति मुक्ताफलवद् निर्मलजिनालयैः कृत्वा धरित्रां देदीप्यमानां करिष्यति, पुनः स राजा अनार्यदेशे लोकानामुपकारार्थं सम्यक्त्वधारिणां जीवाजीवादिनवतत्त्व-विदामुपदेशदानार्थं तादृशानां श्रावकाणां धर्मसंयोगं कारयिष्यति, ततो महासंविज्ञ-गीतार्थानां साधूनां म्लेच्छधरित्र्यां विहारं कारयिष्यति, अनया रीत्या तीर्थङ्कराणां धर्मस्य

सर्वदेशे प्रवृत्तिं करिष्यति, एतादृशो महादृढधर्मा अनुक्रमेण स्वर्गं यास्यति । पुनर्मन्निर्वाणात् सप्तत्यधिकचतुःशतवर्षे (४७०) **उज्जयिन्यां** श्री**विक्रमादि**त्यो राजा भविष्यति, श्री**सिद्धसेनदिवाकरा**चार्यस्योपदेशं श्रुत्वा जिनशासनस्योपरि भक्तिमान् भविष्यति, सम्यक्त्वं सम्यग्रीत्या पालयिष्यति, तस्य सत्त्वसिद्धा **अग्निवेताला**द्यनेकदेवाः साहाय्यं करिष्यन्ति, विद्या स्वर्णपौरुषादिः सिद्धिं यास्यति, धैर्यादिगुणविख्यातस्य **विक्रमादित्य**स्य स्थाने स्थाने मनुष्या देवाश्च प्रशंसां करिष्यन्ति, पुनः स राजा सर्वलोकानां दानसंमानादिकं कृत्वा सर्वाननृणीकरिष्यति, स्वनाम्ना च संवत्सरप्रवृतिं करिष्यति, यस्य देवा अपि स्तवनं करिष्यन्ति, महाबलवान् प्रजापालकः परदुःखनिवारकः परस्त्रीसहोदरो राजा **विक्रमादित्यो** भविष्यति, ततः पञ्चशतचतुरशीतिवर्षे (५८४) व्यतिक्रान्ते श्री**वज्रस्वामि** भविष्यति, ततो दशमपूर्वार्धस्य कीलिकासंहननस्य च विच्छेदो भविष्यति, तदनन्तरं षोडशाधिकषट्शतवर्षे (६१६) **पुष्पमित्रेण** सार्धं नवमं पूर्वं विच्छेदं यास्यति, पुनर्मम निर्वाणाद् विंशत्यधिकषट्शतवर्षे (६२०) आचार्यादयो ग्राममध्ये स्थास्यन्ति (?), मम निर्वाणाद् नवाधिकषट्शतवर्षे (६०९) **रथनूपुर**नगराद् दिगम्बरमतोत्पत्तिर्भविष्यति, श्री**विक्रमादि**त्यात् पञ्चत्रिंशदधिकशतवर्षे (१३५) गते शाकी राजा शालिवाहनो भविष्यति, पञ्चाशीत्यधिकपञ्चशतवर्षे (५८५) गते **हरिभद्रसूरि**र्भविष्यति अनेकग्रन्थकर्ता महाप्रभावको, मन्निर्वाणात् त्रिनवत्यधिकनवशतवर्षे ९९३ **कालिका**-चार्यो भविष्यति, यस्येन्द्रो वन्दनां करिष्यति, यः **कालकसूरिः** पर्युषणापर्व पञ्चमीतः चतुर्थ्यां कारणादानीतवान् , मन्निर्वाणात् सप्तत्यधिकद्वादशशतवर्षे (१२७०) व्यतिक्रान्ते **बप्पभट्टिसूरि**र्भविष्यति सर्वविद्याविशारदः तद्वाक्याद् **गोप**पर्वते **आम**राजा जिनालयं करिष्यति, तत्र सार्धत्रिकोटिस्वर्णप्रतिमां स्थापयिष्यति । मन्निर्वाणात् त्रयोदशशतवर्षे (१३००) बहवो मतभेदा भविष्यन्ति, बहुमोहस्य कारणात् दुःषमकालप्रभावतश्चानेकगच्छभेदा भविष्यन्ति, केचित् तपोऽहङ्कारं करिष्यन्ति, केचिच्च धर्मक्रियायां शिथिला भविष्यन्ति, क्रियावन्तोऽपि साधवः परस्परं क्लेशं करिष्यन्ति । पुनरस्यामवसर्पिण्यां दश अच्छेरका जाताः । तानाह-

समवसरणे उपसर्गः १, गर्भापहारः २, स्त्रीतीर्थङ्करः ३, परिषदभावः ४, कृष्णस्यामरकङ्कागमनं ५, चन्द्रसूर्यमूलविमानागमनं ६, हरिवंशकुलोत्पत्तिः ७, चमरेन्द्रोत्पातः ८, एकस्मिन् समयेऽष्टाधिकशतमुक्तिगमनं ९, असंयतिपूजा १०,

एतानि दश वस्तूनि अनन्तकाले गते सति भवन्ति । बहवो लोकाः क्रोधवन्तो भविष्यति, पुनर्दुःषमकालप्रभावतो लोका मर्यादां त्यक्ष्यन्ति, धर्मबुद्धेर्नाशो भविष्यति, लोका वक्रा मूर्खाश्च भविष्यन्ति, यथा कालहीनता भविष्यति तथा कुतीर्थे मतिं धारयिष्यन्ति, पुनर्लोकाः परोपकार-धर्मवर्जिता भविष्यन्ति, महान्ति नगराणि ग्रामसदृशानि भविष्यन्ति, ग्रामाः श्मशानसदृशा भयङ्करा भविष्यन्ति, राजानः प्रजापालने यमसदृशा भविष्यन्ति, पुनर्हे **गौतम** ! धनवन्तो व्यवहारिणो निर्धना भविष्यन्ति, पुनर्देवा दर्शनं न दास्यन्ति, मनुष्याणां जातिस्मरणज्ञानादीनि न भविष्यन्ति, मनुष्या लज्जामर्यादारहिता भविष्यन्ति, पृथिव्यां दुष्टजीवा बहवो भविष्यन्ति, पुनर्लोकाः परस्परं विघ्नं दृष्ट्वा संतोषं प्राप्स्यन्ति, लोकानां पापकरणे चत्वारो हस्ता भविष्यन्ति, पुनर्धर्मकार्येऽलसाः प्रमादिनश्च भविष्यन्ति, आत्मनः कार्ये लोकानामुदरमध्ये प्रवेशं करिष्यन्ति, पुनर्हे **गौतम** ! परजीवानामुपद्रवकरणे तत्परा भविष्यन्ति, पुनः पञ्चमकालसम्बन्धिनो जीवा महानिर्दया भविष्यन्ति, महादीर्घरोष-धारका भविष्यन्ति, भद्रकजीवान् विप्रतारयिष्यन्ति, धर्ममूर्तिमन्तः स्तोका भविष्यन्ति, पापानामाकराः स्थाने स्थाने बहवो भविष्यन्ति, अत्यन्तलोभवन्तो भविष्यन्ति, मिथ्यात्विनोऽभिमानिनोऽनाचारिणोऽन्यायिनश्च लोका बहवो भविष्यन्ति, पुनर्हे **गौतम**! कुलवध्वो लज्जामर्यादारहिता भविष्यन्ति, वेश्यासमानाश्च भविष्यन्ति, राजाभृत्येभ्यो दण्डं दास्यति, पृथिव्यां तिमिङ्गलन्यायो भविष्यति, चौरकुले जाताश्चौरा भवन्ति परं राजानोऽपि चौरसदृशा भविष्यन्ति, लोकानां धनमपहरिष्यन्ति, लोकान् दरिद्रिणः करिष्यन्ति, पुनर्हे **गौतम** ! पञ्चमकालमध्ये लोकानामग्निर्बह्वीं पीडां करिष्यति, गोप्रमुखाणां जीवानां बहुवधो भविष्यति, जिनालयाः पतिष्यन्ति, पुनर्दुःखदारिद्र्योपद्रवमलोत्सर्गमारीप्रमुखैः कृत्वा धरित्री शून्या भविष्यति, देशो भङ्गं यास्यति, लोकाः सर्वे प्रेतसदृशा भविष्यन्ति, राजलोका लुब्धा भविष्यन्ति, पुनरविवेकिनो लोका मूर्खाः कलाहीनाश्च भविष्यन्ति, दातारो दारिद्र्ययुक्ता भविष्यन्ति, लक्ष्मीधराः कृपणा भविष्यन्ति, पापिनो दीर्घजीवा भविष्यन्ति, उत्तमधर्मिणामायुः स्तोकं भविष्यति, राज्ञां कुलानि हीनानि भविष्यन्ति, पुनः सेवका उत्तमकुलवन्तो भविष्यन्ति, सज्जना मनुष्या दुःखिनो भविष्यन्ति, दुर्जना मनुष्याः सुखिनो भविष्यन्ति, एवं हे **गौतम** ! पञ्चमकालस्य स्वरूपं त्वं जानीहि ।

पुनर्लोकाः कलियुगस्य स्वरूपमेवं वदन्ति-द्वापरयुगे राजा **युधिष्ठिरो**ऽभूत् ,

एकस्मिन् दिने स वने गतः, तत्र वने एका बृहती गौः लघुगोस्तनपानं कुर्वती दृष्टा, स्वसमीपे ब्राह्मणमिति पप्रच्छ-इदमाश्चर्यं विपरीतं पश्य, तदा ब्राह्मणो वदति-हे राजन्! आगामिकाले कलियुगमध्ये हीनसत्त्वा मनुष्या भविष्यन्ति, लक्ष्मीं विना दुःखिनौ सन्तौ मातापितरौ कस्मैचित् धनवते कन्यां दत्त्वा धनं लात्वा ततः पश्चात् स्वनिर्वाहं करिष्यतः, एतादृशमुपनयं श्रुत्वा पुनः राजा **युधिष्ठिरो**ऽग्रे गतः, पुरतः समानश्रेणिबद्धजलभृतानि त्रीणि सरांसि दृष्टानि, तत्र प्रथमैकसरसो जलमुच्छलन् मध्यस्थं तटाकं त्यक्त्वा तृतीयसरसि पतति, मध्यस्थसरसि एकबिन्दुमात्रमपि न पतति, एतादृशमाश्चर्यं दृष्ट्वा राजा ब्राह्मणं पृच्छति इदं किं कारणम्? ब्राह्मणो वक्ति-हे राजन्! त्वं श्रृणु-आगामिकाले यथा प्रथमसरसो जलं द्वितीयं तटाकं त्यक्त्वा तृतीये पतितं तथा हे राजन्! स्वस्य सम्बन्धिनं त्यक्त्वा अन्यलोकैः सह जनाः प्रीतिं करिष्यन्ति। पुनः राजा युधिष्ठिरोऽग्रे गच्छन्नेकमाश्चर्यं पश्यति जलेन क्लिन्नं वालुकासमूहं तस्य बहवो मनुष्याः संभूय रज्जूः कुर्वन्ति परं रज्जूः त्रुटति यत्ने कृतेऽपि न तिष्ठति, एतादृशं व्यतिकरं दृष्ट्वा राजा ब्राह्मणं पृच्छति, ब्राह्मणो वक्ति-हे राजन्! कृषिकारकलोका बहुभिः क्लेशैः कलियुगे धनमुपार्जयिष्यन्ति, तद् धनं चौराऽग्निराजदण्डप्रमुखस्य भयेन मनुष्याणामन्यत्र गमने कृतेऽपि विनाशं यास्यति, पुनः राजा **युधिष्ठिरो**ऽग्रे गतः सन् कूपप्रणालिकाजलं कूपे पतत् दृष्ट्वा विस्मयं प्राप्तः सन् पृच्छति, तदा ब्राह्मणो वक्ति-हे राजन्! कृषिवाणिज्यादिभिर्महाक्लेशात् लोका धनमुपार्जयिष्यन्ति तद् धनं सर्वं राजलोका ग्रहीष्यन्ति, सद्युगे राजानः स्वस्य धनं दत्त्वा प्रजां पुत्रवत् ज्ञास्यन्ति कलियुगे राजानः प्रत्युत प्रजाया धनं लास्यन्ति इति वैपरीत्यं भविष्यति। राजा-अग्रे गतः। अग्रे गच्छन् वनखण्डमध्ये महाप्रधानचम्पकवृक्षावृतः पार्श्वतः एकः कण्टकवृक्षो दृष्टः, तदवसरे बहवो लोकाः कण्टकवृक्षस्य सुगन्धचोवाचन्दनविलेपनैः पूजां कुर्वन्तो दृष्टाः, चम्पकवृक्षस्तु सुगन्धपुष्पैर्युक्तः शाखाप्रतिशाखाभ्यां शोभमानोऽस्ति, तं त्यक्त्वा कण्टकवृक्षमर्चितं दृष्ट्वा राजा विस्मयं प्राप्तः सन् ब्राह्मणं पृच्छति, ब्राह्मणो वक्ति-हे राजन्! लोकाः कलियुगे गुणवन्तमुत्तमाचारवन्तं त्यक्त्वा पापीयसो दुर्जनस्य नीचस्य पूजां करिष्यन्ति, एतादृशं श्रुत्वा राजाऽग्रे गतः पुरतः एकां महतीं शिलां बालाग्रे बद्धामाकाशे लम्बायमानां दृष्ट्वा आश्चर्यं प्राप्तः सन् ब्राह्मणं पृच्छति, तदा ब्राह्मणो वक्ति-हे राजन्! कलियुगे पापरूपां शिलामल्पधर्मरूपवालाग्रेण तरिष्यन्ति, अन्यच्च यदा बालरूपं धर्मं त्रोटयिष्यन्ति तदा

समकालं मनुष्या ब्रुडिष्यन्ति । पुनः राजाऽग्रे गतः फलार्थं वृक्षस्य पीडां कुर्वन्तः केचिद् पुरुषा दृष्टा इति व्यतिकरं दृष्ट्वा राजा ब्राह्मणं पृच्छति-एतस्य फलं वद, ब्राह्मणो वक्ति-हे राजन् ! कलियुगे पिता वृक्षतुल्यः पुत्रः फलसदृशः-अयमत्र भावार्थः-पुत्रफलार्थवृक्षः पिता कष्टं सहिष्यति, पुनः राजाऽग्रे गतः एकस्मिन् स्वर्णकटाहे उत्तमान्नपाचनयोग्ये मांसं पच्यमानं दृष्ट्वा राजा ब्राह्मणं पृच्छति, ब्राह्मणो वदति-हे राजन् ! आत्महितकारिणं कुटुम्बं जनाः त्यक्ष्यन्ति, अन्यलोकार्थं स्वशीर्षं दास्यन्ति, बह्वीं प्रीतिं करिष्यन्ति उत्तमजनसङ्गं न करिष्यन्ति, अग्रे गत्वा सर्पस्य पूजां गरुडस्य चापूजां दृष्ट्वा ब्राह्मणं पृच्छति, विप्रोऽवादीत्-हे राजन् ! दयारहितो धर्मिजनः सर्पतुल्यः तस्य बहवो लोका आदरं करिष्यन्ति, सत्कारं च करिष्यन्ति, गरुडसदृशा गुणवन्त उत्तममहाधर्मज्ञास्तेषां निन्दां करिष्यन्ति, पुनरग्रे गच्छता वने एकस्यां शकट्यां हस्तिनौ योजितौ दृष्टौ, एकस्यां शकट्यां गर्दभौ योजितौ दृष्टौ परं हस्तिनौ परस्परममिलितौ चलतः गर्दभौ परस्परं मिलितौ चलतः, एतादृशं विचारं दृष्ट्वा राजा ब्राह्मणं पृच्छति ब्राह्मणो वदति हे राजन् ! कलियुगे हस्तिसदृशा उत्तमकुले प्रसूता जनाः परस्परं क्लेशं करिष्यन्ति अन्योऽन्यमीर्ष्यां च करिष्यन्ति, पुनर्गर्दभसदृशा नीचकुलोत्पन्ना नीतिधारका भविष्यन्ति परस्परं स्नेहवन्तो भविष्यन्ति, प्रायेण अन्त्यकुलोत्पन्ना धरित्रीपतयो भविष्यन्ति, पुनर्हंससदृशा उत्तमकुलोत्पन्नाः दासत्वं करिष्यन्ति । अन्यदा पञ्च पाण्डवा अनुक्रमेण वनवासमध्ये स्थिताः सन्तो **युधिष्ठिर**राज्ञा **भीमा**दीनां चतुर्णां भ्रातॄणां चतुर्षु प्रहरेषु रात्रौ यामिकत्वेन रक्षिताः, अथ प्रथमप्रहरे **भीमो** जागर्ति चत्वारो भ्रातरः सुप्ताः सन्ति तस्मिन् प्रस्तावे कलिरूपपिशाचस्य वचनं श्रुत्वा **भीमः** क्रोधभाग् बभूव पिशाचरूपकलेर्मारणार्थं धावितः, कलिना सह **भीमो** युद्धमकार्षीत् , क्रोधेन रक्तनेत्रे कृत्वा लीलया प्रेतरूपकलिना बलवान् **भीमो** निर्जितः, द्वितीयप्रहरे युद्धं कृत्वा कलिना**ऽर्जुनो**ऽपि जितः, तृतीयप्रहरे **नकुलो**ऽपि जितः, चतुर्थप्रहरे **सहदेवो**ऽपि जितः, अथ चत्वारोऽपि भ्रातरः पराजयं प्राप्ताः सन्तः सुप्ताः सन्ति, अस्मिन्नवसरे पश्चिमरात्रे **युधिष्ठिरो** जागृतवान् तदा कलिरूपपिशाच आगत्य **युधिष्ठिरं** वदति, हे राजन् ! भवतः पश्यतो भवद्भ्रातरं मारयिष्यामि, एतादृशं प्रेतवचनं श्रुत्वा राजा युधिष्ठिरः किञ्चिन्मात्रमपि क्रोधं न कृतवान् , प्रतिवचनमपि न दत्तवान् क्षमां कृत्वा स्थितः, क्षमा कीदृशी ? सर्वकल्याणकारिका सर्वसत्त्वप्रीति-जनिका सर्वधर्मप्रधाना एतादृशी क्षमा राज्ञाङ्गीकृता, तदा राज्ञ उपशमं दृष्ट्वा प्रेतः

शान्ति गतवान् राज्ञो मुष्टिमध्ये चागतः, भ्रातरः सर्वेऽपि उत्थिताः, तदा रात्रिसम्बन्धिनी सर्वाऽपि वार्ता **युधिष्ठिरेण** भ्रातृणामग्रे कथिता, राज्ञा मुष्टिमुद्घाट्य प्रेतः स्ववशवर्त्तिभूतो दर्शितः, क्षमाप्रभावतोऽयं वशवर्ती जातः, एतादृशा अष्टोत्तरशतदृष्टान्ता लौकिपुराणादावपि कलियुगवर्णने कथिताः । पुनर्हे **गौतम** ! कलियुगसम्बन्धिनां मानवानां मध्ये लज्जा न भविष्यति, निष्कलङ्ककुलजाताः स्तोका भविष्यन्ति, रम्यवस्तूनां धरित्र्यां हानिर्भविष्यति, लघवः सुताः तरुणाश्च मरणं यास्यन्ति, पुनर्मातरः पितरश्च अतिदीर्घायुषो भविष्यन्ति, ब्राह्मणाः शस्त्रधारका भविष्यन्ति, वेदपाठ-षट्कर्मवर्जिताश्च भविष्यन्ति, सुता मातापित्रोर्विनयं न करिष्यन्ति, पुत्रा मातापितृभ्यो दुःखं दास्यन्ति, वध्वः श्वश्रूणां विनयं न करिष्यन्ति, वधूः सर्पिणीतुल्या भविष्यति, श्वश्रूभिः कार्ये कथिते वधू रोषं कृत्वा सर्पिणीवत् प्रत्युत्तरवचनरूपं डङ्कप्रहारं दास्यति, श्वश्रूश्च कालरात्रीतुल्या वधूं हीलयिष्यति यथा जनानां कालरात्री दुर्लङ्घ्या भवति तथा श्वश्रूरपि वधूजनानां ताडनातर्जनादि कुर्वती दुर्लङ्घ्या ज्ञेया, अपूज्यलोकाः पूजां प्राप्स्यन्ति, अर्चायोग्या गुणवन्तो न पूजां प्राप्स्यन्ति, शिष्या गुरूणां विनयं न करिष्यन्ति, पुनर्गुरवोऽपि शिष्याणां हितशिक्षाद्युपदेशं न दास्यन्ति, पुनर्मन्त्रतन्त्रौषधिज्ञानरत्नविद्याधनायुःफलपुष्परसरूपसौभाग्यसंपत्तिसंहननबलयशःकीर्तिगुणशोभादीनि वस्तूनि पञ्चमारके हानिं यास्यन्ति, ज्ञानादिधर्मो हीनतां यास्यति, वस्तुमानादि विपरीतं जनाः करिष्यन्ति, धर्मे मूर्खत्वं भविष्यति, देवानां मध्ये देवत्वं न भविष्यति, सतीनां मध्ये सतीत्वं न भविष्यति, निःसङ्गानां मध्ये वैराग्यं न भविष्यति, तपस्विनः स्पृहायै तपस्यां करिष्यन्ति सत्यशौचतपःक्षमादिकानां हानिर्दिने दिने भविष्यन्ति, धरित्र्यामल्पफलादीनि भविष्यन्ति ।

पुनः प्रभुर्वक्ति-हे **गौतम** ! **सौराष्ट्रगुर्जर**देशस्य समीपे अनुक्रमेण **अणहिल्लपाटण**पुरे मन्निर्वाणात् एकोनसप्तत्यधिकषोडशशतवर्षे (१६६९) व्यतिक्रान्ते श्री**कुमारपाल**राजा भविष्यति, कीदृशः ? **चौलुक्य**कुलमध्ये चन्द्रसदृशो महाबलवान् अखण्डजिनाज्ञाधारको भविष्यति, पराक्रमेण, दानेन, कीर्तिगुणेन, न्यायेन, विवेकेन, धैर्येण, राज्यलीलया सत्त्वगुणेनाद्वितीयो भविष्यति । उत्तरदिशायां **यवन**देशं यावत् , पूर्वदिशि **गङ्गा**पर्यन्तं, दक्षिणदिशि पश्चिमदिशि च समुद्रपर्यन्तं देशान् साधयिष्यति, एकादश शतानि हस्तिनः तस्य भविष्यन्ति, अयुतप्रमाणा रथा भविष्यन्ति, एकादश लक्षाणि तुरङ्गाणां भविष्यन्ति, अष्टादश लक्षाः पदातयो

भविष्यन्ति स श्री**कुमारपाल**राजा कस्मिंश्चित् समये **वज्र**शाखायां **मुनिचन्द्र**कुलोत्पन्नं श्री**हेमचन्द्रसूरिं** प्रतिवन्दिष्यति, आचार्यमुखाद् धर्मोपदेशं श्रुत्वा सम्यक्त्वसहितं श्रावकद्वादशव्रतमङ्गीकरिष्यति, देवगुरुप्रणतिं विना भोजनं न करिष्यति, दृढव्रत-पालको, भविष्यति, पृथिवीं जिनप्रसादमण्डितां करिष्यति, एकस्मिन् प्रस्तावे श्री**हेमचार्य**मुखात् व्याख्याने श्रीतीर्थानां व्याख्यां श्रोष्यति, तत्र **जीवितस्वामि**मूर्तेः सम्बन्धं श्रुत्वा **वीतभय**पत्तनमार्गे दुर्गकारापणे श्री**जिनप्रति**मां मनुष्येभ्यः प्रकटं कारयिष्यति, तां प्रतिमां पत्तने जिनालये स्थापयिष्यति शुभबुद्ध्या मानयिष्यति, ततः प्रतिमार्थं यदु**दायि**राज्ञा ग्रामादिदत्तमभूत् तत् प्रकटीभविष्यति, तावन्तं ग्रामशासनादिकं **कुमारपालो**ऽपि दास्यति, सदैवार्चां करिष्यति, सदैव जिनं वन्दिष्यति, स्वदारसंतोषी भविष्यति, वर्षाकालमध्ये त्रिविधं शीलं पालयिष्यति, कदाचिद् मनसः शीलभङ्गो भविष्यति तर्हि उपवासादि करिष्यति, पुनरष्टादशदेशेऽमारिपटहं दास्यति, वर्षाकाले सेनासमूहं न करिष्यति, जीवरक्षादक्षो भविष्यति, अर्हन्मतभक्तिमान् भविष्यति, शुद्धसम्यक्त्वव्रतधारको भविष्यति, पञ्चमकाले श्री**कुमारपालं** विना अन्यः को भविष्यति ? । पुनर्हे **गौतम** ! पञ्चमारके कलहकारका भववृद्धिजनका असमाधि-स्थाना अनिर्वेदकारका एतादृशाः श्रमणाः पञ्च**भरतैरवते** च भविष्यन्ति, पुनस्ते श्रमणा मन्त्रतन्त्रयन्त्रादौ नित्यमुद्यमवन्तो भविष्यन्ति, पुनरागमार्थज्ञाता स्तोका एव स्थास्यन्ति, सिद्धान्तशास्त्रस्य कश्चिदेवाभ्यासं करिष्यन्ति, धनलोभार्थं ज्योतिष्कादिकं धारयिष्यति, उपकरणवस्त्रपात्रार्थं वर्षाकाले श्रावकैः सह युद्धं करिष्यति, यथा राजा प्रजापार्श्वे कलहं कृत्वा दण्डं लास्यति तथा तेऽपि साधवः श्रावकपार्श्वे धनादिग्रहणं करिष्यन्ति, बहवो मुण्डा अल्पाः श्रमणाश्च भविष्यन्ति, पुनर्हे **गौतम** ! पञ्चमकाले म्लेच्छराजानो बलवन्तो भविष्यन्ति, उत्तमराजानो हीनबला भविष्यन्ति, पुनर्हे **गौतम** ! म्लेच्छकुले **पाटलीपुर**पत्तने **कलङ्की** *राजा भविष्यति, पुनः **पाटली**नगरस्य **रुद्र**नाम पुनश्च**तुर्मुख** इति नाम स्थापयिष्यति । **जस**नामचाण्डालस्य गृहे भार्या **यशोदा** तत्कुक्षौ त्रयोदश मासान् यावद् **कल्कि**गर्भः स्थास्यति, चैत्रशुक्लाष्टम्यां जयश्रीदिवसस्य रात्रिसमये मकरलग्नस्य षष्ठांशे वहमाने भौमवासरे चन्द्रेऽर्कलग्ने स्थिते चन्द्रनामयोगे आगते

---

* पञ्चमारके धर्मोन्नतिकारका त्रयोविंशतिः उदयाः भविष्यन्ति तेषु च चतुरधिकद्वि-सहस्त्रयुगप्रधाना भविष्यन्ति तथा सम्प्रति तृतीयोदयो वर्तते परं च अष्टमोदये **श्रीप्रभ**युगप्रधानसमये **कलङ्की** राजा भविष्यति, इति ज्ञेयम् ।

D:\chandan/new/kalp-2/pm5\3rd proof

अश्लेषाप्रथमपादे **कलङ्किनो** जन्म भविष्यति, त्रिहस्तशरीरोन्नतत्वं भविष्यति, कपिलवर्णाः केशा मस्तके भविष्यन्ति, नेत्रे पीते भविष्यतः, तीक्ष्णस्वरो भविष्यति, महाविद्यावान् दीर्घहृदयो गुणरहितश्च भविष्यति, तस्योत्पत्तेरारभ्य पञ्चमे वर्षे उदरपीडा भविष्यति, सप्तमे वर्षेऽग्निपीडा भविष्यति, एकादशे वर्षे तस्य द्रव्यप्राप्तिः भविष्यति, अष्टादशे वर्षे कार्तिकमासे शुक्लपक्षे प्रतिपदि तिथौ शनिवारे तुलाचन्द्रे स्वातिनक्षत्रे नन्दनदिने सिद्धयोगे बवकरणे रावणमुहूर्ते राज्याभिषेको भविष्यति, तस्य आनन्दनामा तुरङ्गमो भविष्यति, दुर्भासकनामा कुन्तो भविष्यति, मृगाङ्कनामा मुकुटो भविष्यति, दैत्यसूदनखड्ग भविष्यति, तस्य कटिप्रदेशे चन्द्रसूर्यौ भविष्यतः पुनः **कल्की विक्रमादित्य** संवत्सरमुत्थाप्य अमितसुवर्णदानात् स्वसंवत्सरं स्थापयिष्यति, एकोनविंशतितमे वर्षे निजभुजबले**नार्धभरत**त्रिखण्डं साधयिष्यति, सार्धविंशतिवर्षे **अर्बुद**राज्ञः पुत्रीं परिणेष्यति, अन्यासां बह्वीनां राज्ञीनां पतिर्भविष्यति, एवं ताभिः सह महाभोगे भुञ्ज्यमाने तस्य महापराक्रमधारिणश्चत्वारः पुत्रा भविष्यन्ति, तन्नामान्याह– **दत्त १ विजय २ मुञ्ज ३ अपराजिता**ख्याः ४ **कल्किनः पाटलीपुरे** राजधानी भविष्यति, तस्य **पाटलीपुर**स्य **कलङ्किपुर**मिति द्वितीयं नाम भविष्यति, **दत्त**स्य प्रथमपुत्रस्य **राजगृहे** राजधानी भविष्यति, तस्य नगरस्य **दत्तपुरं** नाम भविष्यति, **विजयस्याणहल्लपत्तन**स्य राजधानी भविष्यति, **अणहल्लपत्तन**स्य द्वितीयं नाम **विजयपुरं** भविष्यति, **मुञ्जस्योज्जयिनी**देशं दास्यति, **अपराजित**स्यान्यमण्डलं दास्यति, **कल्किनो** राज्यावसरे म्लेच्छक्षत्रिययो रुधिरेण पृथिवी स्नानं करिष्यति, तस्यैकोनकोटिसुवर्णानां कोष्ठागारा भविष्यन्ति, चतुर्दशसहस्रप्रमाणा हस्तिनो भविष्यन्ति, सार्धचतुर्दशसहस्राधिकसप्ताशीतिलक्षा (८७१४५००) घोटका भविष्यन्ति, पञ्चकोटिप्रमाणाः पदात्तयो भविष्यन्ति, दासादीनां तु बह्वीः संख्या भविष्यन्ति, नभः खलनाम त्रिशूलं भविष्यति, दृषन्मयतुरङ्गमः आरोहणार्थं वाहनं भविष्यति, दुरात्मा अत्यन्तकषायो भविष्यति, यदा **कल्की** राज्यं करिष्यति, तदा **मथुरा**मध्ये **कृष्ण-बलभद्र**योरायतनं पतिष्यति, बहुडमरदुर्भिक्षरोगैर्मनुष्याः पीडां प्राप्स्यन्ति पञ्चसु स्तुम्भिकासु बहु धनमस्तीति लोकानां मुखात् श्रुत्वा **आनन्द**राज्ञा निष्पादिताः पञ्च सुवर्णमयीः स्तुम्भिकाः **कल्की** खनयिष्यति, सर्वनिधानं निष्कासयिष्यति, तत्र गोरूपा **लवणदेव्या** मूर्तिः दृषन्मयी प्रकटीभविष्यति तां गृहीत्वा राजादिप्रमुखाः सर्वलोकाः सम्भूय नगरचतुष्पथमध्ये स्थापयिष्यन्ति,

D:\chandan/new/kalp-2/pm5\3rd proof

कदाचिदवसरे साधवो गौचर्यर्थं चतुष्पथमध्ये निसरिष्यन्ति, सा साधून् दृष्ट्वा देवानुभावतः शृङ्गाग्रेण साधूनां मारणार्थमुद्यमवती भविष्यति, तदा गीतार्थाः सर्वे साधव एकत्रीभूय विचारं करिष्यन्ति, अत्र जलोपसर्गः प्रचुरो भविष्यति इति ज्ञात्वा सुविहितक्रियाधारका ये साधवो भविष्यन्ति ते सर्वे विहारं करिष्यन्ति, ये भक्तपानलोलुपा भविष्यन्ति गीतार्थवचनं नाङ्गीकरिष्यन्ति अविवेकिनः सन्तः तत्र स्थास्यन्ति, ततः सप्तदशाहोरात्रं यावत् वर्षा भविष्यति, अत्यन्तवृष्ट्या **कल्किनो** नरं जलाच्छादितं भविष्यति, **गङ्गा**जलं नगरेण सह एकत्रीभविष्यति, **कल्किनो** नगरात् प्रणश्य कुत्रापि उच्चस्थले स्थास्यति, जलोपद्रवनिवर्तनाद् नवीनं नगरं स्थापयिष्यति, जलप्रवाहतो नव **नन्द**स्य सुवर्णमय्यः डुङ्गरिकाः प्रकटीभविष्यन्ति, ता दृष्ट्वा प्रचुरलोभी भविष्यति, प्रथमं ये मनुष्याः करं न दत्तवन्तस्तेषां मस्तके करं करिष्यति, ये करं दत्तवन्तस्तेषां मस्तके बहुकरं करिष्यति, पुनर्नवीननवीनकरं करिष्यति ततो लोकानां मस्तकेऽसद्भूतानि कलङ्कानि दत्त्वा धनवतां धनं ग्रहीष्यति, अनेकच्छलं कृत्वा लोकानां धनापहारं करिष्यति, यदा सर्वे लोका निर्धना भविष्यन्ति रूप्य-सुवर्णादि सर्वं धनं नाशं यास्यति, तदा चर्ममयीं मुद्रां प्रवर्तयिष्यति, वैश्यपाखण्डि-सर्वदर्शनिनां समीपे **कल्की** करं लास्यति, तस्य राजमध्ये लोकानां गृहे भोजनार्थं धातुमयं भाजनं न स्थास्यति, तदा वृक्षपत्रमध्ये भोजनं करिष्यन्ति, पुनः **कल्की** राजा मार्गे गच्छतः साधून् दृष्ट्वा लुब्धः सन् भिक्षायाः षष्ठांशं मार्गयिष्यति, तदा सर्वे साधवः एकत्रीभूय कायोत्सर्गं करिष्यन्ति शासनदेवतां चाराधयिष्यन्ति, शासनदेवता प्रकटीभूय साधुभिक्षाषष्ठांशं निवारयिष्यति, पुनर्वेषधारिणो वेषं त्याजयिष्यन्ति एतादृशो महादुरात्मा भविष्यति, पुनः कियति काले गते भिक्षाषष्ठांशस्य स्मरणं करिष्यति, यदा धनार्थमाचार्यादीन् सर्वसाधून् संमेल्य वाटके क्षेप्स्यति रोधयिष्यति, तदा संविज्ञाचार्यप्रमुखाः ससङ्घाः शासनदेवताराधनार्थं कायोत्सर्गं करिष्यन्ति, सङ्घ-कायोत्सर्गात् शासनदेवता आगमिष्यति युक्तितः **कल्किने** उपदेशान् दास्यति तथापि स न मानयिष्यति, तस्मिन् समये इन्द्रस्यासनं कम्पयिष्यति तदा स वृद्धब्राह्मणरूपं कृत्वा यत्र **कल्की** सिंहासनोपरि स्थितस्तत्रागमिष्यति ततः **कल्किनं** कथयिष्यति-अहो राजेन्द्र ! एते निरपराधिनः साधवः किं रुद्धाः एभिस्त-वापराधः कः कृतः ? तदा **कल्की** तं वदिष्यति-अहो ब्राह्मण ! सर्वदर्शनिभिर्मम करो दत्तः परमेते भिक्षवो भिक्षाषष्ठांशमपि न ददति, ततो मया एते रुद्धाः सन्ति, तत इन्द्रो वदिष्यति-एषां

पार्श्वतस्तव किमपि न मिलिष्यति एषां पार्श्वे किमपि नास्ति पुनर्भिक्षाषष्ठांशमपि तव न दास्यन्ति एषामयं व्यवहारो नास्ति, पुनस्त्वं भिक्षाभागं मार्गयन् लज्जां न यासि एषां साधूनां त्वं त्यागं कुरु, इतरथा तव महत्कष्टमुत्पत्स्यति, एतादृशमिन्द्रवचनं श्रुत्वाऽपि न त्यक्ष्यति ततो भाद्रपदशुक्लाष्टम्यां ज्येष्ठानक्षत्रे इन्द्रो रोषं गतः सन् चपेटाप्रहारात् **कल्किनं** मारयिष्यति सर्वायुः षडशीति ८६ वर्षं प्रपाल्य नरकं यास्यति, ततोऽर्हद्धर्ममिन्द्रः शिक्षयित्वा **दत्त**नामानं **कल्किनः** पुत्रं राज्ये स्थापयिष्यति, गुरु-सङ्घयोर्नमस्कारं कारयिष्यति, इन्द्रः स्वस्थाने यास्यति, ततो **दत्त**राजा पितुः पापफलं ज्ञात्वा पुण्ये तत्परो भविष्यति, निरन्तरं जिनेश्वराणां चैत्यानि कारयित्वा सर्वपृथ्वीं जिनालयैः शोभायमानां करिष्यति, तदा पुनर्जिनधर्ममहिमा प्रचुरो भविष्यति ।

अथाग्रे पञ्चमकाले चतुर्विधश्रावक-श्राविका-साधु-साध्वीनां संख्या कथ्यते- षोडशसहस्राधिका एकादशलक्षा (१११६०००) राजानः पञ्चमकाले जिनमतभक्ता भविष्यन्ति, एककोटिमिता (१०००००००), जिनशासनप्रभावका मन्त्रिणो भविष्यन्ति, पुनः पञ्चमकाले श्री**सुधर्मस्वामि**प्रमुखाश्चतुरधिकद्विसहस्रप्रमाणा (२००४), युगप्रधानपदधारका महोपकारिण आचार्या भविष्यन्ति, तत्रापि **सुधर्म-जम्बू**स्वामिनौ तद्भवे एव मुक्तिं यास्यतः, शेषाः सर्वे एकावतारिणो भविष्यन्ति । ततो युगप्रधानसदृशा आचार्याः प्राणिनां मोहान्धकारेमार्तण्डसदृशाः षोडशाधिकैकादश-लक्षैकादशसहस्रामिता (११११०१६) एतावन्तो अन्येऽपि आचार्याश्चारित्रपालका भविष्यन्ति, पुनः पञ्चमारके तेतीस लाख चालीस हजार चारसौ उन्नीस (३३४०४१९) एतावन्तो मध्यमगुणधारका आचार्या भविष्यन्ति, पुनः पञ्चमारके पञ्चावनकोटि पञ्चावनलक्ष पञ्चावनसहस्र पञ्चशत पचवीस (५५५५५५५२५) अधर्माचार्या भविष्यन्ति, पुनः पञ्चावनलाखकोटि, पञ्चावनहजारकोटि चौवनसौकोटि चउमालीस-कोटि एतावन्त उपाध्याया वाचनाचार्या भविष्यन्ति, पुनः सत्तरलाखकोटि नवहजार-कोटि एकसौकोटि एकवीसकोटि एकलाख साठहजार एतावन्तः साधवो भविष्यन्ति, पुनः पञ्चमारके दशकोटाकोटि द्वादशशतकोटि बाणवेकोटि बत्तीसलाख निनाणवेहजार एकसौ एतत्प्रमाणाः साध्व्यो भविष्यन्ति, पुनः पञ्चमारके सोलाकोटिलाख तीनकोटी-हजार तीनसौकोडी सत्तरकोडी चौरासीलाख एतावत्प्रमाणाः श्रावकाः भविष्यन्ति, पुनः पञ्चमारके पैंतीसकोडिलाख बाणुहजारकोडि पांचसौकोडि बत्तीसकोडि

एतावत्यः श्राविका भविष्यन्ति, एतावत् पञ्चमारके सङ्घस्य प्रमाणम् । अत्र केचिदाचार्या एवं वदन्ति-पञ्च**भरतैरवतयोः** सङ्घस्य प्रमाणं न त्वेकस्य, केचिदाचार्याः पञ्च**भरत**स्य सङ्घप्रमाणं वदन्ति, केचित् पुनः एक**भरते** सङ्घप्रमाणं वदन्ति, तत्त्वं तु ज्ञानिगम्यम् । पुनः पञ्चमारकप्रान्ते द्विहस्तशरीरप्रमाणाः स्वर्गात् च्युत्वा गृहवासे द्वादश वर्षाणि, श्रामण्ये चत्वारि वर्षाणि, आचार्यपद चत्वारि वर्षाणि स्थित्वा विंशतिवर्षायुः प्रपाल्य **दुप्पसह**सूरयः सौधर्मस्वर्गे गमिष्यन्ति, कथम्भूता **दुप्पसह**सूरयः ? **दशवैकालिकजितकल्पावश्यकाऽनुयोगद्वारनन्दीसूत्र**धारका इन्द्रादिभिर्नताः । षष्ठोग्रतपोधारकाः प्रान्ते कृताष्टमतपसः एकसागरोपमायुः स्वर्गे भुङ्क्त्वा ततो **भरत**क्षेत्रे जन्मावाप्य मुक्तिं यास्यन्ति । वीसहजार नवसौ वर्ष, तीनमास, पांच दिन, पांच पहोर, एक घडी, दोपल, ४१ अक्षरोच्चार एतावत्कालप्रमाणो जिनधर्मो भविष्यति, ९० वर्ष, मास ८, दिन २३, प्रहर २, घटी ५॥, पलानि ५७, १९ अक्षरोच्चार एतावन्मध्ये जिनधर्मः स्तोकः स्थास्यति, आरकस्य प्रान्ते जिनधर्मो विच्छेदं यास्यति, श्रुत-सूरि-सङ्घ-धर्मः पूर्वाह्णे विच्छेदं यास्यति, नृपो **विमलवाहनः सुमुख**मन्त्री च मध्याह्ने विच्छेदं यास्यतः, अग्निः सन्ध्यायां विच्छेदं यास्यति, पुनः पञ्चमारकान्ते **दुप्पसहा**ख्यः सूरिः, **फल्गु**श्रीः साध्वी, **नागलः** श्रावकः, **सत्यश्रीः** श्राविका, एतदात्मकश्चतुर्विधसङ्घो भविष्यति, पञ्चमारकस्यार्वाग् धर्मो वर्त्स्यति इत्यनेन धर्मो नास्ति यः पुनर्वदिष्यति स सङ्घतो बहिः कर्तव्यः, एवमेकविंशतिसहस्रप्रमाणः पञ्चमारको भविष्यति । एतत्प्रमाणो षष्ठारकोऽपि भविष्यति ।

अथ षष्ठारकस्य किञ्चित् स्वरूपं कथ्यते-धर्मतत्त्वं प्रणाशं यास्यति, जनो हाहाभूतो भविष्यति, पशुवद् मातृपित्रादिव्यवस्थावर्जितश्च भविष्यति, बहुधूलिसहिता अतिनिष्ठुरा अनिष्टा वायवो वास्यन्ति, दिशश्च धूम्रं मोक्ष्यन्ति, चन्द्रमा अतिशीतं स्रावयिष्यति, अर्यमा अत्युष्णं तप्स्यति, अतिशीतोष्णव्याप्तो लोकः क्लेशमवाप्स्यति, **भस्म-दृषद-ऽग्निकण-क्षार-विष-मल-विद्युन्मयाः** सप्त मेघा वर्षिष्यन्ति, एकैकस्य मेघस्य सप्त सप्त दिनानि यावद् वर्षा भविष्यति, यैः कास-श्वास-शूल-कुष्ठ-जलोदर-ज्वर-शिरोऽर्तिप्रमुखा मनुष्याणां महारोगा भविष्यन्ति, अङ्गारसदृशा भूमिर्भविष्यति, गिरि-नदी-गर्तादिका जलेन समीभविष्यन्ति, जल-स्थलचारिणः तिर्यंचो दुःखेन स्थास्यन्ति, क्षेत्र-वनाऽऽ-रामलता-तरु-तृणानि क्षयं यास्यन्ति, **वैताढ्य-ऋषभकूट-गङ्गा-सिन्धूर्**विमुच्य जलेन सर्वे समा भविष्यन्ति,

**भरत**भूमिः कदाचिद् धूलिबहुला, कदाचिद् सार्द्रकर्दमा भविष्यति, एकहस्तमानाः, कठोराङ्गाः, दुष्टवर्णाः निष्ठुरवचनाः, रोगार्ताः, क्रोधिनः, घण्टावच्चिपटनासिकाः, निर्लज्जाः, वस्त्ररहिता नराः, स्त्रियश्च भविष्यन्ति, नराणां विंशतिवर्षायुः स्त्रीणां च षोडशवर्षायुर्भविष्यति, षड्वर्षा स्त्री गर्भान् धारयिष्यति दुष्प्रसवा च । स्थविरा तु षोडशाब्दा बहुसूतेन मातृका भविष्यति । रथचक्रयोर्मध्ये यत्प्रमाणा धरित्री भवति तत्प्रमाणं **गङ्गा-सिन्ध्वोः** पानीयं वहिष्यति, पुन**र्वैताढ्य**गिरौ द्वासप्ततिनद्युभय-तटभूमिषु बिलानि सन्ति तेषु मनुष्या निवासं करिष्यन्ति, नदीनां कूले नव नव बिलानि सन्ति तत्र तिर्यञ्चो मनुष्याश्च बीजमात्रतया भविष्यन्ति मांसाहारनिरताः, निर्घृणाः, निर्विवेकाः तस्मिन् काले मनुष्यादयः समस्ता भविष्यन्ति, बहुमत्स्य-कच्छपादिभिर्व्याप्ते **गङ्गा-सिन्धू** भविष्यतः, पुनर्नराद्यास्तत्रैत्य निशायां मत्स्यादीनि कृष्ट्वा स्थले मोक्ष्यन्ति, दिवा सूर्यत्विषा पक्वानि मत्स्यादीनि निशान्तरे खादिष्यन्ति, एवं निरन्तरं भोक्ष्यन्ति, यस्मात् तस्मिन् काले दध्यादिकं नास्ति, न च पुष्पफलादिकं, न चान्नं, न च शय्यासनादिकम् , एवं **भरतैरवते**षु दशस्वपि दुःषमकालो भविष्यति ।

अथाग्रे उत्सर्पिण्यां षष्ठारकसदृशः प्रथमारको भविष्यति, उत्सर्पिण्यामेकविंशति-सहस्रवर्षप्रमाणे प्रथमारके गते द्वितीयारकोऽपि एतत्प्रमाणो भविष्यति । अथ द्वितीयारकप्रान्ते **पुष्करावर्त**मेघः सप्ताहोरात्रं यावद् वर्षिष्यति तस्मात् पृथिवीतापो यास्यति, द्वितीयः **क्षीरोद**नामा मेघो वर्षिष्यति तस्माद् धान्यनिष्पत्तेर्योग्या भविष्यति, तृतीयो **घृतोदक**मेघो वर्षिष्यति तस्मात् पृथिवी सच्चिक्कणा भविष्यति, चतुर्थः **शुद्धोदक**मेघो वर्षिष्यति, तस्मादौषधिर्निष्पत्तिं यास्यति, यदा पञ्चमो **रसोदक**मेघो वर्षिष्यति, तस्मात् पृथिव्यां रसोत्पत्तिर्भविष्यति । एवं पञ्चत्रिंशतिदिनं यावद् मेघो वर्षिष्यति, तदा वृक्षौषधिलताधान्यप्रमुखाः स्वयं निष्पत्तिं यास्यन्ति । तान् दृष्ट्वा मनुष्या बिलेभ्यो बहिर्निःसरिष्यन्ति, **भरत**पृथिवी पुष्पफलादियुक्ताभूत् , तदा फलादीनि भक्षिष्यन्ति, अथः परं मासं न भक्ष्यम् । यथा यथा काल एष्यति तथा तथा रूपसंहननायूंषि धान्यादीनि च **भारते** वर्धिष्यन्ति, सुखा वाताः ऋतवः सलिलाश्च भविष्यन्ति, तिर्यञ्चो मनुष्याश्च गतरोगाः क्रमेण भविष्यन्ति, द्वितीयारकप्रान्ते मध्ये देशे **भरता**वन्यां सप्त कुलकरा भविष्यन्ति-तत्र प्रथमो **विमलवाहनः**, द्वितीयः **सुदामः**, तृतीयः **सङ्गमः**, चतुर्थः **सुपार्श्वः**, पञ्चमो **दत्तः**, षष्ठः **सुमुखः**, सप्तमः **समुचिः**, एते सप्त कुलकरा भविष्यन्ति । तत्र जातिस्मृतिपूर्वं **विमलवाहनो** राज्यहेतवे ग्रामान् ,

पुरादीनि च निवेशयिष्यति, राजा **विमलवाहनो** गोऽश्वादिसंग्रहं करिष्यति, शिल्पानि व्यवहारं लिपिर्गणितानि च व्यञ्जयिष्यति, दुग्धदध्यादौ शस्ये ज्वलने चोत्पन्ने सति हितकामी राजा प्रजानां रन्धनाद्युपदेशं दास्यति एतत्सर्वं द्वितीयारके भविष्यति । अथ तृतीयारकस्य नवाधिकाशीतिपक्षे गते सति **द्वारपुर**नगरे **समुचि**राज्ञो **भद्रा**यां महादेव्यां चतुर्दशस्वप्नसूचितो नन्दनः **श्रेणिक**जीव आदितीर्थकृत् **पद्मनाभा**भिधो जन्मादिना **महावीर**तुल्यो भविष्यति, कथम्भूतः **पद्मनाभः** ? सप्तहस्तशरीरोन्नतः काञ्चनवर्ण-कायः सिंहलाञ्छनो द्वासप्ततिवर्षायुः प्रथमतीर्थङ्करो भविष्यति, अतः परं पूर्ववत् प्रातिलोम्येन पूर्वार्हत्समा अमी सर्वे क्रमाद् जिनेश्वरा भविष्यन्ति, तत्र **श्रेणिक**राज्ञो जीवः **पद्मनाभो** जिनेश्वरः १, श्री**महावीरस्वामिनः** पितृव्यः **सुपार्श्व**जीवः **सूरदेवो** द्वितीयः जिनेश्वरः २, तृतीयो **कोणिक**नृपपुत्र उदायिनो जीवः **सुपार्श्वः** ३, **पोटिला**-ऽणगारस्य जीवः चतुर्थः स्वयम्प्रभः ४, **दृढायु**श्रावकस्य जीवः पञ्चमः **सर्वानुभूतिः** ५, **कार्तिक**स्य षष्ठोऽर्हन् **देवश्रुता**भिधः ६, सप्तमो **संवर**श्रावकस्य जीव **उदयाह्वयः** ७, अष्टमः **आनन्द**स्य जीवः **पेढाल** इति नामा ८, नवम **सुनन्द**स्य जीवः **पोट्टिला**-भिधः ९, दशमो **शतक**स्य जीवः **शतकीर्ति**नामा जिनेश्वरः १०, **देवकी**राज्ञीजीवः एकादशः **सुव्रता**भिधो जिनो भविष्यति ११, **कृष्णवासुदेव**स्य जीवः **अममा**ख्यो-ऽर्हन् द्वादशो भविष्यति १२, **सत्यकी**विद्याधरस्य जीवोऽर्हन् **निष्कषायः** त्रयोदशः १३, **बलभद्र**स्य जीवो **निष्पुलाक**श्चतुर्दशो भविष्यति १४, **रोहिणी**जीवो **निर्ममः** पञ्चदशो जिनः १५, **सुलसा**श्राविकाया जीव**श्चित्रगुप्तो** जिनः षोडशो भविष्यति १६, **रेवती**श्राविकाया जीवः **समाधि**नामा सप्तदशो जिनो भविष्यति १७, **शताली**-श्रावकस्य जीवः अष्टादशोऽर्हन् **संवरा**भिधः १८, **द्वीपायन**जीवः एकोनविंशोऽर्हन् **यशोधरः** १९, **कषाय**स्य जीवो **विजयो** विंशतितमः २०, एकविंशो जिनो **मल्लो** यः पुरा **नारदो**ऽभवत् २१, **अम्बड**स्य जीवो द्वाविंशो देवतीर्थङ्करः २२, त्रयोविंशः **श्राद्धरम**स्य जीवो**ऽनन्तवीर्यो** भविष्यति २३, **स्वाति**जीवश्चतुर्विंशो **भद्रकृ**न्नाम तीर्थङ्करो भविष्यति २४, एते आगामिकाले चतुर्विंशति तीर्थङ्करा भविष्यन्ति, एषामायुः कल्याणकान्तर-लञ्छन-वर्णाः पश्चानुपूर्व्या भविष्यन्ति, वर्तमानजिनवत् । अथ भाविनश्चक्रवर्तिनः कथ्यन्ते-**दीर्घदन्तः** १, **गूढदन्तः** २, **शुद्धदन्तः** ३, **श्रीचन्द्रः** ४, **श्रीभूतिः** ५, **श्रीसोमः** ६, **पद्मः** ७, **महापद्मः** ८, **कुसुमः** ९, **विमलः** १०, **विमलवाहनः** ११, **रिष्टः** इत्यपरनामा **भरतो** द्वादशः १२ । अथ वासुदेवानाह-**नन्दी** १,

D:\chandan/new/kalp-2/pm5\3rd proof

**नन्दमित्रः** २, **सुन्दरबाहुः** ३, **महाबाहुः** ४, **अतिबलः** ५, **महाबलः** ६, **बलः** ७, **द्विपृष्ठः** ८, **त्रिपृष्ठः** ९, इत्यात्मकाः । अथ प्रतिवासुदेवा उच्यन्ते-**तिलकः** १, **लोहजङ्घः** २, **वज्रजङ्घः** ३, **केशरी** ४, **बली** ५, **प्रह्लादः** ६, **अपराजितः** ७, **भीमः** ८, **सुग्रीवः** ९, इत्यात्मकाः । अथ बलदेवा उच्यन्ते-**जयः** १, **विजयः** २, **भद्रः** ३, **सुप्रभः** ४, **सुदर्शनः** ५, **नन्दः** ६, **नन्दनः** ७, **पद्मः** ८, **सङ्कर्षणः** ९, इत्यात्मकाः । एवमेते त्रिषष्टिशलाकाः* पुरुषा भविष्यन्ति, तेषां मध्ये एकषष्टिशलाकाः पुरुषास्तृतीयारके भविष्यन्ति, एकस्तीर्थङ्करः, एकश्चक्रवर्ती, एवं द्वौ चतुर्थारके भविष्यतः, द्वयोश्चतुर-शीतिपूर्वलक्षवर्षायुर्भविष्यति, ततः कल्पवृक्षोत्पत्तिर्भविष्यति सर्वे युगलिका भविष्यन्ति । पाश्चात्यचतुर्विंशतितमजिनस्याग्रतनप्रथमजिनस्याष्टादशकोटाकोटि-सागरोपमानामन्तरं भविष्यति । उत्सर्पिणी, अवसर्पिणीकाले एकत्रीकृते एकं कालचक्रं भवति, तानि कालचक्राणि अनन्तानि गतानि, पुनरस्मिन् **भरत**क्षेत्रे अग्रेऽनन्तानि कालचक्राणि भविष्यन्ति, एवं श्री**वर्धमानः** प्रभु**गौतम**स्य कालस्वरूपं निरूप्य समवसरणाद् निर्ययौ, **हस्तिपाल**नरेन्द्रस्य शुल्कशालायां च जगाम । स्वामी तद्दिनयामिन्याम् आत्मनो मोक्षं विदित्वा दध्यौ-अहो ! **गौतम**स्य मयि स्नेहोऽधिकः, य एवास्य महात्मनः केवलज्ञानान्तरायः, स छेद्य इति विज्ञाय **गौतम**मिति जगाद-अपरस्मिन् ग्रामे **देवशर्मा** द्विजोऽस्ति, स त्वया प्रतिबोधं प्राप्स्यति, तस्मात् तत्र हे **गौतम** ! त्वं गच्छ । हे स्वामिन् ! आदेशः प्रमाणमित्युक्त्वा प्रणम्य च **गौतम**स्तत्र गच्छति । अथ प्रभोः परिवारं वदति-स्वहस्तदीक्षिताः साधवश्चतुर्दशसहस्र(१४०००)-प्रमाणा अभूवन् , षट्त्रिंशत्सहस्र(३६०००)प्रमाणाः साध्व्यश्च सञ्जाताः, एकोनषष्टि-सहस्राधिकलक्ष(१५९०००)प्रमाणाः श्राद्धाश्च सञ्जाताः, द्विगुणाः (३१८०००)-श्राविका अभूवन् , चतुर्दशाधिकत्रिशत(३१४)प्रमाणाः चतुर्दश पूर्वधारिणो जाताः, त्रयोदशशत(१३००)प्रमाणा अवधिज्ञानिनो जाताः, सप्तशत(७००)वैक्रियलब्धि-धारिणोमुनयः सञ्जाताः, सप्तशत(७००)केवलिनः सञ्जाताः, पञ्चशत(५००)-विपुलमतयो सञ्जाताः, चतुःशत(४००)मिता वादिनः सञ्जाताः, अष्टशत(८००)मिता अनुत्तरवासिनः । एवं समस्तसाधुसाध्वीसहितः श्री**वीर**प्रभुः षष्ठतपोयुक्तः त्रिंशद्वर्षाणि गृहवासे तस्थौ, सार्धद्वादशवर्षाणि पक्षाधिकानि छद्मस्थावस्थायां स्थितः, त्रिंशद्-

* प्रत्यन्तरे त्रिषष्ठिशलाकाः पुरुषा नामान्तरेण अपि दृश्यन्ते तत्त्वं तु ज्ञानिनो विदन्ति ।

वर्षाणि यावत् केवलिपर्याये स्थितः, एवं द्वासप्ततिवर्षाणि आयुः प्रपाल्य **कार्त्तिका-ऽमावास्या**निशायाः पश्चिमे क्षणे **स्वाति**नक्षत्रे, द्वितीये **चन्द्र**संवत्सरे, **प्रीतिवर्धन**मासे, **नन्दिवर्धन**पक्षे, **उपशम**दिने, **देवानन्दा**नाम्न्यां रात्रौ, **सर्वार्थसिद्ध**मुहूर्त्ते, **नागे** करणे, पद्मासने स्थिते तुर्यारकान्ते एतत्समये इन्द्रासनं चकम्पे, अवधिज्ञानेन हरिः प्रभोर्निर्वाणकल्याणसमयं ज्ञात्वा आगच्छति, अत्यन्तमश्रुपूर्णाक्षो विषण्णश्च सन् हस्तौ संयोज्य वक्ति-

**गर्भे जन्मनि दीक्षायां, केवले च तव प्रभो ! ।**
**हस्तोत्तरं क्षणेऽधुना, तद्गन्ता भस्मको ग्रहः ॥१॥**

अतो हे स्वामिन् ! करुणानिधान ! एकक्षणमात्रमायुर्वृद्धिं स्वस्य कुरु, किं कारणम् ? भवतो जन्मराशेरुपरि भस्मग्रह आगतोऽस्ति स द्विसहस्रवर्षं यावत् स्थास्यति, अतो जिनशासनस्य पूजा प्रभावना मन्दा भविष्यति, तेन हेतुना आयुर्दीर्घं कुरुष्व, भवतो दृष्टिपाततस्तस्य तेजो निष्फलं यास्यति, तदा भगवान् वक्ति-हे इन्द्र ! एषा वार्ता कदाऽपि नाऽभूत् , न भवति, न चापि भविष्यति, यदायुर्दीर्घतरं भवति। पुनर्भाविपदार्थस्य नाशो नास्ति, तदुत्तीर्णे तु देवा अपि दर्शनं दास्यन्ति, विद्यामन्त्राणि चाल्पेन जापेन प्रभावं दर्शयिष्यन्ति, जातिस्मरणादिभावाः किञ्चित् प्रकटयिष्यन्ति, तदनन्तरमेकोनविंशतिसहस्रवर्षं यावद् जिनधर्मो वर्तिष्यति, दुःषमकालपर्यन्तम् , एवं कथयित्वा स्थितः, स्वस्य निर्वाणं समीपं ज्ञात्वा पुण्यफलविपाकानि पञ्चपञ्चाश-दध्ययनानि तथा पापफलविपाकानि पञ्चपञ्चाशदध्ययनानि च जगाद, तथा षट्त्रिंशद-पृष्टव्याकरणानि [उत्तराध्ययनसूत्राऽध्ययनानि] चाभिधाय **प्रधानं** नामाध्ययनं [मरुदेवाऽध्ययनं] जगद्गुरुरकथयत् , पुनः स्वामिनो मोक्षं समीपे विज्ञाय आसन-प्रकम्पतस्तत्र सुराऽसुरेन्द्राः सपरिच्छदाः सर्वेऽपि ईयुः ॥ अथ प्रभुः शैलेशीकरणं कृत्वा पञ्चह्रस्वाक्षरोच्चारमितकालेन तुर्येण ध्यानेन एरण्डफलवद् बन्धाभावाद् ऊर्ध्वगतिः सन् यथास्वभावऋजुगत्या मोक्षमुपाययौ । तस्मिन् समयेऽनुद्धरिककुन्थुराशिः समुत्पन्ना, तदा बहुसाधुभिर्विचारितम्-'अद्यदिनादारभ्य संयमो दुराराध्यो भविष्यति' इति ज्ञात्वाऽनशनं कृतम् , तस्मिन दिने नव**मल्लकि**-नव**लेच्छकि**जातीयाः **काशी-कोशल**देशपतयोऽष्टादश गणराजानः **अमावास्या**दिने उपवाससहिताः पौषधव्रत-मङ्गीकृतवन्तः तद्रात्रौ भावोद्योततीर्थङ्कररहितं दृष्ट्वा तै राजाभिः स्वकीयगृहाद्

रत्नान्यानाय्य द्रव्योद्योतः कृतः, पौषधः पारितः, यद्रात्रौ तीर्थङ्करो मुक्तिं गतस्तद्रात्रौ देवानां गमनागमनेन महानुद्योतः सञ्जातः, अस्मिन्नवसरे देवानां मुखाद् **वीर**प्रभोर्मोक्षगमनं श्रुत्वा श्री**गौतमस्वामी** मनसि चिन्तितवान्-"अहो ! भगवता मत्तश्छलं कृतं स्वस्य मुक्तिं ज्ञात्वा अहं दूरीकृतः, ज्ञातं भगवता मम पार्श्वे केवलज्ञानं मार्गयिष्यति, बालवत् कदाग्रहं करिष्यति, वस्त्राञ्चलं गृहीत्वा स्थास्यति, हे स्वामिन् ! मया ईदृग् लोभी त्वं न ज्ञातः, केवलज्ञाने दत्ते तु भवतां किमपि न न्यूनमभविष्यत्, हे स्वामिन् ! तवाहं परम-सेवकोऽभूवम्, मां निराशं त्यक्त्वा गतः, हे भगवन् ! महतामेषा वार्ता न युक्ता, हे प्रभो ! बलाद् भवतोऽहं केवलज्ञानं नालप्स्यम् भवता दत्तमेव केवलज्ञानमङ्ग्य-करिष्यम्, तदथापि हे स्वामिन् ! अस्मिन्नवसरे अन्तसमये स्वसमीपे रक्षणं युक्तमभूद्, अस्मिन्नवसरे मम प्रेषणं तव न युक्तम्, पुनर्हे प्रभो ! मम केवलज्ञानस्य तृष्णा नासीत्, भवतां दर्शनस्य तृष्णा जाताऽभूत्, अधुना तव दर्शनमपि मम दूरीभूतम्, हे स्वामिन् ! अथाहं कस्य **वीर** ! इति कथयिष्यामि, मम मनःसंदेहः कस्य समीपे पृच्छाविषये करिष्यामि, को मम सन्देहं भङ्क्ष्यति, हे स्वामिन् ! पुनर्मम हे **गौतम** ! हे **गौतम** ! इति कः कथयिष्यति" ? एवं विलापं कुर्वन् मनसि विचारयति-रे जीव ! वराक ! त्वं ग्रथिलो जातः, स तु नीरागी त्वं तु सरागी, वीतरागेण रागकरणं न युक्तम्, एकाङ्गिप्रीतिकरणे दीपे पतङ्गवद् दुःखी भविष्यसि, यस्य नाम वीतरागः स कस्मिन् रागं करोति, स भगवान् स्वस्य वीतरागं हि नाम सत्यं कृतवान्, अहमज्ञासिषं भगवान् मम नाम पुनः पुनः ब्रूते तर्हि ममोपरि रागं रक्षति, परमाश्विनमेघाडम्बरवद् अन्तं दत्त्वा गतः स क्व अहं क्व कस्य कोऽपि नास्ति, एवं मोहनीयं निराकृत्य क्षीणमोहं गुणस्थानकं गत्वा तत्कालमेव श्री**गौतम**स्य केवलज्ञानमुत्पन्नम्। अथ यद्रात्रौ प्रभुर्मुक्तिं गतः तद्रात्रौ भावोद्योतो गतः, ततो लोकैरुद्योतकरणार्थं स्वस्वगृहे रत्नमयी दीपमालिका कृता, तद्दिनाद् लोकमध्ये **दीपमालिका**पर्वणः प्रसिद्धिर्जाता। अथ यद्रात्रौ **वीर**प्रभुर्मुक्तिं गतः, तदा समस्तसङ्घ उद्विग्नः स्थितः, सङ्घस्य मुखाब्जं म्लानतां गतम्, तस्मिन् समये **गौतम**स्वामिनः केवलज्ञानमुत्पन्नं तदा समस्तोऽपि सङ्घो हृष्टो जातः । इन्द्रः प्रभोर्निर्वाणोत्सवं कृत्वा प्रभोर्देहसंस्कारं करोति, ततः केचिद् देवाः प्रभोर्दंष्ट्रां लात्वा गच्छन्ति, केचिद् देवा दन्तान् गृह्णन्ति, केचिद् भस्म गृह्णन्ति, शेषं क्षीरसमुद्रे प्रवाहयन्ति, पश्चात् प्रातःकाले **गौतमस्वामिनः** केवलज्ञानमहोत्सवं कृत्वा सर्वे देवाः सम्भूय **नन्दीश्वर**द्वीपेऽष्टाह्निकं महोत्सवं कृत्वा स्वस्मिन् स्वस्मिन् स्थाने गच्छन्ति । अथ

द्वितीयादिने **सुदर्शना** भगिनी शोकदूरीकरणार्थं **नन्दिवर्धनं** स्वगृहे भोजनं कारयति, तस्माद् एषा द्वितीया '**भाईबीज**' इति प्रसिद्धिं प्राप्ता । प्रथमं लोकै रत्नमया दीपाः कृताः पश्चाल्लोकै रूप्यमयाः कृताः । अथ पञ्चमकालप्रभावतो मृत्तिकामया दीपाः कुर्वन्ति । एव**मार्य-सुहस्ति**सूरिर्वक्ति-हे **सम्प्रते** ! इदं **दीपमालिका**पर्व सर्वेषामुत्तमं कथितम् , यथा वृक्षाणां मध्ये कल्पवृक्षः, देवानां मध्ये इन्द्रः, राज्ञां मध्ये चक्रवर्ती, नक्षत्राणां मध्ये चन्द्रमाः, तेजस्विनां मध्ये सूर्यः, सर्वधातूनां मध्ये सुवर्णम् , काष्ठमध्ये चन्दनम् , वनमध्ये नन्दनवनं तथा सर्वपर्वणां मध्ये **दीपमालिका**पर्व । अस्मिन् दिने श्री**वीर**-प्रभुर्मुक्तिं गतः, पुनः श्री**गौतम**स्य केवलज्ञानमुत्पन्नम् अतो हे राजन् ! इदं **दीपमालिका**पर्व सिद्धिदायकं भवतु ।

षण्नन्दवसुचन्द्राब्दे (१८९६), ज्येष्ठमासे सिते दले ।
चन्द्रघस्त्रे त्रयोदश्यां, साध्ययोगे हितावहे ॥१॥
दीपालिपर्वणो व्याख्या, गद्यबन्धेन निर्मिता ।
अपशब्दादिदोषश्चेत् , शोधनीयः सदा बुधैः ॥२॥
स्वच्छे खरतरगच्छे, श्री**सौभाग्य**गणाधिपे ।
धर्मराज्यं कलावर्ये, प्रकुर्वति सुविस्तरे ॥३॥
वाचनाचार्यवर्यस्य, **रामचन्द्र**गणेर्मुदा ।
शिष्येणाऽऽजिमगञ्जे च, चतुर्मासीस्थितेन वै ॥४॥
पाठको**मेदचन्द्रे**ण, **रायमल्ल**कवेर्मुदा ।
पठनार्थमिदं रम्यं, कृतं शुभतराशया ॥५॥ युग्मम् ।

## इति दीपमालिकाव्याख्यानं सम्पूर्णम् ॥

• • •

D:\chandan/new/kalp-2/pm5\3rd proof

### श्रीउपाध्यायगुणसागरगणिविरचितं

# दीपालिकाव्याख्यानम् ॥

सुरासुरनराधीश-वन्दितक्रमवारिजम् ।
वीतरागं जगत्सर्व-भावज्ञं मार्गदेशकम् ॥१॥
प्रणिपत्य **महावीरं,** सद्गुरुं **गौतमं** तथा ।
पूर्वसूरिकृता व्याख्या, वीक्ष्य **दीपालि**पर्वणः ॥२॥
स्वपरश्रेयसे स्वल्प-बुद्धिर्गुरुप्रभावतः ।
व्याख्यानं शिवकृत्कुर्वे, **वीर**निर्वाणपर्वणः ॥३॥

अस्मिञ्**जम्बूद्वीपा**भिधे द्वीपे **दक्षिणार्धभरते** समृद्ध्या स्वर्गसमानोज्जयिनी नाम्नी नगरी समस्ति तत्र गाम्भीर्यौदार्यशौर्यादिगुणगणाऽलङ्कृतः **सम्प्रति**नामा धरापालोऽभवत् । अन्यदा जिनदेवरथयात्राकृते सङ्घेन सह राजमार्गेण गच्छत **आर्यसुहस्ति**-सूरीन् वीक्ष्य जातजातिस्मरणः पृथ्वीपस्तत्र समागत्य भक्त्या च प्रणम्येति पृष्टवान् भगवन्तो यूयं मां जानीत ? तदाऽऽचार्याः प्रोचुः-पृथ्वीपते ! त्वां को न वेत्ति ? पुना राजा प्रोवाच-स्वामिन्नहं विशेषेणोपलक्षणं पृच्छामि तदा श्रुतोपयोगं दत्त्वाऽऽचार्या अवदन् राजंस्त्वं पूर्वभवेऽस्माकं शिष्यो बभूव तद् गुरूक्तं समाकर्ण्य गुरुज्ञानविस्मितो नृपोऽवोचत्-पूज्या ! भवतः प्रसादेन द्रमकेणाऽपि मया समृद्धमिदं राज्यं लब्धं ततो युयमिदं राज्यं गृहीत्वा मामनुगृह्णीत सूरयो जगदुर्हे धरापते ! स्वशरीरेऽपि गतस्पृहा वयं राज्यं गृहीत्वा किं कुर्मस्त्वयाऽपीदं राज्यं पुण्येन प्राप्तमतस्त्वं पुण्यकार्ये सततं प्रयत्नं कुरु पर्वणि विशेषेण । तन्निशम्य सञ्जातसंशयेन धरापालेन पृष्टं भगवन् ! जिनधर्मे सांवत्सरिकचातुर्मासिकादिपर्वाणि प्रख्यातानि सन्ति परमदो **दीपालिपर्व** सर्वत्र कुतः प्रवृत्तं तथाऽस्मिन् पर्वणि लोकाः श्रेष्ठानि वस्त्राणि भूषणानि च परिधाय पशु-

D:\chandan/new/kalp-2/pm5\3rd proof

वेश्मवृक्षादीन्नपि कस्माद्धूषयन्ति तच्छ्रुत्वा सूरयः प्रोचुः पृथ्वीपते ! श्रृणु-श्री**महावीर**जीवः **प्राणता**भिधदशमदेवलोकात् त्रिज्ञानयुतश्च्युत्वाऽऽ**षाढशुक्लषष्ठ्यां ब्राह्मणकुण्ड**ग्रामनगर **ऋषभदत्त**स्य विप्रस्य पत्न्या **देवानन्दा**याः कुक्षौ चतुर्दश-स्वप्नसूचितः समुत्पन्नो द्व्यशीतिवासरान्त **आश्विनकृष्णत्रयो**दश्यां वासवाज्ञया हरिणगमेषिणा **क्षत्रियकुण्ड**ग्रामनगरे **सिद्धार्थ**नृपस्य पत्न्या दृष्टचतुर्दशस्वप्नाया-**स्त्रिशला**देव्याः कुक्षौ गर्भपरावर्तं विधाय संस्थापितस्ततो दयालुना भगवता मदीय-चलनादिना मातुर्दुःखं भावीति विचार्य संलीनता कृता तदा जनन्यादिना महादुःखेना-क्रन्दादि कृतं । त्रिज्ञानवान् भगवान् तद्विज्ञायाङ्गस्फुरणं कृत्वेत्यभिग्रहं जग्राह-जननीजनकयोर्जीवतोर्मया दीक्षा न ग्राह्या, ततः क्रमेण **चैत्रशुक्लत्रयोदश्यां** शुभ-वेलायां समुत्पन्नो **मेरु**शिखरे वासवादिकृतस्नात्रमहोत्सवः प्रभुर्द्वितीयाचन्द्रवद् ववृधे । क्रमेण पित्रोः स्वर्गगमनात् पूर्णाऽभिग्रहो भुक्तभोगकर्मा **लोकान्तिक**देवज्ञापित-दीक्षावसरो दत्तसांवत्सरिकदानो देवनराधिपकृतदीक्षानिष्क्रमणमहामहो भगवान्-**मार्गशीर्षकृष्णदशम्यां** दीक्षां गृहीत्वा चतुर्थज्ञानं प्राप्तवांस्ततस्त्रयोदशपक्षाधिकद्वादश-वर्षाणि यावद् दुष्करं त्यक्ताशनचतुष्टयं विविधं तपः कृत्वा सोढदेवमनुष्यतिर्यक्कृत-दुःसहोपसर्गपरिसहो **वैशाखशुक्लदशम्यां** षष्ठतपा भगवाञ् **जृम्भिक**नगरीसमीप-स्थ**र्जुवालुका**भिधनदीतीरे **श्यामाक**कुटुम्बिनः क्षेत्रे **शाल**वृक्षस्याऽधः केवलज्ञानं लब्धवांस्ततस्तीर्थं प्रवर्तयित्वा पृथ्व्यां च विहृत्य भगवता भव्यजीवानामुपरि महानुप-कारः कृतो भगवत **इन्द्रभूति**प्रमुखा एकादशगणधराः सञ्जज्ञिरे, चतुर्दशसहस्राणि च साधवः, षट्त्रिंशत्सहस्राणि च साध्व्य, एकोनषष्ठ्यधिकैकलक्षं च श्रावका, अष्टा-दशाधिकत्रिलक्षाणि च श्राविकाः सञ्जज्ञिरे । प्रान्ते **मध्यमापापा**यां **हस्तिपाल**-धरापालस्य रज्जुसभायां चरमचातुर्मासीस्थितेन स्वायुः स्वल्पं जानता भगवता षोडश-प्रहरान् देशना दत्ता । तदा **पुण्यपाल**नृपः समागत्य भक्त्या च वन्दित्वा प्रोवाच-भगवन् ! मयैवंविधा अष्टौ स्वप्ना दृष्टाः, प्रथमस्वप्नेऽतिजीर्णशालासक्त**करीन्द्रो** दृष्टः । द्वितीये **प्लवङ्गम**श्चापल्यं कुर्वन् दृष्टः । तृतीये **क्षीरवृक्षो** बब्बूलवृक्षैः परिवृतो दृष्टः । चतुर्थे स्वच्छजलपूर्णवापीसरांसि त्यक्त्वा **काकाः** समलस्वल्पजलपल्वलेषु रक्ता दृष्टाः । पञ्चमे **मृतकेसरी** परश्वापदैरधृष्यो दृष्टः । षष्ठेऽवकरे **कमल**स्योत्पत्तिर्दृष्टा । सप्तम उषरभूम्यां **बीजवपनं** कुर्वन्कृषीवलो दृष्टः । अष्टमे **सुवर्णकुम्भा** मलमलीना दृष्टाः,

तदेतेषां फलं निवेदय । भगवता प्रोक्तं सावधानतया श्रृणु-प्रथमे स्वप्ने यत्त्वयाऽतिजीर्णशालासक्तः करीन्द्रो दृष्टस्तत्फलमेवं पञ्चमारके मातङ्गसदृशा गृहस्थाः क्रमेण दौर्भाग्यदरिद्रेष्टवियोगानिष्टसंयोगादिप्रभूतदुःखमयेऽतिजीर्णशालानिभे गृहवासे रक्ताः सन्तो वसिष्यन्ति न तूपदेशसहस्रैरपि दुःखघ्नां सौख्यप्रदां दीक्षाशालां सेविष्यन्ति कदाचित् केचित् कथञ्चन तां समादरिष्यन्ति तेष्वपि केचित्कुसङ्गतो भग्नपरिणामाः श्रद्धारहिताः सन्तोऽनादरेण व्रतं पालयिष्यन्ति केचिच्च दीक्षां त्यक्त्वा पुनर्गृहं गमिष्यन्ति निर्मलं चारित्रं तु केचिद्विरला एव पालयिष्यन्तीति । द्वितीयस्वप्ने यत्त्वया चापल्यं कुर्वन् कपिर्दृष्टस्तत्फलमेवं पञ्चमारके कपिसदृशचपलप्रकृतयः स्तोकसत्त्वाः केचिद् मुनयो ज्ञानक्रियातपःप्रभृतिष्वनादरा भविष्यन्ति विविधदोषांश्च सेविष्यन्ति ज्ञानक्रियातपःप्रसक्तान्सुमुनींश्च हसिष्यन्ति प्रबोधयितारं चाचार्यादिकमप्यवगणिष्यन्ति स्थिरप्रकृतयो धर्मधनार्जनपरास्तु विरला एव भविष्यन्त्येवं गृहस्था अपीति । तृतीयस्वप्ने यत्त्वया बब्बूलवृक्षव्याप्तः क्षीरवृक्षो दृष्टस्तत्फलमेवं पञ्चमारके क्षीरपादपसदृशाः सुश्रावका बब्बूलतरुतुल्यैः कुलिङ्गिभिश्छलनापरैश्चेर्ष्याक्रोधादियुक्तैः सुलिङ्गधारिपार्श्वस्थादिभिर्निरुद्धा भविष्यन्ति तैरेव च सुसाधुजनानां विहारवस्त्यादिभूमयः प्रतिरोत्स्यन्तेऽसहिष्णुतया च सुमुनिजनानां दोषान् कथयित्वा महत्वपूजासत्कारादिकं निवारयिष्यते ततो विरला एव विचक्षणा जिनवचनसुनिपुणा सुश्राद्धा जिनवचनपालनपराणां सुमुनीनां पूजनसत्कारादिकं करिष्यन्तीति । चतुर्थस्वप्ने यत्त्वया स्वच्छजलपूर्णवापीसरांसि त्यक्त्वा काकाः समलस्वल्पजलपल्वलेषु रक्ता दृष्टास्तत्फलमेवं पञ्चमारके स्वच्छजलपूर्णवापीसरस्तुल्यं विशेषज्ञानक्रियायुक्तं सम्प्रदायं गच्छं वा त्यक्त्वा ग्राह्याग्राह्यवस्तुज्ञानशून्याः काकतुल्याः केचिन्मुनयः समलस्वल्पजलपल्वलनिभं ज्ञानक्रियासदाचारतपःशिथिलं दोषसेवनभयवर्जितं सम्प्रदायं गच्छं वा गमिष्यन्ति यदि केऽपि ज्ञानक्रियादिप्रियाः सुसाधवो युष्माकमेतन्न युक्तमिति प्रेरणां करिष्यन्ति तर्हि तैः सह प्रभृतमत्सरा जडस्वभावास्ते द्वेषं करिष्यन्तीति । पञ्चमस्वप्ने यत्त्वया मृतकेसरी परश्वापदैरधृष्यो दृष्टस्तत्फलमेवं पञ्चमारके क्रमेण तपःसमुत्पन्नलब्धिजातिस्मरणज्ञानाद्यतिशयविकलं मृतकेसरिसदृग्जिनधर्मं पूर्वानुभावतः परश्वापदतुल्याः परतीर्थिका बुद्धिपूर्वकं न पराभविष्यन्ति किन्तु स्वमतिकल्पितविविधमतप्ररूपणकदाग्रहिणः स्वशासनोत्पन्ना एव कीटका इव भेत्स्यन्ति सारमेया इव च

परस्परं निन्दाऽऽक्षेपकलहादिना लघुतां नेष्यन्ति तद् दृष्ट्वा परयुथिका अपि जिनधर्मं निष्प्रभावं ज्ञात्वा पराभविष्यन्तीति । षष्ठे स्वप्ने यत्त्वयाऽवकरे कमलस्योत्पत्तिर्दृष्टा तत्फलमेवं यथा कमलस्योत्पत्तिः कमलाकरेषु श्लाघ्या तथा धर्मस्योत्पत्तिः सुकुलेषु श्लाध्या किं तु पञ्चमारके कालप्रभावेणावकरेषु कमलस्योत्पत्तिरिव हीननिष्प्रभाव-दुष्कुलेषु धर्मस्योत्पत्तिर्भविष्यतीति । सप्तमे स्वप्ने यत्त्वयोषरभूम्यां बीजवपनं कुर्वन् कृषीवलो दृष्टस्तत्फलमेवं पञ्चमारके कालानुभावेन मूढकृषीवलसदृशाः सत्पात्र-कुपात्रज्ञानविकला मूढजना उषरभूमितुल्यकुपात्रेषु सत्पात्रधियाऽऽहारादिदानवपनं करिष्यन्ति, सन्मार्गस्थितानाहारादिदोषवर्जनपरान् सुसाधून् हसिष्यन्ति प्रायेण च लोकानां कुपात्रेषु भक्तिदानसत्कारादिकं भविष्यतीति । अष्टमे स्वप्ने यत्त्वया स्वर्ण-कलसा मलमलीना दृष्टास्तत्फलमेवं पञ्चमारके कालप्रभावेण ज्ञानक्रियातपःप्रभृति-सद्गुणसुभासुराः प्रभासुरस्वर्णघटनिभाः सुसाधवः स्तोका भविष्यन्ति, किन्तु चारित्रदोषसेवनमलीना वेषधारिणो बहवो भविष्यन्ति, प्रभूतमत्सराश्च ते सुसाधुभिः सह कलहं करिष्यन्ति, लोके च सुसाधुकुसाधूनां समत्वं भावि कुसाधूनां च बलं वृद्धिं गमिष्यति, ततोऽवसरज्ञा गीतार्थसुसाधवः पार्श्वस्थादिवेषधारिभिः सह जलग्रथिल-लोकेन सह **पूर्ण**भूप**सुबुद्ध्य**मात्यवत् समत्वेन व्यवहरिष्यन्ति । तथाहि-

**पृथ्वीपुर्य**भिधानायां नगर्यां **पूर्णा**ख्यनृपतिरासीत् तस्य **सुबुद्ध्या**ख्येन मन्त्रि-णैकदा **लोकदेव**नामा नैमित्तिकश्रेष्ठ एवं पृष्टो भो नैमित्तिकवर ! किञ्चिन्निमित्तं प्रकाशय तदासौऽवदत् मासादनन्तरं यो घनाघनो वर्षिता तस्य वारि यः कोऽपि पास्यति स ग्रथिलो भविष्यति । ततः कियत्यपि काले याते सुमेघो वर्षिष्यति तत्पयःपानेन सर्वेऽपि स्वस्था भविष्यन्ति । नैमित्तिकोक्तं निशम्य समुत्पन्नाश्चर्यो-ऽमात्यो भूपतिपार्श्वं समागत्य तत्सर्वमवदत्तन्निशम्य नृपः पटहताडनपूर्वकं पयःसंग्रहणकृते मासादनन्तरं च भाविन्या वृष्ट्याः पयःपाननिषेधकृते लोकान् ज्ञापयामास । नृपाज्ञया सर्वे लोका जलसंग्रहं चक्रुस्ततो नैमित्तिकोक्तदिवसे मेघोऽवर्षत् पृथ्वीपालाज्ञया कोऽपि तत्पयो न पपौ, परं बहुषु वासरेषु गतेषु लोकसंगृहीतं पयो निष्ठां जगाम, ततो लोका भूपाज्ञामवगणय्य तद्वृष्टिवारि पपुस्तत्पयोनुभावतः सर्वे लोका ग्रथिलाः सञ्जाता, अनिष्ठितजलौ च नृपामात्यौ तद्वृष्टिवारि न पपतुस्तेन तौ ग्रथिलौ न सञ्जातौ । ग्रथिलीभूता सामान्ताद्या लोकास्तु

D:\chandan/new/kalp-2/pm5\3rd proof

स्वच्छन्दतया गच्छन्ति स्म हसन्ति स्म नग्नीभूय चाऽसमञ्जसाश्लीलादि वदन्तो नृत्यादिकां चेष्टां कुर्वन्ति स्म । एवंविधां चेष्टां कुर्वन्तस्ते स्वसमानां चेष्टामकुर्वन्तौ नृपामात्यौ दृष्ट्वैवं मन्त्रणां चक्रुरेतौ भूपालसचिवौ ग्रथिलौ सञ्जातौ, ततो भूपालसचिवस्थानानर्हावेतौ राज्यादुत्थाप्यावनयोः स्थाने चान्यौ स्थाप्यौ **सुबुद्धि**मन्त्री तैः कृतां तां मन्त्रणां श्रुत्वा राजानं समाचख्यौ, तन्निशम्य नृपतिरुवाचैतेभ्यो ग्रथिलेभ्यः स्वरक्षणं कथं कर्तव्यं तदा बुद्धिनिधिरमात्यः प्रोवाच-राजन् ! ग्रथिलैः सह ग्रथिलीभूयाऽऽवां तिष्ठेवस्तर्हि जीवेवोऽत्र जीवनस्याऽन्यः कश्चिदुपायो नाऽस्त्येतदेवसमयोचितं कर्म तदाकर्ण्य सामात्यः पृथ्वीपो ग्रथिलीभूय तैर्ग्रथिलैः सह चेष्टां कर्तुं लग्नः साम्राज्यलक्ष्मीं च ररक्ष। ततः कियत्सु वासरेषु गच्छत्सु सुवृष्टिः सञ्जाता तत्पयःपानतो लोकाः स्वस्थाः सञ्जातास्ततो धरापालामात्यौ प्रागिव राज्यं पालयाञ्चक्रतुरेवं भाविसुसमयकाङ्क्षिणो गीतार्थसुसाधवो वेषधारिपार्श्वस्थादिभिः सह सदृशीभूय व्यवहरिष्यन्तीति । भगवदुक्तं स्वप्नफलं समाकर्ण्य वैराग्यभावित-मानसः **पुण्यपाल**भूपालः ससाम्राज्यं सर्वसङ्गं त्यक्त्वा भगवत्पार्श्वे प्रव्रज्यां गृहीत्वा यथाविधि पालयित्वा शिवं ययौ ।

अस्मिन् विषये केचित् सूरिवरा कथयन्ति य**च्चन्द्रगुप्त**धरापालपृष्टो **भद्रबाहु**-स्वामी षोडशस्वप्नफलानि प्रोक्तवान् तथाहि-कदाचिदष्टमपट्टदिवाकरः श्री**भद्र-बाहु**स्वामी **पाटलिपुर**स्य **पाटलि**नामवनखण्डे समवसृतस्तन्निशम्य **पाटलि-पुरा**धिपतिः श्री**चन्द्रगुप्त**भूपः श्री**कोणिक**नृपवत् समागत्य गुरुं चाभिवन्द्य यथास्थानं च समुपविश्य प्रोवाच-भगवन् पाक्षिकपौषधोपवासयुक्तेन धर्मचिन्तां कुर्वता मया निशायाश्चरमे यामे एवंविधाः षोडश स्वप्ना दृष्टास्तेषां फलं कथय, तच्छ्रुत्वा **भद्रबाहु**स्वामिना प्रोक्तं-राजन् ! श्रुणु प्रथमस्वप्ने यत्त्वया कल्पपादपस्य शाखा भग्ना निरीक्षिता तेनाऽद्य-प्रभृति कोऽपि धरित्रीनाथो दीक्षां न स्वीकरिष्यति । द्वितीयस्वप्नेऽनवसर एव भास्करोऽस्तङ्गतो दृष्टस्तस्मात् केवलज्ञानमस्ततां गमिष्यति। तृतीयस्वप्ने यत्त्वया शशी शतच्छिद्रवानालोकितस्तस्मादेकस्मिन् धर्मे बहवः पन्थानो भविष्यन्ति । चतुर्थे स्वप्ने यत्त्वया भूता नृत्यं कुर्वन्तो निभालि-तास्तस्मान्मिथ्यामतयो जना भूतवत् नृत्यं करिष्यन्ति । पञ्चमे स्वप्ने यत्त्वया द्वादशफणाभृत्फणी प्रेक्षितस्तस्माद् द्वादशसंवत्सरान् यावद् दुष्कालं भविष्यति । तदा

**D:\chandan/new/kalp-2/pm5\3rd proof**

बहूनि सूत्राणि विच्छेदं गमिष्यन्ति, तदा केचिद् नि:सत्त्वा साधवो देवधनधारका भविष्यन्ति, ये तु सुसंयमवाञ्छका धीराः साधवस्ते तु दक्षिणाशायां **वलभ्यां** व्रजिष्यन्ति । षष्टे स्वप्ने यत्त्वया विमानं समालोकितं तस्माद् विद्याचारणजङ्घा-चारणमुनयोऽत्र नायास्यन्ति । सप्तमे स्वप्ने यत्त्वयाऽवकरे पद्मोत्पत्तिरालोकिता तस्माच्चतुर्वर्णानां मध्ये जिनधर्मो वैश्यवर्णे स्थास्यति, सूत्रश्रवणाध्ययनरुचिश्च स्तोकजनानां भविष्यति, मिथ्याधर्मसंसारवृद्धिकरग्रन्थश्रवणाध्ययनप्रियतां च बहुजनानां भविष्यति । अष्टमस्वप्ने यत्त्वया खद्योत उद्योतं कुर्वन्निरीक्षितस्तस्माद् मिथ्याधर्मो बहुजनैः पूजितः सत्कारितो भविष्यति, परं जिनधर्मस्य बहुपूजा-सत्कारादि न भविष्यति । नवमस्वप्ने यत्त्वया महासरोवरं शुष्कं विलोकितं तस्माद्यत्र यत्र भूम्यां श्रीजिनेश्वराणां कल्याणकानि सन्ति सा भूमी धर्मिजनविकला भविष्यति। दशमे स्वप्ने यत्त्वया हेमपात्रे पायसं भक्षयन् सारमेयो वीक्षितस्तस्मादुत्तमाश्रीर्हीनकुले यास्यति । एकादशे स्वप्ने यत्त्वया वानरोऽरण्यचरः करीन्द्रोपविष्टो विलोकितस्त-स्माद् दुर्जनाः सुखस्थिता भविष्य**न्तीक्ष्वाकु**वंशजाद्युत्तमकुलप्रसूतानां च प्रतिदिनं हानिर्भाविनी । द्वादशे स्वप्ने यत्त्वं मर्यादां मुञ्चन्तं रत्नाकरं दृष्टवान् तस्मात् पृथ्वीपाला अन्यायं करिष्यन्ति, क्षत्रियाश्चोत्पथं गमिष्यन्ति, कुलीनाश्च निर्मर्यादा भविष्यन्ति । त्रयोदशे स्वप्ने यत्त्वं महारथवाहकान् वत्सान् निरीक्षितवान् तस्माद् महारथनिभ-महाव्रतान् वोढुं प्रौढवयसो वृद्धाश्च नोत्सहिष्यन्ति, किन्तु वत्ससदृशा लघुवयसो महाव्रतमहारथान् वोक्ष्यन्ति, केचिद् वैराग्यभावपूर्वकं च संयमं गृहीत्वा प्रमादयुक्ता भविष्यन्ति । चतुर्दशे स्वप्ने यत्त्वं महार्घ्यं रत्नं तेजोहीनमपश्यस्तस्मात्तपोलब्धि-जातिस्मरणज्ञानादितेजोहीनो जिनधर्मो भविष्यति मुनयश्च निरतिचारचारित्रतेजोहीना असमाधिकरा भविष्यन्ति सुसाधवश्च स्तोका एव भविष्यन्ति । पञ्चदशस्वप्ने यत्त्वं भूपतितनुजं बलिवर्दारूढं समालोकितवान् तस्मादि**क्ष्वाकु**वंशादिश्रेष्ठवंशीया मिथ्या-दर्शनसेवनतत्परा भविष्यन्ति न तु जिनधर्मं सेविष्यन्ति । षोडशे स्वप्ने यत्त्वं मतङ्गजकलभयुग्मं युद्धं कुर्वद् दृष्टवान् तस्मात् साधवः परस्परं स्नेहहीना मत्सरिणः प्रत्यहं कलहं करिष्यन्ति, न च गुरुसेवापरा गुर्वाज्ञाकराश्च भविष्यन्ति । एवं श्री**भद्रबाहु**स्वामिकथितस्वप्नफलं निशम्य **चन्द्रगुप्त**धरापोऽनशनं स्वीकृत्य धर्म-ध्यानपूर्वकं देवलोकं ययौ । इति षोडशस्वप्नवृत्तान्तः प्रोक्तः ।

अथ प्रागुक्तमष्टस्वप्नफलं निशम्य श्रीप्रथमगणधरो विस्मितहृदयः सन् भगवन्तमपृच्छद् भगवन् ! भविष्यत्काले किं किं भविष्यति तदा केवलज्ञानज्ञात-सर्वभावो भगवान् प्राह-**गौतम** ! मम मोक्षात् सार्द्धाष्टमासाधिकत्रिवर्षेऽतीते पञ्चमारकप्रारम्भो भविष्यति ततो मदीयमोक्षाद् द्वादशसंवत्सरेऽतीते त्वं मोक्षं गमिष्यसि विंशतिसंवत्सरे च व्यतीते **सुधर्मा** शिवङ्गमी चतुष्षष्टिवत्सरे च व्यतिक्रान्ते **जम्बू**र्निर्वृतिं यास्यति । तदाऽऽहारकशरीर-मनःपर्यवज्ञान-पुलाकलब्धि-परमावधिज्ञान-क्षपकश्रेण्युपशमश्रेणि-केवलज्ञान-सिद्धिगति-जिनकल्पचारित्र-त्रिकान्येतानि दशवस्तूनि विच्छेदं गमिष्यन्ति, ततस्तृतीयपट्टधरश्चतुर्दशपूर्वधारी **जम्बू**शिष्यः **प्रभव**सूरिर्भविष्यति, ततश्चतुर्थपट्टधरश्चतुर्दशपूर्वधरो **दशवैकालिक**-सूत्रकारः **शय्यम्भवसूरि**र्भविष्यति, ततः पञ्चमपट्टधरश्चतुर्दशपूर्वधरो **यशोभद्रसूरि**-र्भविष्यति, तदन्तेवासिनौ क्रमेण षष्टसप्तमपट्टधरौ चतुर्दशपूर्वधरौ **सम्भूति**-**भद्रबाहु**नामानौ सूरी भविष्यतस्ततश्चतुर्दशपूर्वधरः **सम्भूति**विनेयोऽष्टमपट्टधर-**स्थूलभद्र**सूरिर्भविष्यति । मम निर्वृत्तितः पञ्चदशाधिकद्विशत(२१५)संवत्सरे तस्मिन् **स्थूलभद्र**सूरौ स्वर्गं याते प्राक्संहनन-संस्थान-चतुष्पूर्वी-सूक्ष्ममहाप्राण-ध्यानान्येतानि वस्तूनि विच्छेदं प्राप्स्यन्ति, मम मोक्षतस्त्रिशतसंवत्सर **उज्जयिन्यां** पूर्यां **सम्प्रति**नामा पृथ्वीपतिर्भविष्यति । स श्रीम**दार्यसुहस्ति**सूर्युपदेशाज्जातिस्मृतिं प्राप्य जैनधर्ममंगीकरिष्यति । स्वदोर्बलाच्चत्रिखण्डपृथ्वीं साधयिष्यति ज्ञानी दानी न्यायी विनयी पराक्रमी धर्मी च स नृपः पुत्रवत्प्रजाः पालयिष्यति । पुनः स नृपालो जिनप्रासादैरलङ्कारैः शरीरमिव महीं भूषयिष्यति । जनोपकारार्थं च ससम्यक्त्व-श्रावकाचारोपदेशप्रचारदक्षैर्जिनागमज्ञानविचक्षणैः सुदृढजिनधर्मश्रद्धैः स्वकीयपुरुषैर-नार्यदेशेष्वनार्यलोकान् सुश्रावकान् कारयिष्यति, ततोऽनार्यदेशेषु गीतार्थानां विहारं कारयित्वा तत्र जिनधर्मोद्योतं कारयिष्यत्येवं सर्वदेशेषु भक्तिशक्तिवित्तैः श्रीजिनधर्मं प्रवर्त्त्य सम्यगाराधितश्रावकाचारः स नृपो नाकं गमिष्यति, ततो मम निर्वाणात् सप्ततियुते चतुःशतसंवत्सरे गते तत्रैव नगर्यां **विक्रमार्क**नृपो भविष्यति श्री**सिद्ध-सेन**सूर्युपदेशात् प्राप्तसम्यक्त्वश्राद्धधर्मः सिद्धविद्यामन्त्रसुवर्णपुरुषः सत्त्वसि**द्धाग्नि-वैताला**दिदेवतो धैर्यशौर्यदानादिगुणप्रख्यातः स प्रतिपदं देवमनुष्येभ्यः प्रशंसा-सन्मानादिकं प्राप्स्यति, धनदानैश्च सकलां पृथ्वीमनृणां कृत्वा स्वसंवत्सरं

प्रवर्तयिष्यति, गुणलब्धपरदुःखभञ्जनपरस्त्रीसहोदराभिधानद्वयः स नृधवो न्यायेन स्वसन्ततिवत्प्रजाः पालयिष्यति, ततोमन्निर्वाणाच्चतुरशित्यधिकपञ्चशतसंवत्सरेऽतीते **वज्रसूरौ** दिवङ्गते दशमपूर्वार्द्धस्य विच्छेदो भावी, ततो मम निर्वाणात् पञ्चाभ्यधिकषट्शतसंवत्सरे स्वसंवत्सरप्रवर्तकः **शालिवाहनो** भूधवो भावी, ततो मन्मोक्षतो नवाधिकषट्शताब्दे **रथनूपुर**नगरे **दिगम्बर**मतोत्पत्तिर्भविष्यति, षोडशाधिकषट्शतवर्षे च **पुष्पमित्रा**चार्येण सह सार्द्धनवपूर्वाणि विच्छेदं यास्यन्ति, विंशत्यधिकषट्शताब्दे च सूरिवरादयो ग्राममध्ये वसतिं विधास्यन्ति, त्रिनवत्यधिकनवशतवत्सरे च **कालिकसूरि**र्भविष्यति, स कारणात् पर्युषणपर्व पञ्चम्यामकृत्वा चतुर्थ्यां करिष्यति, ततः कारणे गतेऽपि केचिदाचार्यादयो दुःषमकालानुभावात् पर्युषणपर्वचतुर्थ्यां करिष्यन्ति, ततो मम निर्वृतेः पञ्चपञ्चाशदधिकदशशतसंवत्सरे बहुग्रन्थकर्ता **हरिभद्रसूरि**र्भावी सप्तत्यभ्यधिकद्वादशशताब्दे चा**ऽऽम**राजा भविष्यति, स विद्याशास्त्रपारीणो **बप्पभट्ट्य**भिधानसूर्युपदेशाद् **गोप**गिरौ जिनमन्दिरं कारयित्वा तत्र सार्द्धत्रिकोटीहेममयी मदीया प्रतिमा स्थापयिष्यति, ततो मम मोक्षात् त्रयोदशशताब्दे दुःषमाऽद्धानुभावात् साधवः परस्परं वादं कलहं च करिष्यन्ति, ततो स्वस्वमताग्रहेण बहुगच्छमतभेदा भविष्यन्ति, केचिच्च ज्ञानतपः-क्रियादिधर्मकार्ये सुदृढाः केचिच्च श्लथा भविष्यन्ति, स्वगुणमतप्रशंसाकराः परगुणमतदोषारोपणनिन्दापराश्च भविष्यन्ति, पुनर्मम निर्वाणादेकोनसप्तत्यधिकषोडशशतसंवत्सरेऽतीते**ऽणहिल्लपुरपाटणे कुमारपालो** धराधवो भविष्यति, बहुग्रन्थनिर्मातृ**हेमचन्द्रसूरि**प्रतिबोधितः स्वीकृतसम्यक्त्वद्वादशव्रतोऽसामान्यदानदयासत्यविनयविवेकविज्ञानधैर्यनयगुणानुरागादिगुणालङ्कृतो महापराक्रमी स भूमीपतिः स्वभुजबलेनाऽऽ**यवन**देशमुत्तरदिशमा**गंगं** पूर्वदिशमा**विन्ध्या**चलं दक्षिणदिशमासमुद्रं च पश्चिमदिशं साधयिष्यति, भक्तिशक्तिधनैश्चाऽद्वितीयदयाप्रचारं करिष्यति, जिनप्रासादैश्च मेदिनीं भूषयिष्यति, सुदेवगुरुधर्मतत्त्वज्ञः स देवानपूजयित्वा गुरूनवन्दित्वा च भोजनं न करिष्यति । कदाचि**द्धेमसूरि**वरोपदेशा**ज्जीवत्स्वामि**प्रतिमायाः संबन्धं निशम्य स स्वाप्तजनै**र्वीतभय**पत्तनधूलिदुर्गं खानयित्वा प्रतिमां प्रादुष्कारयिष्यति, ततो महोत्सवेन स्वनगरमध्ये वर्यप्रासादे स्थापयित्वा निरन्तरं बहुभावेन पूजयिष्यति, ततः प्रतिमापूजार्थं **यदुदायि**धरापतिना ग्रामादिकं प्रदत्तं बभूव तदपि प्रकटं भविष्यति,

D:\chandan/new/kalp-2/pm5\3rd proof

तदा **कुमारपालो**ऽपि तावत्प्रमाणं ग्रामादिकं प्रतिमापूजार्थं प्रदास्यति, तस्य नृपस्यैकादशशतानि गजेन्द्रा दशसहस्रप्रमाणाश्च रथा एकादशलक्षप्रमाणाश्च वाजयोऽष्टादशलक्षप्रमाणाश्च पत्तयो भविष्यन्ति । स वर्षाकाले युद्धनियमं करिष्यति स्वदारसन्तोषी स शीलस्य मनसाऽपि भङ्गे सत्युपवासेन शुद्धिं करिष्यति, पुत्रविकलायाश्चाबलाया धनं न ग्रहिष्यति, स महान् जिनागमप्रचारको जिनशासनप्रभावको भूपालो भविष्यति। पुनः पञ्चमारकानुभावतो लोकाः प्रायेण निर्मर्यादा निर्लज्जा धर्मबुद्धिहीना वक्रा मूर्खाः परोपकारविकलाः कलहकरा अनीतिपरा निर्दया धर्मकार्येऽलसाः पापकार्येऽत्यादरवन्तः परदुःखदानपरा मिथ्यामतयो निःसन्तोषा अक्षमावन्तो मानिनो मायाविनो हिंसारताः सत्यवर्जिताः परद्रव्यग्रहणबुद्धयः शीलवर्जिताः परनिन्दापरा आत्मश्लाघाकराः पापवचनश्रवणपरा धर्मवचनश्रवणेऽरुचयो विवेकविकला दारिद्र्ययुताः स्वजनस्नेहवर्जिताः परजनप्रीतिकराश्च भविष्यन्ति । पृथ्वीपाला विविधदण्डैर्दण्डयित्वा जनानां धनं हरिष्यन्ति, राजपुरुषा अपि लोकान् धनार्थं पीडयिष्यन्ति, चौराश्चौर्येण भूपाला नवीनकरैरग्नयो दहनैर्व्यवहारिणश्च विशेषं गृहीत्वा स्तोकदानेन लोकान् दरिद्रयिष्यन्ति, धेन्वादिप्राणिनां वधो देवमन्दिराणां पातनं मनुष्यमुण्डकरश्च दण्डो भविष्यति, देशभङ्गदुर्भिक्षडमरमरक्यादिभिर्लण्टनपरहट्टश्रेणिभिर्लञ्चालुब्धनियोगिभिश्च जना बहुदुःखिनो भविष्यन्ति, दानबुद्धयो दरिद्रा धनवन्तश्च कृपणमुख्या भविष्यन्ति, पापिनश्चिरजीविनो धर्मिणश्च स्वल्पायुष्का भविष्यन्ति, भूपतयो हीनकुला भूपसेवकाश्चोत्तमकुला भविष्यन्ति, बहवः पाखण्डिनो विप्रतारकाश्च भविष्यन्ति सुकुलोद्भवा अपि स्त्रियो वेश्यासदृश्यो दुश्चारिण्यो भविष्यन्ति, देवदर्शनं जातिस्मरणज्ञानं च न भविष्यति, लोका देवगुरुधर्मद्रव्यभक्षणबुद्धयस्तेषां निन्दोड्डाहपराश्च भविष्यन्ति, बालास्तरुणाश्च सुता मरिष्यन्ति, पितरश्च सुदीर्घायुष्का भविष्यन्ति, विप्रा वेदपाठषट्कर्मवर्जिताः कृषिकराः शस्त्रधराश्च भविष्यन्ति, सुता मातृपितॄणामविनयं करिष्यन्ति, तेषां वचनकराश्च न भविष्यन्ति, परं दुःखदायका भविष्यन्ति, विनयोज्झिताः स्नुषाः श्वश्रूणां प्रत्युत्तरं दास्यन्ति, ताभिः शिक्षावचने कार्ये च कथिते नागिनीवद् रोषं कृत्वा कलहं करिष्यन्ति, श्वश्र्वोऽपि पिशाचिनीसदृशीभूता वधूर्विडम्बयिष्यन्ति, शिष्या गूरूणां संमुखं वक्ष्यन्ति, गुरुभिर्दत्तां शिक्षां न गणयिष्यन्ति, साधवो वस्त्रपात्रादिषु

मुर्च्छावन्तो भविष्यन्ति, तदर्थं च साधुश्रावकैः सह कलहं करिष्यन्ति, ज्ञानदर्शनचारित्रार्जनशिथिलाश्च भविष्यन्ति, यशोवृत्त्यादिकृते च मन्त्रतन्त्रयन्त्रशास्त्रादिपठनं करिष्यन्ति, स्तोका एव सुश्रमणा भविष्यन्ति, लोका धर्मकार्येऽपि शाठ्यं करिष्यन्ति, यदा कोऽपि द्रक्ष्यति तदा शोभनां धर्मक्रियां करिष्यन्ति, यदा कोऽपि न द्रक्ष्यति तदाऽविधिना करिष्यन्त्येवं धर्मक्रियायामपि कापट्यं भविष्यति, निःसङ्गेषु वैराग्यं न स्थास्यति, ज्ञानविद्याधनरूपबलसौभाग्ययशःकीर्तिगुणपराक्रमधीरत्वसंहननायुर्मन्त्रतन्त्रयन्त्रौषधिफलपुष्परसदानशीलतपोभावादिभावानां क्रमेण हानिर्भविष्यति, महानगराणि ग्रामतुल्यानि भविष्यन्ति, ग्रामाश्च श्मशानतुल्या भयप्रदा भविष्यन्ति, दयासत्यास्तेयब्रह्मचर्यनिर्लोभताक्षमामृदुतार्जवतादिशुभभावनामपि क्रमेण हानिर्भविष्यति, पञ्चमकाले यस्य शुभमतिः परोपकारकरणपरता धर्मकरणदृढता सदा धर्मार्थं धनबुद्धिवचनशक्त्यादीनां च व्ययो भविष्यति, स एव धन्यः कृतकृत्यो नान्योऽतो दानशीलतपोभावस्वरूपवीतरागोक्तधर्मकरणे सदा मतिः कार्या ।

लोकिका अपि कलियुगव्यपदेशेन पञ्चमारकस्य स्वरूपमेवं कथयन्ति- द्वापराभिधानयुगे **युधिष्ठिर**नृपालो बभूव । स कदाचिदरण्येऽगच्छत् तत्र तेनैका गौर्वत्सायाः स्तन्यपानं विदधाना समालोकिता तदा सञ्जातविस्मयेन तेन किमिदमाश्चर्यमिति पृष्टा विप्रा जगुर्हे धरापाल ! आगामिकलियुगे दुःस्थाः शक्तिवर्जिता धनलुब्धा जननीजनका लक्ष्मीवद्भ्यो स्वकन्या दत्त्वा तेभ्यो धनं गृहीत्वा स्वनिर्वाहं करिष्यन्ति, तन्निशम्याऽग्रे चलता युधिष्ठिरेण समश्रेणिश्रितानि वारिपूर्णानि त्रीणि सरांसि निरीक्षितानि तत्रादिमसरसो वार्युच्छलन्मध्यसरस्त्यक्त्वा तृतीयसरसि पतति मध्यसरसि बिन्दुमात्रमपि न पतति तन्निरीक्ष्य विस्मयवान्धरित्रीनाथस्तस्मिन्विषये द्विजान् पप्रच्छ, तेऽपि विचार्य जगदुः-प्रजापाल ! यथा समीपसरस्त्यक्त्वा तृतीयसरसि पयोगतं तथा कलौ नरा निजान् समीपस्थांश्च त्यक्त्वाऽन्यैर्दूरस्थैः सह प्रीतिं करिष्यन्ति । तन्निशम्य पुनरग्रे गच्छता **युधिष्ठिर**भूपतिना वारिक्लिन्नवालुकाया महाक्लेशेन जनैः कृता रज्जवस्तत्कालं पवनैर्भग्नःसमालोकितास्ततस्तस्मिन्विषये पृष्टा ब्राह्मणाः कथयामासुः-क्ष्मापते ! कलौ लोकाः कृष्यादिमहाक्लेशैर्यत्किञ्चिदपि वित्तमुपार्जयिष्यन्ति तद्वित्तं जनैः प्रयत्नेन रक्ष्यमाणमपि चौरदायादाग्निभूपदण्डकरादिभिर्नाशं यास्यति । तन्निशम्य पुरो व्रजता **युधिष्ठिर**जगतीपतिनाऽवाहजलं

D:\chandan/new/kalp-2/pm5\3rd proof

कूपमध्ये पतन्निरीक्षितं ततस्तद्विषये पृष्टा भूदेवाः प्रोचुरिलापतेऽन्ययुगेषु प्रजापतयो भूरि स्वधनं दत्त्वा प्रजाः स्वसन्ततिवत्पालयामासुः परमस्मिन् कलियुगे तु लोकैर्भूरिक्लेशैरुपार्जितं सर्वं धनं धरापतयो ग्रहीष्यन्ति लोकांश्च दरिद्रान् करिष्यन्ति। तन्निशम्य पुरो याता **युधिष्ठिर**वसुधाधवेन वनैकदेशे शाखाप्रशाखापत्रपुष्पादि-शोभितश्चम्पकवृक्षस्तत्समीपस्थश्च शमीवृक्षः समालोकितस्तत्र शमीवृक्षस्य सुगन्धि-पुष्पविलेपनगीतनृत्यादिभिर्जनाः पूजनं कुर्वन्ति, परं सुच्छत्राकारस्य चम्पकवृक्षस्य जनाः पूजनं न कुर्वन्ति, तद् दृष्ट्वा विस्मितेन भूपेन तद्विषये पृष्टा विप्रा अब्रुवन्-भूपेन्द्र ! कलौ सदाचारवतां गुणवतां च पूजा न भविष्यति, परं दुराचारवतां पापिष्ठानां दुर्जनानां च पूजासम्पदौ भविष्यतः । तन्निशम्याऽग्रे गच्छता **युधिष्ठिरेण** भूभर्त्रा वालाग्रबद्धा वियति लम्बमानैका महती शिला वीक्षिता ततस्तद्विषये पृष्टा द्विजा अकथयन् विश्वम्भरापते ! कलिकाले पापशिलाभराक्रान्तोऽपि जनोऽल्पधर्मकेशाग्र-नौकालम्बनेन कष्टसमुद्रं तरिष्यति, यदा चाऽल्पधर्मकेशाग्रनौकाभेदं प्राप्स्यति, तदा जीवा समकालमेव ब्रुडिष्यन्ति दुःखिनश्च भविष्यन्ति । तन्निशम्य पुरो व्रजता **युधिष्ठिरेण** भूस्वामिना फलार्थं पादपस्य पीडां वीदधाना जना वीक्षितास्ततस्तद्विषये पृष्टा विप्राः प्रोचुर्नरपते ! कलौ फलतुल्यसुतार्थं पादपतुल्यो जनको बहु सहिष्यति । तन्निशम्याऽग्रे चलता क्ष्मानाथेन श्रेष्ठाऽन्नपचनार्हे काञ्चनकटाहे पिशितपाको निरीक्षितस्ततस्तद्विषये पृष्टा ब्राह्मणा जगुर्नरनाथ ! कलौ सुकुलोत्पन्नानां हृदयरूप-स्वर्णकटाहे मलीनतारूपमांसं वासं करिष्यति, तस्मात् कुलीना अपि स्वोपकारि-णामुपकारं विस्मृत्य तांश्च त्यक्ष्यन्त्यन्यजनानां कृते च स्वमूर्द्धानमपि समर्पयिष्यन्ति तैः सह प्रीतिं भक्तिं च करिष्यन्ति । तन्निशम्याऽग्रे याता भूभृता विषधरार्चां कुर्वन्तो गरुडार्चां चाऽकुर्वन्तो जना विलोकितास्ततस्तद्विषये पृष्टा द्विजाः प्रोचुः कलौ पन्नगसदृशक्रूरजनेषु निर्दयधर्मेषु च पूजासत्कारौ भविष्यतः, परं सुपर्णसमानगुण-सत्क्रियाधर्मयुतजनेषु दयायुतधर्मेषु च पूजासत्कारौ न भविष्यतः । तन्निशम्याऽग्रे चलता पृथ्वीजानिनैकं शकटं वहन्तौ गजौ परस्परमसंमिल्य चलन्तौ वीक्षितौ तथैवैकं शकटं वहन्तौ रासभौ परस्परं संमिल्य चलन्तौ निभालितौ ततस्तद्विषये पृष्टा विप्रा अवोचन् पृथ्वीभर्तः ! कलौ मतङ्गजसदृशाः सुकुलोत्पन्ना नराः परस्परं कलहं करिष्यन्ति संमिल्य च न व्यवहरिष्यन्ति, खरतुल्याश्च हीनकुलोद्भवा मनुजाः परस्परं

सस्नेहं संमिल्य व्यवहरिष्यन्ति नीतिं सदाचारं च धारयिष्यन्ति । तन्निशम्य पुरो व्रजता महिपतिना राजहंसैः सेव्यमानं वायसं निरीक्ष्य पृष्टं तदा विप्राः प्रावदन् महीपते ! कलौ वायसतुल्या हीनकुलोत्पन्नाः पृथ्वीपतयो भविष्यन्ति राजहंसनिभाः सुकुलोत्पन्नास्तेषां सेवां करिष्यन्ति । पूनः कदाचित् पञ्चपाण्डवा अरण्ये स्थिता बभूवुस्तदा **युधिष्ठिरे**ण राज्ञा निशि क्रमेण चत्वारः सहोदरा यामिकत्वेन नियुक्ताः प्रथमे भीमो जागर्ति, **युधिष्ठिरा**दयश्चत्वारः सहोदराः सुप्ताः सन्ति तस्मिन् काले प्रेतरूपधारकः कलिः प्रादुर्भूय **भीमं** प्रोवाच रे **भीम** ! त्वयि पश्यति ते सहोदरान् हन्मि तच्छ्रुत्वा क्रुद्धो **भीमः** प्रेतरूपभाजं कलिं हन्तुं दधावे द्वयोर्भयंकरं युद्धं सञ्जातं । तस्मिन् युद्धे बलिना **कलि**ना बलवान् **भीमो** पराजित एवं द्वितीयप्रहरेऽ**र्जुनो** जितस्तृतीयप्रहरे **नकुलो** जितश्चतुर्थे यामे च **सहदेवो** जितस्ततो यामिनीशेषे प्राप्तपराजया युद्धश्रान्ताश्चत्वारोऽपि भ्रातरः सुप्ता **युधिष्ठिर**श्च निद्रां त्यक्त्वोत्थितस्तदा पिशाचरूपधरः **कलिर्युधिष्ठिर**मपि त्वत्पुरस्ते सहोदरान् हन्मीत्यवोचत् तदाकर्ण्य **युधिष्ठिरो** न चुकोप न च परुषाक्षरं प्रत्यभाषत किन्तु सर्वार्थसाधनीं क्षमामङ्गीचकार, तं तथोपशमवन्तं विलोक्य प्रशान्तमनाः **कलि**स्तस्य मुष्टौ समायातस्ततो **युधिष्ठिरे**ण जागरितानां स्वसहोदराणां पुरो निशाव्यतिकरं प्रोक्तं क्षमागुणेन च वशीभूतः **कलि**र्दर्शितः एतादृशा अष्टाधिकशतदृष्टान्ता लोकिकपुराणादिग्रन्थेषु कलियुगवर्णन-प्रस्तावे प्रोक्ताः सन्ति ।

पुनरस्मिन् पञ्चमारके महाक्रूरः कलङ्की नृपो भविष्यति, तस्य वृत्तान्त एवं-**पाटलीपुर**पत्तने म्लेछकुले **जस**नाम्नश्चण्डालस्य **यशोदा**नाम्न्याः पत्न्याः कुक्षौ त्रयोदशमासान् यावत् स्थित्वा चैत्रश्वेताष्टम्यां जयश्रीदिने कुजवासरे निशि मकर-लग्नषष्ठांशे कर्कस्थशशिनि चन्द्रयोगेऽश्लेषाद्यपादे **कलङ्कि**जन्म भविष्यति, पंचमे संवत्सरे तस्य जट्ठरे महती पीडा भाविनी सप्तमाब्दे स हुतभूजापदि पतिष्यत्येकादशे वत्सरे तस्य वित्तलाभो भाव्यष्टादशे संवत्सरे कार्तिकश्वेतप्रतिपदौ शनिवासरे तुलाशीतरश्मौ स्वातिभे नन्दिदिवसे सिद्धयोगे बवकरणे रावणाभिधमुहूर्ते तस्य राज्याभिषेको भावी स त्रिकरोन्नतशरीरः कपिलकेशनयनस्तीक्ष्णस्वरो महाविद्या-प्राप्तिगर्वितो दीर्घहृदयो गुणविकलश्च भविष्यति, तस्याऽदन्ताभिधो वाजिर्दुर्वास-काभिधः कुन्तो दैत्यसूदनाह्वं खङ्गं मृङ्गांकाह्वयो मुकुटो नभः खेलाभिधं त्रिशूलं

समारोहणार्थं दृषन्मयोऽश्वश्च भविष्यति तस्य कटिप्रदेशे मृगलाञ्छनभास्करौ भविष्यतः एकोनविंशतितमसंवत्सरे प्रचण्डबलः स स्वभुजबलेन **भरतार्द्धं** साधयिष्यति सार्द्धविंशतितमे संवत्सरे**ऽर्बुद**पृथ्वीपतेः कन्यां परिणीय स बह्वीः पृथ्वीनाथकुमारीः परिणेष्यति, ताभिः सह वैषयिकं सुखं भुञ्जानस्य तस्यऽनुक्रमेण **दत्तविजयमुञ्जापराजिता**भिधानाश्चत्वारो महापराक्रमवन्त आत्मजा भविष्यन्ति स अपरिमेयसुवर्णदानाद् विक्रमसंवत्सरं समुत्थाप्य स्वकीयसंवत्सरं प्रवर्तयिष्यति, तस्य **रुद्रश्चतुर्मुखः कल्की कलङ्की** चेति नामचतुष्टयं भविष्यति, तस्य राजधानी-**पाटलीपुरे** भविष्यति, तस्य पुरस्य नृपनाम्नाऽपि प्रसिद्धिर्भविष्यति स स्वप्रथम-सुतदत्ताय राजधानीकृते **राजगृहं** नगरं दास्यति, तस्य **दत्तपुरं** द्वितीयं नाम भविष्यति, द्वितीयसुत**विजयाय** च राजधानीकृते**ऽणहिल्लपुरपत्तनं** दास्यति, तस्याऽपरनाम **विजयपुरं** भविष्यति, तृतीयपुत्र**मुञ्जाय** चा**ऽवन्ति**देशं दास्यति, चतुर्थपुत्रा**ऽपरा-जिताय** चाऽन्यदेशं दास्यति, **कलङ्की** यदा राज्यं करिष्यति, तदा म्लेच्छक्षत्रियाणां रुधिरेण धरित्री स्नानं करिष्यति तस्य कोशे नवनवतिसुवर्णकोट्यश्चतुर्दशसहस्र-संख्याश्च मतङ्गजा हस्तिन्यश्च सार्द्धचतुःशतप्रमाणाः सप्ताशीतिलक्षाश्च तुरङ्गमाः पञ्चकोटीमिताश्च पदातयोऽमेयाश्च दासदास्यो भविष्यन्ति । स स्वभावेन महाक्रूरः कषाययुक्तश्च भविष्यति । स नन्दनृपकृतान् पञ्चसुवर्णस्तूपांल्लोकाननान्निशम्य खनयित्वा सुवर्णं ग्रहीष्यति, ततः प्रभूतलोभः स स्वपुरमपि परितः खनयित्वा निधानानि ग्रहीष्यति, तदा भूमध्याल्**लवणदेव्य**भिधा दृषन्मयीधेर्नुर्निर्यास्यति प्रभावयुक्तां तां धेनुं स चतुष्पथे स्थापयिष्यति, सा भिक्षाकृते भ्रमतो मुनीन् कदाचिच्छृङ्गाग्रैर्मारणार्थं प्रयत्नवती भविष्यति, तद् दृष्ट्वा गीतार्थमुनीन्द्रास्तस्मिन् विषये विचारं कृत्वा ज्ञानेन वार्युपसर्गं ज्ञास्यन्ति, ततो ये संयमार्थिनो मुनयस्ते त्वन्यत्र विहरिष्यन्ति ये तु रसनेन्द्रियवशत्वेन सुन्दरान्नपानलुब्धास्ते तु गीतार्थैः प्रोक्ता अपि विहारं न विधास्यन्ति ततः सप्तदशवासरान् यावन्निरंतरं मेघो वर्षिष्यति तयाऽतिवर्षया **कलङ्किनः** पुरं वारिणा समाच्छादितं भावि तदा कलंकी नष्ट्वा कस्मिंश्चिदुच्चप्रदेशे स्थितिं करिष्यति, वारिपराभवेऽतीते स नूतनपुरस्य स्थापनां करिष्यति, पाथःप्रवाहेण प्रादुःभूतान्नव**नन्द**निर्मितान् सुवर्णाद्रीन् समालोक्य स प्रभूतार्थलुब्धो भावी, प्राग् यैः करं न दत्तं तेषां पार्श्वात् करं ग्रहीष्यति यैश्च प्राग्दत्तं

तेषां पार्श्वादधिकं ग्रहीष्यति, ततः पुनरपि नूतनं नूतनं करं गृहीष्यति । पुनर्लोकानामुपरिष्टादसत्कलङ्कानि प्रदाय तेषां धनं गृहीष्यति, भिन्नभिन्नप्रपञ्चेन च वित्तं समादाय लोकान्निर्धनान् करिष्यति । कनकरूप्यनाणकमपि स्ववशीकृत्य चर्मनाणकं प्रवर्तयिष्यति, तापसपरिव्राजकादिभ्योऽपि करयाचनां करिष्यति, तेऽपि परिग्रहारम्भादियुक्ताः सन्तस्तस्मै करं दास्यन्ति, निर्धनत्वेन लोकानां पार्श्वेऽशनाऽर्थं धातुभाजनमपि न स्थास्यति ते तरुपर्णेषु भोजनं विधास्यन्ति, स **कलङ्की** कदाचिन्मुक्तपरिग्रहान् जैनमुनीन् निरीक्ष्याऽतिलोभतस्तेषां पार्श्वादपि भिक्षाषष्ठांशं प्रार्थयिष्यति, ततो मिलिताभिः साधुभिर्विचार्य कृतकायोत्सर्गसमाहूता शासनसूरी साधुभिक्षाषष्ठांशग्रहणदुष्कार्यतः **कलङ्किनं** वारयिष्यति, ततः स भूपः केषाञ्चिद्वेषधारिणां वेषांस्त्याजयिष्यति, तस्य दुरात्मनः पुनः प्रान्तकाले साधुभिक्षाषष्ठांशग्रहणदुर्बुद्धिर्भविष्यति तया दुर्बुद्ध्या स साधूनां पार्श्वाद् भिक्षाषष्ठांशमर्थयिष्यति, परं साधवो न दास्यन्ति तदा पापात्मा स आचार्यादीन् सर्वमुनीन् गोवाटके संरोत्स्यति, तत आचार्योपाध्यायसाधुप्रमुखः सङ्घः शासनदेवताराधनाकृते कायोत्सर्गं विधास्यति तत्कायोत्सर्गप्रभावेण शासनसूरी समागत्य **कलङ्किन** उपदेशं दास्यति परं स न भोत्स्यते, तदा कम्पितासनो वासवस्तत्र समागमिष्यति वृद्धविप्ररूपं च विधाय **कलङ्कि**समीपं समागत्य तं कथयिष्यति हे पृथ्वीपते ! अत्र गोवाटकेऽकृतापराधा दयावार्द्धय एते साधवस्त्वया कस्मान्निरुद्धाः सन्ति ? तदा स कथयिष्यति सर्वधर्मसाधवो मह्यं करं ददति, परमेते मह्यं भिक्षाषष्ठांशमपि न वितरन्ति, ततो गोवाटके निरुद्धाः सन्ति । तदा त्रिदशपतिः कथयिष्यति भो भूमीपते ! त्यक्तधना अकिञ्चना एते । तत एतेषां समीपात् तव किमपि न मिलिष्यति भिक्षाषष्ठांशदानव्यवहाराभावाद् भिक्षाषष्ठांशमपि तुभ्यं न दास्यन्ति, त्वमपि साधूनां पार्श्वाद् भिक्षाषष्ठांशं मार्गयन् किं न लज्जसे त्वमेतान् साधून् मुञ्चाऽन्यथा त्वं महति कष्टे पतिष्यसीति सुरेन्द्रकथितं निशम्याऽपि स साधून्न मोक्ष्यति, तदा क्रुद्धो जिनमतभक्तो वासवो तं **कलङ्किनं** चपेटाप्रहारेण मारयिष्यति, षडशीतिसंवत्सरायुष्कः स मृत्वा नरकं यास्यति, ततो स्वर्गाऽधिपः **कलङ्कि**पुत्रं **दत्तं** जिनधर्मनिपुणं विधाय राज्ये च स्थापयित्वा गुरुमुख्यसङ्घं च प्रणम्य स्वावासं गमिष्यति । पश्चा**द्दत्त**नरपालः स्वजनकपापस्याऽतिकटुफलं विज्ञाय धर्मकार्यातितत्परः पापकार्यातिभीरुः सन्

जिनप्रासादैर्धरित्रीं मण्डयिष्यति साधुसाध्व्यादिश्रीसङ्घस्य च भक्तिपरः प्रमादवर्जितः स बहुप्रकारैर्जिनशासनप्रभावनां करिष्यति, ततः प्रभृतिजिनशासनस्य महिमा वृद्धिं गमिष्यति पञ्चमारके, जिनशासनभक्तिरता धरापालाः षोडशसहस्राधिकैकादशलक्षाणि भविष्यन्ति सर्वज्ञदर्शनप्रभावकाः सचिवा एककोटिप्रमाणा भविष्यन्ति । श्रीमत्**सुधर्मस्वाम्या**द्याश्च युगप्रधानपदशालिनो महोपकृतिकारिणश्चतुरधिकद्विसहस्रमिताः सूरीन्द्रा भविष्यन्ति, तेषु **सुधर्मजम्बूसूरी**शौ तद्भवमुक्तिगामिनौ शेषाः सर्व एकावतारिणो भाविनः । षोडशाधिकैकादशलक्षैकादशसहस्रप्रमाणा युगप्रधानतुल्याः परोपकाररताः सूरयो भविष्यन्ति, त्रयस्त्रिंशल्लक्षचतुःसहस्रचतुःशतैकोनविंशतिप्रमाणाश्च सामान्याः सूरयो भविष्यन्ति, पञ्चपञ्चाशत्कोटिपञ्चपञ्चाशल्लक्षकोटिपञ्चपञ्चाशत्सहस्रकोटिचतुःपञ्चाशच्शतकोटिचतुश्चत्वारिंशत्कोटिप्रमाणाश्चोपाध्यायपदशालिनो वाचनाचार्या भविष्यन्ति, सप्ततिलक्षकोटिनवसहस्रकोट्येकशतकोट्येकविंशतिकोठ्येकलक्षषष्टिसहस्रप्रमाणाश्च सुसाधवो भविष्यन्ति, दशकोटिकोटिद्वादशशतकोटिद्वानवतिकोटिद्वात्रिंशल्लक्षनवनवतिसहस्रैकशतमिताश्च साध्व्यो भविष्यन्ति, षोडशलक्षकोटित्रिसहस्रकोटित्रिशतकोटिसप्ततिकोटिचतुरशीतिलक्षप्रमाणाश्च श्रावका भविष्यन्ति, पञ्चत्रिंशल्लक्षकोटिद्वानवतिसहस्रकोटिपञ्चशतकोटिद्वात्रिंशत्कोटिप्रमाणाश्च श्राविका भविष्यन्तीति यत्पञ्चमारकस्य चतुर्विधसङ्घस्य प्रमाणं भविष्यति । केचनाचार्या एतत्सङ्घप्रमाणं पञ्च**भरतैरवतयो**रिति कथयन्ति, केचन च पञ्च**भरत**सङ्घप्रमाणमेतदिति कथयन्ति, पुनः केचिदेतदेकभरतसङ्घप्रमाणमिति कथयन्ति, तत्र तत्त्वं तु केवलिगम्यं ।

किञ्च पञ्चमारकप्रान्ते द्विहस्तप्रमाणदेहो द्वादशवर्षायुष्कश्चारित्रं गृहीत्वा षोडशे वर्षे प्राप्ताचार्यपद उत्कृष्टषष्ठतपःकृद् नन्द्यनुयोगद्वारावश्यकजितकल्पदशवैकालिकसूत्रज्ञो युगप्रधानपदशाली देवेन्द्रवन्दितचरणकमलः श्री**दुःप्रसह**सूरिर्भविष्यति, स विंशतिसंवत्सरायुष्कः कृताष्टमतपाः प्रथमदेवलोकं यास्यति । तत्र देवसुखमनुभूय **भरत**क्षेत्रे मानुष्यं प्राप्य मुक्तिं गमिष्यति पञ्चमारके विंशतिसहस्रनवशतवर्षत्रिमासपञ्चदिवसपञ्चप्रहरैकघटीद्विपलैकचत्वारिंशदक्षरोच्चारणप्रमाणकालो जिनधर्मो विशेषत्वेन भविष्यति, नवनवतिसंवत्सराष्टमासचतुर्विंशतिदिवसद्विप्रहरसार्द्धपञ्चघटीसप्तपञ्चाशत्पलैकोनविंशत्यक्षरोच्चारप्रमाणकालो जिनधर्मः स्तोकत्वेन स्थास्यति ।

पञ्चमारकान्ते **दुःप्रसहा**ख्यो युगप्रधानसूरिः **फल्गुश्री**नाम्नी साध्वी **नायला**भिधानः श्रावकः **सत्यश्री**नाम्नी श्राविकैवंविधः श्रीचतुर्विधसङ्घो जिनधर्मश्च पूर्वाह्णे क्षयं गमिष्यति, **विमलवाहना**भिधश्च पृथ्वीपालः **सुमुखा**भिधश्च सचिवो मध्याह्ने क्षयं गमिष्यति, वह्निश्च सन्ध्याकाले क्षयं गमिष्यत्येवं पञ्चमारक एकविंशतिसहस्र-संवत्सरप्रमाणो भविष्यति । षष्ठारकस्याऽप्येतावदेवप्रमाणं भविष्यति ।

अथ षष्ठारके प्रभूतपांसुयुक्ताः परुषस्पर्शा वायवो वास्यन्ति, भास्करोऽत्युग्रतापो हिमांशुश्चातिशीतदो भविष्यति, प्रचण्डतापशीताभ्यां लोकानां नाशो भविष्यति, भस्मदृशद्वह्निकणक्षारविषविद्युन्मलमयाः सप्तजलदाः पृथक्पृथक्सप्तसप्तवासराणि यावद् वर्षिष्यन्ति यदुद्भूतकासश्वासज्वरजलोदरकुष्ठादिमहारोगैः पीडिता जनाः क्षयं यास्यन्ति, पृथ्वीभस्माङ्गारतुल्या भविष्यति पर्वतसरिद्गर्तादिकं सर्वं सदृग् भविष्यति ये केचित् स्तोकाः पशुमनुष्या जीवन्तः स्थास्यन्ति ते **वैताढ्य**पर्वतमूले तस्यैव द्वासप्तति-बिलेषु **गङ्गासिन्धु**बिलेषु च दुःखेन स्थास्यन्ति तदा **गङ्गासिन्धु**नदीप्रवाहे रथचक्र-मध्यभूमीप्रमाणे स्थास्यतः तज्जलं मत्स्यादिजन्तुबहुलं भविष्यति । बिलस्थमनुष्या निशि नदीजलस्थमत्स्यादीनि गृहीत्वा स्थले मोक्षयन्ति । तानि दिवसे भास्कराति-तापपक्वानि भविष्यन्ति, रात्रौ तेषां भोजनं करिष्यन्त्येवंविधस्तेषामशनव्यवहारो भविष्यति । तदा पुरुषा नार्यश्चैकहस्तप्रमाणदेहा निर्वसना निर्लज्जाः कठोरशरीरा अश्लाघ्यवर्णाः परुषवाचो रोगपीडिता महाक्रोधवन्तो भविष्यन्ति । पुरुषा विंशति-संवत्सरायुष्का महिलाश्च षोडशाब्दायुष्का भविष्यन्ति । षडब्दायुष्का नितम्बिन्यो गर्भं धारयिष्यन्ति, दुष्प्रसूतयश्च भविष्यन्ति, पुनः पुत्रपौत्रादीनां दृष्टारो जनकजननी-विवेकरहिता मांसाशनरता निर्दया मनुष्या भविष्यन्ति । सूर्यासह्यप्रचण्डतापात् ते दिवा बिलेष्वेव स्थास्यन्ति, तदा सर्पिदध्यादिकुसुमफलधान्यान्नादिशय्यासनादीनि वस्तूनि न भविष्यन्तीत्यादिकमेकविंशतिसहस्रसंवत्सरप्रमाणे षष्ठारके भविष्यति ।

अथोत्सर्पिण्यां षष्ठारकतुल्य एकविंशत्यब्दसहस्रप्रमाणे प्रथमारकेऽतीते तावत्-प्रमाण एव द्वितीयारकः समायास्यति तस्मिन्नायाते क्रमादमी पञ्चपयोदाः सप्त-सप्तदिवसानि यावद्वर्षिष्यन्ति पृथ्वीतापहरः **पुष्करावर्तः,** शस्योत्पत्तिकरः **क्षीरोदकः,** स्नेहकरो **घृतदक,** ओषध्युत्पत्तिकरः **शुद्धोदका,** रसोत्पत्तिकरश्च **रसोदक** इत्येवंविध-पञ्चत्रिंशद्दिवसवृष्ट्यनन्तरं शस्यवल्लीवृक्षौषधियुक्ता भूमी भविष्यति, ततो

D:\chandan/new/kalp-2/pm5\3rd proof

बिलवासिनो बहिर्निर्गमिष्यन्ति मांसाशनं त्यक्त्वा कुसुमफलधान्यादीन्याहरिष्यन्ति, ततस्तेषां संहननरूपवर्णजीवितशरीरादीनि वृद्धिं यास्यन्ति ते च रोगरहिताः क्रमेण भाविनः । सुखकारिणः पवना ऋतवो वारीणि च भविष्यन्ति, द्वितीयारकस्य प्रान्ते **भरत**क्षेत्रे मध्यभागे सप्तकुलकरा भविष्यन्ति तेषामनुक्रमेणैतानि नामानि **विमलवाहनः, सुदामः, सङ्गमः, सुपार्श्वो, दत्तः, सुमुखः, समुचि**श्चेति तेषु सञ्जातजातिस्मरणो **विमलवाहन**कुलकृद् राज्यस्थित्यर्थं ग्रामनगरादिकस्थापनं कृत्वा, गवाश्वगजादीनां संग्रहं कृत्वा, हुतभुजि समुत्पन्नेऽन्नपाकविधिं च दर्शयित्वा, द्वासप्ततिकलाः शिल्पशतं लिपीश्च शिक्षयिष्यति ततो लोका व्यवहारज्ञा भविष्यन्ति । ततस्तृतीयारकस्यैकोननवतिपक्षे व्यतीते **शतद्वारा**भिधपुरे **समुचि**भूपपत्न्या **महादेव्या**ह्वायाश्चतुर्दशस्वप्नदर्शनप्रकटपुण्यशाली **श्रेणिक**भूपजीवः प्रथम तीर्थंकरः **पद्मनाभाह्वः** पुत्रो भविष्यति । स शरीरोन्नतत्ववर्णायुर्लाञ्छानादिना श्री**महावीर**तीर्थंकरसदृशो भविष्यति ततः पश्चानुपूर्व्या श्री**पार्श्वनाथनेमिनाथा**दितुल्याः क्रमेणामी तीर्थंकरा भविष्यन्ति । श्री**वीर**पितृव्यस्य **सुपार्श्व**स्य जीवो द्वितीयः **सूरदेव**स्तीर्थंकरः, **कोणिका**त्म**जोदायि**जीवस्तृतीयः **सुपार्श्व**तीर्थंकरः, **पोट्टिला**णगारजीवश्चतुर्थः **स्वयम्प्रभ**जिनः, **दृढायु**श्राद्धजीवः पञ्चमः **सर्वानुभूति**जिनः, **कार्तिक**श्रेष्ठिजीवः षष्ठो **देवश्रुत**जिनः, **शङ्ख**श्राद्धजीवः सप्तम **उदय**जिनः, **आनन्द**जीवोऽष्टमः **पेढाल**जिनः, **सुनन्द**जीवो नवमः **पोट्टिल**जिनः, **शतक**जीवो दशमः **शतकीर्ति**जिनः, **देवकी**जीव एकादशो **मुनिसुव्रत**जिनः, **कृष्णवासुदेव**जीवो द्वादशो**ऽमम**जिनः, **सत्यकि**विद्याधरजीवस्त्रयोदशो **निष्कषाय**जिनः, **बलभद्र**जीवश्चतुर्दशो **निष्पुलाक**जिनः, **सुलसा**जीवः पञ्चदशो **निर्मम**जिनः, **रोहिणी**जीवः षोडशा**श्चित्रगुप्त**जिनः, **रेवती**जीवः सप्तदशः **समाधि**जिनः, **शतालि**श्राद्धजीवोऽष्टादशः **संवर**जिनः, **द्वीपायन**जीव एकोनविंशो **यशोधर**जिनः, **कर्ण**जीवो विंशतितमो **विजय**जिनः, **नारद**जीव एकविंशतितमो **मल्ल**जिनः, **अम्बड**जीवो द्वाविंशतितमो **देव**जिनः, **अमर**श्रावकजीवस्त्रयोविंशतितमो**ऽनन्तवीर्य**जिनः, **स्वाति**जीवश्चतुर्विंशतितमश्च **भद्रकृज्**जिनः, इति भावि चतुर्विंशतिजिननामानि । अथ भाविचक्रवर्तिनामानि प्रोच्यन्ते-**दीर्घदन्तः, गूढदन्तः, शुद्धदन्तः, श्रीचन्द्रः, श्रीभूतिः, श्रीसोमः, पद्मः, महापद्मः, विमलः, विमलवाहनः, भरतः, अरिष्ट**श्चेति । अथ वासुदेवनामानि प्रोच्यन्ते-**नन्दिः, नन्दिमित्रः,**

**सुन्दरबाहुः, महाबाहुः, अतिबलः, महाबलः, बलः, द्विपृष्ठः, त्रिपृष्ठ**श्चेति । अथ प्रतिवासुदेवनामानि प्रोच्यन्ते-**तिलकः, लोहजङ्घः, वज्रजङ्घः, केशरी, बली, प्रह्लादः, अपराजितः, भीमः, सुग्रीव**श्चेति । अथ बलदेवनामानि कथ्यन्ते-**जयन्तः, व्याजितः, धर्मः, सुप्रभः, सुदर्शनः, आनन्दः, नन्दनः, पद्मः, सङ्कर्षण**श्चेति त्रिषष्टि-शलाकापुरुषा भविष्यन्ति, तेषामेकषष्टिशलाकाः पुरुषास्तृतीयारके भविष्यन्ति, चतुर्थारक एकस्तीर्थपतिरेकश्च चक्रवर्ती भविष्यति, ततश्चतुर्थारके कल्पपादपा भविष्यन्ति ततः प्रभृत्यष्टादशकोटाकोटिसागरोपमकालप्रमाणं निरन्तरं युग्मिव्यवहारः प्रवर्त्स्यति, ततः पुनः क्रमेण **ऋषभा**दिजिनसदृशा अवसर्पिणीकालचतुर्विंशतिर्जिना भविष्यन्त्येवमुत्सर्पिण्यवसर्पिण्योरेककालचक्रं भवत्येवंविधान्यनन्तानि काल-चक्राण्यतीतकाले गतानि भविष्यत्काले च गमिष्यन्त्येवं प्रोच्य भगवान् **वर्धमान**स्वामी **देवशर्म**विप्रप्रतिबोधार्थं **गौतमं** समीपग्रामं प्रहितवान्, ततस्त्रिंशद्वर्षगृहवासोषितः सार्द्धद्वादशवर्षछद्मस्थावस्थः स्त्रिंशत्संवत्सरकेवलिपर्यायो भगवान् **कार्तिकमा-सामावास्या**निशि **चन्द्र**वर्षे **प्रीतिवर्धन**मासे नन्दिवर्धनपक्ष **उपशम**दिने **देवानन्दा**-भिधनिशि **सर्वार्थसिद्ध**मुहूर्ते **नाग**करणे **स्वाति**नक्षत्रे रात्रिपश्चिमयामार्द्धे स्वनिर्वाणार्थं पद्मासनासीनोऽस्थात् । ततश्चलितसिंहासनो देवेन्द्रस्तत्र समागत्य साश्रुनयनः करौ योजयित्वा भगवन्तमुवाच-भगवान् ! त्वदीयजन्मनक्षत्रं द्विसहस्रवर्षस्थितिको भस्मग्रहोऽधुना समागतोऽस्ति, तद् हे दयासागर ! क्षणं स्थित्वा पश्चान्मोक्षं याहि यतो जिनशासनपूजाप्रभावादिनाशकृत् स त्वदीयदृष्टिसामर्थ्यहतः सन् मोघोदयो भविष्यति । ततः स्वामी प्रोवाच हे वासव ! आयुर्वृद्धिं कर्तुं जिनेश्वरा अपि न समर्थाः, प्राक् कोऽपि जीवितवृद्धिं कर्तुं समर्थो न बभूव, सम्प्रति कोऽपि नास्ति, भविष्यत्काले कोऽपि न भविष्यति, नाऽभाव्यं क्वचिद् भवति न च भाविनो नाशोऽस्तीति प्रोच्य पञ्चपञ्चाश-त्पुण्यफलविपाकानि पञ्चपञ्चाशच्च पापफलविपाकान्यध्ययनानि षट्त्रिंशतं चाऽपृष्ट-व्याकरणानि(उत्तराध्ययनसूत्राध्ययनानि) कथयित्वा **प्रधाना**ख्यमध्ययनं स्मरन् षष्ठतपाः प्रभुः शैलेशीकरणं विधाय पञ्चह्रस्वाऽक्षरोच्चारणमात्रकालेन योगनिरोधं कृत्वा मोक्षमगात् । तस्मिन् कालेऽनुद्धरिकुन्थुजातिर्बहु समुत्पन्ना ततः संयमं दुराराध्यं विज्ञाय बहुभिर्मुनिभिरनशनं कृतं, पुनस्तस्मि**न्नमावास्या**दिवसे **काशी-कोशल**देशस्वामिनो नव**मल्लकि**नव**लेच्छकि**जातीया अष्टादशगणराजानः सोपवासं पौषधं कृतवन्त-

D:\chandan/new/kalp-2/pm5\3rd proof

स्ततस्तन्निशि तीर्थंकररूपभावोद्योते गते द्रव्योद्योतार्थं रत्नदीपान् चक्रुः । पुनर्यस्यां निशि श्री**वीरो** मोक्षं गतस्तस्यां विभावर्यां बहुदेवगमनागमनेन प्रभूतोद्योतः समुत्पन्न-स्तस्मिन्नवसरे च त्रिदशमुखाद्भगवतो मोक्षगमनं निशम्य विषण्णः श्रीप्रथमगणाधि-पश्चिन्तयितुं लग्नो हा भगवता वञ्चितोऽहमन्तसमये मां दूरीकुर्वता भगवता वरं न कृतं, हे प्रभो ! किमेवं भवता ज्ञातं यन्मत्तः केवलज्ञानं प्रार्थयिष्यत्यथवा बालवत्कदाग्रहं कृत्वा वसनाञ्चलं गृहीत्वा मां सार्द्धं नयतेत्यादि कथयिष्यतीति, हे विभो ! मया तवेदृग्लोभित्वं कृपणत्वं च न ज्ञातं, यदि त्वं मह्यं केवलज्ञानमदास्यस्तर्हि तव किमपि न्यूनं नाऽभविष्यत् पुनर्यदि त्वं मां मोक्षे सार्द्धमनेष्यस्तर्हि तत्र किं संकुलत्वमभविष्य-त्स्वामिन्नन्तसमये भवत्परमभक्तं परमस्नेहिनं मां दूरीकुर्वता त्वया लोकव्यवहारोऽपि न पालितः, भवादृशामेतन्न युक्तं हे विभोऽथ भवद्दर्शनमपि मह्यं दुर्लभं संजातं । हे प्रभो ! वीर वीर इति कस्याऽहं कथयिष्यामि, मां च हे **गौतम** ! हे **गौतम** ! इति पुनः पुनः कः कथयिष्यति ? मदीयमनः सन्देहं च को निवारयिष्यति ? हे भगवन्मां वञ्चयित्वा कथं गत इत्यादि विलपतः श्री**गौतमगणधर**स्य पुनरिदृग् विचारः समुत्पन्नो-मया मुधैवैत-त्प्रलपनादिकं कृतमहं तु रागी स तु वीतरागो मदुपरि रागमकुर्वता तेन भगवता स्वीयं वीतरागत्वं सत्यापितं हे वराकजीव त्वं मुधैव मोहं वहसि ! मोहेनाऽस्मिन् संसारे त्वया बहुदुःखं प्राप्तमतो मोह त्यजाऽस्मिन् संसारे कोऽपि कस्य नाऽस्तीत्यादिविचारयन् क्षपकश्रेणिमारुह्य मोहनृपं हत्वा केवलज्ञानं समासादितवान् । अथ भगवद्भावोद्योते गते जनैः प्रकाशार्थं तन्निशि रत्नदीपाः कृतास्तेन जनमध्ये **दीपालिपर्व** प्रसिद्धिं प्राप्तं । किंच भगवद्वियोगात् सकलसङ्घो म्लानाननो बभूव । प्रथमगणाधिपकेवलज्ञानप्राप्तितश्च प्रफुल्लवदनः सञ्जातः । स्वर्गपत्यादिदेवैर्भगवद्निर्वाणमहोत्सवं विधाय श्री**गौतम-स्वामि**केवलमहोत्सवः प्रतिपत्प्रभाते चक्रे । तदा प्रभृति प्रथमगणधरप्रोक्तसूरि-मन्त्रसमाराधकाचार्यादयो मुनीन्द्रा अस्मिन् वासरे चन्दनादिपूजनवस्तुभिः स्थापना-चार्यपूजां कारयन्ति । तथा भगवद्निर्वाणदुःखितस्यऽभुञ्जानस्य नन्दिवर्द्धनभूपस्य द्वितीयादिने स्वस्रा **सुदर्शन**या प्रसह्य भोजनं कारितं तस्माल्लोके **भ्रातृद्वितीया** प्रसिद्धिं गता । इति**दीपालि**पर्वव्याख्यां श्रुत्वा **सम्प्रति**धरापालः पुनरुवाच-

भगवन्नस्मिन्प्रतिपद्वासरे लोका नूतनवसनमिष्टान्नफलादिभोगं वेश्माद्यलङ्करणं परस्परप्रणामं च कथं कुर्वन्ति तदा सूरिः प्रोवाच-पृथ्वीप ! श्रुणु-**उज्जयिन्यां** पुर्यां

धर्माभिधो भूप आसीत् तस्य **नमुचि**नामा प्रधानस्तत्रैकदा श्री**मुनिसुव्रत**तीर्थपतिशिष्यः श्री**सुव्रत**सूरीशः सपरिवारः समागतस्तद्वन्दनार्थं सपरिवारो भूपः समाययौ । तदा जिनधर्मविरुद्धं वदन्तं **नमुचि**सचिवं बालसाधुर्निर्जितवान् प्राप्तपराजयः कोपस्फुरदधरो मन्त्री विभावर्यां साधुमारणार्थं साधुवसतिसमीपं गतः, ततः शासनदेव्या स्तम्भितः स प्रत्युषे वन्दनार्थं समागच्छता भूपालेन दृष्टः क्षमयित्वा च मोचितस्ततः पृथ्वीपपौर-धिक्कृतोऽतीवलज्जितः स **नमुचिः** पुराद् बहिर्निर्गत्य क्रमेण **हस्तिनागपुरं** ययौ । तत्र **पद्मोत्तर**नृपस्य पट्टराज्ञ्या **ज्वालादेव्या** रूपनिर्जितकामदेवौ शौर्यादिगुणलङ्कृतौ **विष्णुकुमारमहापद्मा**भिधौ कुमारौ स्तः वैराग्यवासितहृदये **विष्णुकुमारे** यौवराज्य-पदमनीच्छति भूपेन **महापद्माय** दत्तमथैकदा **महापद्मेन नमुचि** सचिवत्वेन स्थापित-स्तेन कदाचित् सिंहपराक्रमः **सिंहरथ**नरपतिः पराजितस्तदा तुष्टेन **महापद्मेन** तस्मै वरं दत्तं, तेन न्यासीकृतमथ कदाचिज्**ज्वालादेवी** रथयात्राकृते स्वर्णरत्नमयं जैनं रथं निर्मापितवती, तदा तत्सपत्नी **लक्ष्मी**रपि स्पर्द्धया ब्रह्मरथं निर्मापितवती । रथाकर्षण-कृते तयोः कलिः सञ्जाते नृपेण कलहनिवारणकृते द्वावपि रथौ पश्चान्निवारितौ । तदा जनन्यपमानं विलोक्य दुःखितहृदयो **महापद्मो** देशांतरं प्रययौ । क्रमेण स्वपराक्रम-साधितषट्खण्डः परिणीतानेकभूपतिकन्यश्चतुर्दशरत्ननवनिधानप्राप्तिप्रख्यातचक्रित्वः स पितृकृतप्रवेशमहामहः स्वनगरं प्राविशत्ततः **पद्मोत्तर**प्रमुखा नृपा **महापद्म**कुमारस्य चक्रित्वाभिषेकं चक्रुस्ततो **विष्णुकुमारेण** सार्द्धं **पद्मोत्तर**नृपेण दीक्षा गृहीता, संयमं प्रपाल्य भूपः स्वर्गं जगाम । **विष्णुकुमारश्च** तीव्रतपस्तपन्वैक्रियलब्ध्यादिलब्धि-मान्संजातः, इतो **महापद्म**चक्रिणा प्रोतुङ्गशिखरैर्जिनप्रासादैः पृथ्वी सालङ्कारा कृता, स्वमातुश्च कनकरत्ननिर्मितजिनरथैः शासनप्रभावनापूर्वकं रथयात्रामनोरथः पूर्णः कृतोऽथाऽन्यदा **नमुचि**ना न्यासीकृतवरेण यज्ञार्थं राज्यं याचितं चक्री तस्मै राज्यं दत्त्वा स्वयमन्तःपुरे न्यवसत् । तस्मिन् काले वर्षाचातुर्मास्यभिग्रहयुताः सपरिवारा श्री**सुव्रताचार्या**स्तत्र स्थिता अभवन् । तान् प्रेक्ष्य प्रोल्लसितवैरो **नमुचिः** सूरिमवोचत्-त्वां विना सकललिङ्गधारिणो भक्तियुक्ता मां समुपस्थिता, अतः साधुभिः सप्तवासरो-परिष्टान्मत्पृथ्व्यां न स्थातव्यं । यदि कोऽपि स्थास्यति तमहं हनिष्यामि । पश्चात्केनाऽपि मह्यं दूषणं न देयं । तन्निशम्य श्रीसङ्घेन सप्रधानेन साधुस्थिरताकृते बहुप्रार्थितोऽपि स न मन्यते । तदा सङ्घप्रार्थितः **सुव्रतसूरीश्वरो मेरु**गिरिस्थितं लब्धिमन्तं श्री**विष्णुकुमार**-

D:\chandan/new/kalp-2/pm5\3rd proof

मुनीश्वरं समाह्वयत् सोऽपि गुर्वाज्ञया समागत्य गुरून् वन्दित्वा गुरुमुखज्ञातसकलवृत्तान्तः पृथ्वीपसभायां समागतो **नमुचिं** विना सकलसभाजनवन्दितः स **नमुचि**मवोचत्। पृथ्वीधव ! पूर्णचतुर्मासाभिग्रहा एते मुनीश्वरा अन्यत्र गमिष्यन्ति तस्मादेतेभ्यः स्थिरताकृते कियतीं महीं प्रयच्छ तच्छ्रुत्वा भूधवोऽभ्यधात् साधुभ्यः स्थिरताकृते मया त्रिपदीप्रमाणा मही दत्ता । तदाकर्ण्य समुत्पन्नकोपो **विष्णु**मुनीश्वरो वैक्रियलब्ध्या लक्षयोजनप्रमाणं स्वशरीरं विधाय द्वाभ्यां पादाभ्यां सकलां महीं पूरयित्वा तृतीयक्रमस्थापनकृते पृथ्वीं प्रयच्छेति वदन् तृतीयचरणं तदीयपृष्ठे स्थापितवान्। साधुद्रोहकृत् **नमुचि**र्नरकं गतस्तदा लोके त्रिविक्रमेण बलीशत्रुः पाताले प्रक्षिप्त इति प्रसिद्धिर्जाता तस्मिन् समये रत्नाकरा मर्यादां तत्यजुः, पृथ्वीगिर्यादिकम्पमभजदिदं किं सञ्जातमितिजातसंशयः सदेवो वासवोऽपि तत्कारणज्ञानात् प्रगतशङ्कः सन् **विष्णु**मुनीश्वरकोपनिवारणार्थं गन्धर्वदेवान् प्रहितवान् तेऽपि तत्र समागत्य वासवोक्तप्रकारेण शमत्वकरैर्गान्धिर्वगीतै**र्विष्णु**मुनीश्वरं प्रशान्तं कृतवन्तस्ततो **महापद्म**चक्री तं भ्रातृमुनीश्वरं प्राणमत्तदा मुनीश्वरस्तस्मा उपालम्भ दत्त्वा गुरुसमीपं समागत्याऽऽलोचनां गृहीत्वा श्रीजिनशासनप्रभावनां कृत्वा निरतिचारचारित्रः प्रकृष्टदुष्टकर्मशत्रून् हत्वा मोक्षं प्रययौ। तस्मिन्नुत्पाते शान्ते गतभयाः स्वस्थहृदया लोका नूतनवस्त्रभूषणालङ्कृताङ्गाः परस्परं प्रणामपूर्वकं मिष्टान्नपानादिना सत्कारयामासुर्महोत्सवांश्च चक्रुस्ततः प्रभृति प्रतिसंवत्सरं लोका अस्मिन् प्रतिपद्वासरे नूतनवस्त्रालङ्कारपरिधानं परस्परं च प्रणामं वेश्माद्यलङ्करणादीनि च कार्याणि कुर्वन्ति । हे **सम्प्रति**नृप ! एवं **दीपालि**पर्वादिवृत्तान्तस्तुभ्यं कथितः अस्मिन्**दीपालिपर्व**णि समागते चतुर्दश्यमावास्यावासरयुग्मे सोपवासः षोडशप्रहरप्रमाणः पौषधः कार्यो विविधपूजनवस्तुभिश्च श्रुतज्ञानपूजनं कर्तव्यं पञ्चाशत्सहस्त्रप्रमाणपरिवारपरिवृतकनककमलस्थितं श्री**गौतमस्वामिनं** स्मृत्वा परमभक्त्या च तत्सेवने कृते पञ्चाशत्सहस्त्रगुणपुण्यं प्राप्यते, एतत्पर्वाराधनपरा जिनधर्मविधिविधानरता भव्यलोकाः क्रमेण मुक्तिसुखं लभन्ते । सकलधातुषु कनकवन्नक्षत्रगणे शशीव विटपिषु कल्पपादपवद्, देवेषु देवेन्द्रवत् पृथ्वीपेषु षट्खण्डाधिपवदेतत्पर्व पर्वेषु श्रेष्ठतरो यत्र श्री**वीर**प्रभुर्मुक्तिगमनं श्री**गौतम**गणाधिपस्य च केवलज्ञानप्राप्तिः, तत्पर्वसकलभव्यानां शिवं तनोत्वेवं श्री**मदार्यसुहस्तिसूरि**मुखकमलाद् **दीपालिकाव्याख्यानं** समाकर्ण्य **सम्प्रति**भूपतिः श्री**दीपालिका**-

पर्वप्रथनं सकलदेशेषु चकार, तेन नृपेण जिनधर्मस्य महाप्रभावना कृता नवीन-जिनालयैर्जीर्णोद्धारैश्च पृथ्वीमण्डिताऽनार्यदेशेष्वपि जिनधर्मः प्रवर्तितो न्यायेन च राज्यं पालयामासाऽस्य विशेषेण वृत्तान्तस्त्वन्यग्रन्थाद् ज्ञेयः । एतद् **दीपालिव्याख्यानं** श्रुत्वा तन्मध्यवर्णितपञ्चमारकभावांश्च निशम्य मुमुक्षुभिस्तत्सद्दग्वैपरीत्यं न कर्तव्यं किन्तु सदा धर्मे स्थिरता कार्या ।

निशम्यैवं भवक्लेश-नाशाय कुरुतोद्यमम् ।
**वीर**निर्वाणसत्पर्व-सेवने सततं जनाः ॥१॥

**कच्छ**देशे वरे **जक्खौ-पुरे** धर्मिधनियुते ।
**वर्द्धमाना**दितीर्थेशा-नेकप्रासादमण्डिते ॥२॥

चन्द्रशून्यखनेत्राब्दे, व्याख्यादीपालिपर्वणः ।
मार्गस्य कृष्णसप्तम्यां, स्वपरश्रेयसे कृता ॥३॥

मुनिमण्डलमुख्यस्य, **गौतमाब्धेः** शुभाज्ञया ।
मया **नीत्यब्धि**शिष्येणो-पाध्यायेन **गुणाब्धि**ना ॥४॥

प्रमादवशगेनात्र, यत्किञ्चित् स्खलितं मया ।
संशोध्यं तद्विपश्चिद्भिः क्षन्तव्यं च क्षमापरैः ॥५॥

**इति दीपालिकाव्याख्यानम् ॥**

● ● ●

# परिशिष्टानि

# परिशिष्टम्

## [ १ ]

### अपापापुरी[ संक्षिप्त ]कल्पः[१] ॥

सिद्धार्थोक्त्या वनान्ते खरकसुभिषजाभ्यञ्जनद्रोणिभाजः,
शल्ये निष्क्रि( ष्कृ? )ष्यमाणे श्रुतियुगविवरात्तीव्रपीडार्दितस्य ।
यस्या अभ्यर्णभागेऽन्तिमजिनमुकुटस्योद्यदाश्चर्यमुच्चै-
श्चञ्चच्चीत्काररावस्फुटितगिरिदरी दृश्यतेऽद्यापि पूरः ॥१॥

चक्रे तीर्थप्रवृत्तिं चरमजिनपतिर्य वैशाखशुक्लै-
कादश्यामेत्य रात्रौ वनमनु महसेनाह्वयं जृम्भिकातः ।
सच्छात्रास्तत्र चैकादशगणपतयो दीक्षिता गौतमाद्या,
जग्रन्थुर्द्वादशाङ्गीं भवजलधितरीं ते निषद्यात्रयेण ॥२॥

यस्यां श्रीवर्धमानो द्व्यहमनशनकृद्देशनावृष्टिमन्त्यां,
कृत्वा श्रीहस्तिपालाभिधधरणिभुजोऽधिष्ठितः शुल्कशालाम् ।
स्वातावूर्जस्य दर्शे शिवमसमसुखश्रीनिशान्तं निशान्ते,
प्रापत्पापास्तपापान् विरचयतु जनान् सा पुरीणां धुरीणा ॥३॥

नागा अद्यापि यस्यां प्रतिकृतिनिलया दर्शयन्ति प्रभावं,
निस्तैले नीरपूर्णे ज्वलति गृहमणिः कौशिके यन्निशासु ।
भूयिष्ठाश्चर्यभूमिश्चरमजिनवरस्तूपरम्यस्वरूपा,
साऽपापा मध्यमादिर्भवतु वरपुरी भूतये यात्रिकेभ्यः ॥४॥

॥ इति श्रीअपापाकल्पः ॥
॥ ग्रं० १०, अ० २१ ॥

• • •

---

१. अयं कल्पः श्रीजिनप्रभसूरिविरचिते विविधतीर्थकल्पे १४ क्रमाङ्केनाऽस्ति ।

D:\chandan/new/kalp-p/pm5\2nd proof

# परिशिष्टम्

## [ २ ]

### श्रीहेमचन्द्रसूरीश्वरविरचितदीपोत्सवकल्पस्याकाराद्यनुक्रमः ॥


| श्लोकांशः | श्लो०/पृ० |
|---|---|
| [ अ ] | |
| अकल्पान्तर्गतं कल्प- | ७०/१५ |
| अक्षीणसङ्ग्रहाम्भस्कौ, | ८१/१८ |
| अङ्गारमर्मराभा भू- | २०३/३५ |
| अचलभ्रातामेतार्य- | ३४/७ |
| अतः परं दुःषमायां, | १७१/३० |
| अतः परं पूर्ववच्च, | २३०/३७ |
| अतिवृष्ट्या खनन्तः, | १२४/२५ |
| अथ निर्वाणसमयं, | ३८/७ |
| अनन्तदुःखः संसारो, | ४२/७ |
| अनुशिष्याऽर्हतं धर्मं, | १६२/२८ |
| अन्यैः पाखण्डिभिर्दत्तः, | १३६/२६ |
| अपश्यत् त्रिशलादेवी, | १२/४ |
| अपि धर्मपरा भूत्वा, | ६६/१४ |
| अपि सूक्ष्मं तनुयोगं, | २६९/४१ |
| अब्जाकरेष्वम्बुजानि, | ६५/१४ |
| अभिषिच्य प्रभुं | १८/४ |
| अरौ यावसर्पिण्या- | २१४/३६ |
| अर्घति स्म च विज्ञानं, | १६९/२९ |
| अर्थस्तु मोक्ष एवैको, | ४१/७ |
| अर्हद्भक्ताश्च राजानो- | १७०/२९ |
| अर्हन् सत्यकिजीव- | २३६/३८ |
| अवधिज्ञानविज्ञात- | १५/४ |
| अस्मद्विलक्षणाचारा- | ८४/१८ |
| अस्मन्निर्वाणतो वर्षशतैः | १११/२१ |
| अस्माद्दुष्कर्मणस्तस्मा- | १३९/२६ |
| अहोरात्रान् सप्तदश, | १४४/२७ |
| [ आ ] | |
| आचार्याश्चन्द्रमास्तुल्याः, | १६७/२९ |
| आचार्यो दुःप्रसहाऽऽख्यः, | १८७/३४ |
| आदास्यन्ते सुविहित- | ५८/११ |
| आमभूपस्तदादेशा- | ११०/२१ |
| आसन्नमृत्युर्भूयोऽपि, | १५०/२७ |
| [ इ ] | |
| इतश्च प्रभुनिर्वाणं, | २७५/४१ |
| इतश्च दिक्कुमारीणा- | १४/४ |
| इति चिन्तयतस्तस्य, | २७६/४१ |
| इति श्रुत्वा स्वप्नफलं, | ९०/१८ |
| इत्थं च दुःषमा वर्ष- | १९४/३४ |
| इत्थं प्रवचनाऽवज्ञा- | ५५/१० |
| इत्युक्तवन्तं श्रीवीरं, | ९१/१८ |
| इत्युक्ते कल्किनं | १६०/२८ |
| इदं हि भरतक्षेत्रं, | १६५/२९ |
| इन्दुः स्त्रक्ष्यत्यतिशीतं, | १९७/३४ |
| इन्द्रभूतिरग्निभूति- | ३३/७ |

[ उ ]

उच्चैश्रवास्तुरङ्गेषु, ५/३
उज्जयिन्याः प्रभु सोऽपि, १०६/२१
उत्पन्ने दुग्धदध्यादौ, २२७/३७
उत्पेदे तुर्यकं ज्ञानं, २६/५
उत्सन्ने केवले भावी, ९४/१९
उत्सर्पिण्यां दुःषमादौ २१५/३६

[ ऋ ]

ऋजुवालिकानदीतीरे, ३०/६

[ ए ]

एकविंशो जिनो मल्लो, २४१/३८
एरण्डबीजवद्बन्धा- २७१/४१
एवं गुरुकुलवासः, १७९/३०
एवं च तप्यमानस्य, २८/६
एवं च दुःषमाकाले, ८९/१८
एवं च देशनां कृत्वा, ४४/८
एवं मुनिवचः श्रुत्वा, १४०/२६
एवं सदापि भोक्ष्यन्ते, २१२/३६
एवमाख्याय समवसरणा- २५०/३९

[ क ]

कथञ्चिद् गृहवासे- २०/५
कथयिष्यन्ति तेऽप्येवं, १२६/२५
कल्किना खान्यमानाया- १३०/२५
कल्किराजस्तदाकर्ण्य, १२८/२५
कल्की भाषिष्यते शक्रं, १५५/२७
कल्याणफलपाकानि, २५६/३९
कार्तिकस्य जीवः २३३/३७
कालं तेनागमिष्यन्तं, ७६/१७
कालात् कर्मवशाद्भावि, १३४/२६
किमरे ! मर्त्तुकामोऽसि, १४१/२६
कियत्यपि गते काले, ७८/१७
कुण्डग्रामेऽथ सिद्धार्थ- १०/४
कुदेशे कुकुले जाता, ६७/१४
कुप्यन्निति गिरा कल्की, १५९/२८
कुमारोऽष्टादशाब्दानि, १२२/२४
कूटतुला कूटमानं, १८३/३१
कूले कूले कूलिनीनां, २०८/३५
कृत्रिमं ग्रहिलीभूय, ८७/१८
क्रमादेवं हीयमाणे, १८६/३१
क्रोधमानमायालोभा, १२०/२४

[ क्ष ]

क्षपकोपशमश्रेण्यौ न च, ९५/१९
क्षमादिगुणपद्माङ्काः, ७१/१६
क्षीरद्रुतुल्याः सुक्षेत्रे, ५६/११

[ ग ]

गङ्गाप्रवाहपयसा, १४६/२७
गर्भं वक्ष्यति षड्वर्षा, २०६/३५
गर्भे जन्मनि दीक्षायां, २६०/४०
गवालिजीवः समाधि- २३९/३८
गीतार्था लिङ्गिनश्च स्युः, ७४/१७
गुरून्नाराधयिष्यन्ति शिष्याः १७८/३०
गोदोहिकासनस्थस्य, ३१/६
गोपालाः कौशिकः २७/५
गोशीर्षचन्दनादीनि, २७४/४१
ग्रामाः श्मशानवत्प्रेत- १७३/३०
ग्रामा नगरवत्स्वर्ग- १६६/२९

[ च ]

चतुर्दशसहस्राणि, ३६/७
चतुष्पथेऽवस्थिता सा, १३१/२५
चैत्रमासि सिते पक्षे १३/४
चोर्याच्चोरा पीडयिष्यन्- १७६/३०
चौरा राजविरोधो, १२१/२४

[ ज ]

जनानामाददानः स्वं, १२३/२५
जम्बूशिष्यः प्रभवश्च, ९६/२०
जयन्तोऽथाऽजितो धर्मः, २४७/३९
जयश्रियं यच्छतु तुभ्यमेष २७८/४१
जलोपसर्गे विरते, १४७/२७

जिनजन्माभिषेकाय, १७/४
जीर्णशालास्थितो हस्ती, ४६/८
[ त ]
तं जल्पिष्यति शक्रोऽपि, १५७/२८
ततः पाखण्डिनः सर्वान्, १३५/२६
ततः सुसमये जाते, ८८/१८
ततश्च मासि वैशाखे, २९/६
ततो भद्रबाहुर्गणधरो ९९/२०
ततोऽन्यगच्छकैः, ६०/१२
ततोऽर्वाग्वत्स्र्यते धर्मो, १९१/३४
तत्पानात् ग्रहिलाः सर्वे, ८२/१८
तत्र जातिस्मरः पूर्वं, २२५/३७
तत्र श्रेणिकराड्जीवः, २३१/३७
तत्राचार्यः प्रातिपदः १४५/२७
तत्राद्यः पुष्करो नाम २१६/३६
तत्रैत्य निशि मत्स्यादीन्, २११/३६
तथा पर्वसु दीपाली, ६/३
तथा हि पृथिवीपुर्यां, ७५/१७
तथाऽपराजितो भीमः, २४९/३९
तदा च कार्तिकदर्श- २५५/३९
तदा च मथुरापुर्या- ११९/२४
तदा च विरसा मेघाः, १९९/३५
तदा रथपथमात्रं, २१०/३५
तदाप्रभृति लोकेऽपि, २७३/४१
तदेषां फलमाख्याहि, ४८/८
तृतीयः पोट्टिलजीवः, २३२/३७
तृतीयो घृतमेघाख्यः, २१७/३६
ते च पर्युषणापर्व १०४/२१
ते वक्ष्यन्ति भरत- २२०/३६
ते विपर्यासयिष्यन्ति, ५३/१०
तेषां च प्रतिभास्यन्ति, ५७/११
तौ च सूक्ष्मौ वाङ्मनस- २६८/४०
[ त्र ]
त्रयोविंशोऽनन्तवीर्यो, २४२/३८
त्रिनवत्यधिकैर्वर्ष- १०३/२०
[ द ]
दग्विकारैः स्मितैर्जल्पै- १८१/३०
दत्त्वा संवत्सरं दान- २३/५
दत्त्वाऽवस्वापिनीं देव्याः, १६/४
दशवैकालिकग्रन्थं, ९७/२०
दशवैकालिकभृद्यः, १९०/३४
दीर्घदन्तो गूढदन्तः, २४३/३८
दुःखं स्थास्यन्ति तिर्यञ्चो, २०१/३५
दुःषमान्ते भविष्यन्ति, २२३/३७
दुःषमायामतीतायां, २२८/३७
दुहिता महिता स्त्रीसु, २२/५
देवतावचसा तेन, १४२/२६
देवशर्मा द्विजो ग्रामे २५३/३९
द्रव्येण कुम्भलाभेऽपि, १४९/२७
द्रुमौषधिलतावल्ली- २१९/३६
द्वादशाब्दीं गृहे नीत्वा- १९२/३४
द्विपृष्ठश्च त्रिपृष्ठश्च, २४६/३९
द्वीपायनजीवस्त्वेकोनविंशो- २४०/३८
[ ध ]
धर्मतत्त्वे प्रणष्टेऽथ, १९५/३४
धर्मश्लथेषु ये शिक्षां, ५४/१०
धर्माणां शुभभावानां, १८५/३१
धृष्टस्वभावा मुनयः, ५९/१२
[ न ]
न कुतीर्थिकतिर्यञ्चो- ६३/१३
न दौस्थ्ये परचक्रे वा, ५०/९
न युक्तमेभिर्गमनमिति ६१/१२
न साक्षाद्भाविनो देवा, १८०/३०
नगरे पर्यटंस्तत्र, १२५/२५
नन्दनः श्रेणिकजीवो, २२९/३७
नन्दिश्च नन्दिमित्रं, २४५/३८
नवमः केकसीजीवो, २३५/३८
निर्ममः सुलसाजीवो, २३८/३८

D:\chandan/new/kalp-p/pm5\2nd proof

निर्लज्जा वस्त्ररहिता, २०५/३५
निर्वाणे स्वामिनि २७२/४१
निर्वीरां क्षितिमाप्य २७७/४१
नृषु चक्री सुरेष्विन्द्र ३/३

[ प ]

पञ्चत्रिंशत् समधिके १०७/२१
पञ्चमारकपर्यन्तं, १६४/२९
पञ्चर्हस्वाक्षरोच्चारमित- २७०/४१
पञ्चाशीत्यधिकैर्वर्षशतैः १०८/२१
परुषाः पांशुभूयांसो- १९६/३४
पर्यङ्कासननिषिन्नो, २६६/४०
पललाहारनिरता, २०९/३५
पाखण्डाः करदाः सर्वे, १५६/२७
पितुः पापफलं घोरं, १६३/२९
पितृव्योऽथ सुपाश्वोंऽभूत्, २१/५
पुमर्था इह चत्वारः, ४०/७
पुराणेषूक्तमस्त्येवं, १३८/२६
पूर्वाह्णेऽथ चारित्रस्य, १९३/३४
पृथ्व्यादीनां रसं कर्त्ता २१८/३६
प्रतिपालय नाथ त्वं, २६२/४०
प्रत्यर्धचक्रिणैते २४८/३९
प्रदीपपर्वणोऽस्यैव, ८/३
प्रवर्त्तनाद् दुषमाया- २६४/४०
प्रायः कपिसमा लोल- ५२/१०

[ ब ]

बलदेवस्य जीवोऽर्ह- २३७/३८

[ भ ]

भरतैरावतेष्वेवं २१३/३६
भविष्यन्ति च भूयांस- १४३/२६
भविष्यन्ति सुखा वाता, २२२/३७
भविष्यन्त्यायतनानि, १४८/२७
भाविनो बिलवासाश्च, २०७/३५
भावी विरोधो स्वजनै- १७७/३०
भिक्षुभ्यो याच्यमानस्त्वं, १५८/२८
भूपः कुमारपालाख्यो, ११२/२२
भूषणानि प्रभूतानि, ७/३
भो भव्याः श्रूयतां ११४/२२

[ म ]

मणिमन्त्रौषधितन्त्र- १८४/३१
मत्तीर्थे वर्त्तमानानां, ११५/२२
मन्त्री ज्ञात्वेति तन्मन्त्रं, ८५/१८
मन्त्र्युचे ग्रहिलीभूय, ८६/१८
मन्दाकिनी स्रवन्तीषु, ४/३
मन्निर्वाणाद् गतेष्व- ११७/२३
मम निर्वाणतो मुक्ति, ९२/१९
महागिरि-सुहस्त्याद्या, १०१/२०
महापद्मो दशमाख्यस् २४४/३८
महासिंहासनासीनं, १५४/२७
मार्गं श्रितो यथा दूरं, ४३/७
मार्गशीर्षाभिधे मासि, २५/५
मासादनन्तरं मेघो, ७७/१७

[ य ]

यथा फलायाबीजानि, ६८/१५
यथा यथा यास्यति च, १७२/३०
यथा यथैष्यति कालो २२१/३६
यदादिशति मे स्वामी- २५४/३९
यद्वा घुणाक्षरन्यायात्, ६९/१५
यस्येदं वर्त्तते तीर्थं, २/३
येन भावी कासः श्वासः, २००/३५
येऽन्त्यास्ते भाविनो मध्ये, १७५/३०

[ र ]

रजतस्वर्णमाणिक्य- ३२/६
रत्निद्वयप्रमाणाङ्गा, १८९/३४
रत्निमानाः पुरुषाङ्गा, २०४/३५
राजा कुमारपालोऽथ, ११३/२२
राजामात्यौ विसदृशौ, ८३/१८
राज्ञे मन्त्री तदाचख्यौ, ७९/१७

[ ल ]

| | |
|---|---|
| लक्षमेकोनषष्टिश्च, | ३७/७ |
| लिङ्गिनोऽपि प्राक्प्रभावात्, | ६४/१३ |
| लुब्धा नृपतयो भृत्यान्, | १७४/३० |

[ व ]

| | |
|---|---|
| वज्रिणं बोधयित्वैवं | २६५/४० |
| वत्सराणां चतुःषष्ट्य, | ९३/१९ |
| वर्षिष्यन्ति तथाम्भोदा- | १९८/३५ |
| विपद्यमानस्य जन्मऋक्षं, | २६१/४० |
| विमलवाहन इति राण्- | १८८/३४ |
| विरलाः पालयिष्यन्ति, | ५१/९ |
| विवेकिनोऽङ्गिनो भूत्वा, | ४९/९ |
| विष्टौ भावी नृपः कल्की, | ११८/२३ |
| वैताढ्यऋषभकूट- | २०२/३५ |

[ श ]

| | |
|---|---|
| शकटालात्मजः शील- | १००/२० |

[ श्र ]

| | |
|---|---|
| श्रावकश्राविकाहानि- | १८२/३१ |
| श्रीवीरप्राणतस्वर्ग- | ९/४ |
| श्रुत्वा तत् क्वापि | १३३/२६ |
| श्लथाचारचरित्राश्च, | ७२/१६ |

[ ष ]

| | |
|---|---|
| षट्त्रिंशत्तमपृष्टव्याकरणा- | २५७/३९ |
| षडशीतिं वत्सराणामायुः | १६१/२८ |
| षड्भिर्वर्षशतैर्विंशत्य- | १०२/२० |

[ स ]

| | |
|---|---|
| स एव केवलज्ञान- | २५२/३९ |
| सङ्ग्रहीष्यति गोगजाश्वा- | २२६/३७ |
| सङ्घः शक्राराधनाय, | १५२/२७ |
| सङ्घस्य कायोत्सर्गा- | १५३/२७ |
| सत्यशौचपरो धर्मा- | १६८/२९ |
| सत्सप्तत्यधिकैर्वर्ष- | १०९/२१ |
| सन्तु श्रीवर्धमानस्य, | १/३ |
| सप्तत्या सहित वर्ष- | १०५/२१ |
| सप्तमो नन्दजीवस्तु, | २३४/३८ |
| समत्सराः करिष्यन्ति, | ७३/१६ |
| सम्भूत-भद्रबाहू च, | ९८/२० |
| सर्वतोऽपि पुरं तच्च, | १२९/२५ |
| सर्वलोकोपकाराय, | ३५/७ |
| सर्वोऽपि हि तथा चक्रे, | ८०/१७ |
| ससङ्घं च प्रातिपदं, | १५१/२७ |
| सहस्रवाह्यामारुह्य, | २४/५ |
| सहस्राक्षोऽश्रुपूर्णाक्षः, | २५९/४० |
| साधवस्तं वदिष्यन्ति, | १३७/२६ |
| सिंहतुल्यं जिनमतं, | ६२/१३ |
| सिंहशवमथाधृष्यम- | ४७/८ |
| सिंहो गजो वृषः श्री स्त्रक् | ११/४ |
| सुदामा सङ्गमश्चापि, | २२४/३७ |
| सूक्ष्मं च वपुषो | २६७/४० |
| स्थविराश्च वदिष्यन्ति, | १३२/२६ |
| स्वयं श्री वर्धमानस्तु, | ३९/७ |
| स्वराज्यवृद्धिकरणा- | १९/५ |
| स्वामिनो मोक्षसमयं, | २५८/४० |
| स्वामिन् ! स्वप्ना मयाद्याष्टौ | ४५/८ |
| स्वामी तद्दिनयामिन्यां | २५१/३९ |
| स्वाम्यथोचे न कोप्यायुः, | २६३/४० |
| स्वाम्याख्यान्मम | ११६/२२ |

[ ह ]

| | |
|---|---|
| हिरण्यमस्ति स्तूपेषु, | १२७/२५ |


• • •

# परिशिष्टम्

## [ ३ ]

## श्रीविनयचन्द्रसूरीश्वरविरचितदीपालिकाकल्पस्याकाराद्यनुक्रमः ॥


| श्लोकांशः | श्लो०/पृ० |
|---|---|
| [ अ ] | |
| अकारयद् गुप्तिमुक्ति | १०४/५५ |
| अङ्गोपाङ्गानि सङ्कोच्या- | ९४/५४ |
| अजायन्त शतान्यष्टा- | २२४/६४ |
| अथ दिव्यकृतोल्लोचे | ५१/५१ |
| अथ स्वर्गतयोः पित्रो- | ११५/५५ |
| अथाकार्य स्वप्नपाठा- | ८२/५३ |
| अथानुज्ञापिता राज्ञा | ७२/५२ |
| अथो नरामरनाथं | १२८/५६ |
| अनन्तकालादाश्चर्यं | ३२/४९ |
| अनाश्रवः प्रशान्तात्मा | १३२/५७ |
| अनुज्ञाप्य जगन्नाथं | ४६/५० |
| अनुत्तमर्णाधर्मण- | १०६/५५ |
| अन्त्याथ साध्वी फल्गुश्रीः | १८१/६० |
| अन्यदा नमुचिः सूरीन् | २५८/६६ |
| अन्वीयमानमार्गोऽथ | ७८/५३ |
| अपश्चिमचतुर्मास्यां | १४९/५८ |
| अपात्रोखरे वप्स्यन्ति | १५७/५९ |
| अपानकेन षष्ठेन | १२७/५६ |
| अपृष्ट्व्याकरणानि | २३२/६४ |
| अमृतोद औषधीकृत् | १९०/६१ |
| अर्द्धनवमासाधिक- | १२/४८ |
| अशीतिलक्षैरधिका | ११८/५६ |
| अष्टाग्रमहिषीनाथो | २२/४८ |
| [ आ ] | |
| आगच्छद्भिश्च गच्छद्भि- | २३७/६४ |
| आबद्धमौलिमुकुटः | ७६/५३ |
| आयुः प्रमाणकल्याण- | २०९/६२ |
| आसनादि तदेन्द्राणां | १०१/५४ |
| [ इ ] | |
| इक्ष्वाकु-हरिवंशो-ग्र- | ३१/४९ |
| इत्थं सहस्त्रपञ्चाशद् | २७०/६७ |
| इत्यादिश्य भगवान् | २१९/६३ |
| इन्द्रप्रहितगन्धर्वै- | २६४/६७ |
| इहैवोज्जयनीपूर्यां | २४४/६५ |
| [ उ ] | |
| उत्कटिकानिषद्यायां | १४१/५७ |
| उत्तमनरैकषष्टि- | २१६/६३ |
| उत्पन्नेऽनुद्धरीकुन्थौ | २३४/६४ |
| उत्सर्पिण्यवसर्पिणी | २१८/६३ |
| उत्सर्पिण्याद्याऽरकेऽपि | १८८/६१ |
| उदयाख्यजिनो भावी | २००/६२ |
| उपशमितमेघनादं | २७८/६८ |
| [ ऊ ] | |
| ऊचे प्रभुः शक्र ! | २३०/६४ |
| ऊचे विष्णुर्यान्ति पूर्णा- | २६१/६६ |


D:\chandan/new/kalp-p/pm5\2nd proof

ऊढ मदनावलीको २५२/६६

[ ए ]

एकदा ज्वालया राज्ञ्या २५०/६५
एकदा रथयात्रायां ५/४७
एकशाटोत्तरासङ्गः २६/४९
एके तपोगौरविता १६४/५९
एकेन देवदूष्येण १२६/५६
एकोनषष्टिसहस्रा- २२१/६३
एवं द्वादशवर्षाणि १३८/५७
एवं नवसु मासेषु ९७/५४

[ क ]

कपिवच्चपलाः सत्त्वा १५४/५८
कल्की नंष्ट्वा स्थलभुवि १७२/६०
कल्कीम्लेच्छकुले १६७/५९
कल्याणफलपाकानि २३१/६४
काकवद्दीर्घिकायां न १५५/५८
कार्तिकस्यामावास्यायां २२६/६४
किञ्चिज्ज्ञात्वा श्रुताम्भोधेः २७२/६७
कुक्षौ श्रीत्रिशलादेव्या ४७/५०
कृतयोगनिरोधोऽथ २३३/६४
कृत्वा प्रणाममालोक्या- ४५/५०
कृपण-ब्राह्मण-प्रान्त- ३०/४९
कृष्णाश्विनत्रयोदश्यामृक्षे ४९/५०
क्रमं तृतीयं नमुचेः २६३/६६

[ क्ष ]

क्षपकोपशमश्रेण्योः १६१/५९
क्षयाय वाता वत्स्यन्ति १८३/६१

[ ख ]

खड्गिशृङ्गमिवैकाकी १३३/५७

[ ग ]

गगनमिवानालम्बो- १३१/५७
गङ्गासिन्धूभयतटे १८४/६१
गजो वृषो हरिर्लक्ष्मी १६/४८
गम्भीरे सरजस्त्राणे ५३/५१
गर्भं च त्रिशलादेव्या ३९/५०

[ च ]

चक्रवर्ती महापद्मो- २५५/६६
चण्ड-चपलाप-वातो- ४४/५०
चतुरो बलदेवाना- ८६/५३
चतुर्गुणैश्चतुरशीति- २३/४९
चतुर्दशपूर्विणां तु २२२/६३
चतुर्दशाधिकैकोन- १६६/५९
चतुर्द्दश्याममावस्यां २६८/६७
चन्द्र इव सौम्यलेश्यो १३५/५७
चन्द्रः कुवलयानन्दकारी ६०/५१
चन्द्रप्रभाशिबिकाया- १२०/५६

[ छ ]

छद्मस्थोऽस्थात् समा- २२५/६४

[ ज ]

जयन्तो व्याजितो धर्मः २१५/६३
जरारहितमरुजा- ९९/५४
जातिस्मृतेः पुरादीनां १९३/६१
जीतमेतत् सुरेन्द्राणां ३३/४९
जीर्णशालास्थितो हस्ती १५१/५८
जीवः श्रेणिकराजस्य १९७/६२
जीवत्स्वामिप्रतिमानां ४/४७
जीवो भावी सुनन्दस्य २०१/६२
जैनास्थानमिवोच्चक्रं ६४/५२
ज्योतिर्द्योतितदिग्चक्रो ६८/५२
ज्योतीरसाङ्क-स्फटिकाः ४३/५०

[ ज्ञ ]

ज्ञानेन दीक्षासमयं ११७/५६

[ ड ]

डकाराकारलाङ्गूल- ५७/५१

[ त ]

तं नन्तुमाययौ राजा २४५/६५
ततः कल्पद्रुमोत्पत्तौ २१७/६३
ततः कुलस्य युष्माकं ८७/५३
